In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला – (ii) 19

नवदुर्गं श्रीकृष्णकविविरचिता

श्रीनिवासविलासचम्पूः

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः
दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः
आचार्य के नीलकण्ठम्
निदेशकः

सम्पादिका
डा के वरलक्ष्मीः
उपनिदेशिका

सहसम्पादकः परियोजना – अनुसन्धाता च
श्रीमान् के वि सूर्यप्रकाशः

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2023

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकादमी पञ्चग्रन्थमाला (II) 19 Digitized by Muthulakshmi Research Academy

नवदुर्गं श्रीकृष्णकविविरचिता

श्रीनिवासविलासचम्पूः

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः
दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः
आचार्य के नीलकण्ठम्
निदेशकः

सम्पादिका
डा के वरलक्ष्मीः
उपनिदेशिका

सहसम्पादकः परियोजना – अनुसन्धाता च
श्रीमान् के वि सूर्यप्रकाशः

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् – 07
2023

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (ii) 19

Śrīnivāsavilāsacampūḥ

(Re-printing of rare book project)
This publication is published with the financial support under Ashtadashi Scheme of Central Sanskrit University, New Delhi

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Śrīnivāsavilāsacampūḥ

ISBN – 978-93-80171-82-1

© Sanskrit Academy

Year : 2023
Pages : xxxviii+100
Copies : 300
Price : Rs 250

In Public domain. Digitization With Lakshmi Research Academy

Sanskrit Academy Śatābdī Granthamālā (ii) 19

Śrīnivāsavilāsacampūḥ

of

Sri Krishna Kavi

(Published under "Re-printing of rare books project", Ashtadashi scheme of Central Sanskrit University, New Delhi)

Chief-Editor

Prof. K. Neelakantham

Director

Editor

Dr. K Varalakshmi

Dy. Director

Associate Editor & Project Investigator

K.V.Suryaprakash

Sanskrit Academy

Adarsha Shodha Sanstha

(Recognised by Central Sanskrit University, New Delhi)

Osmania University, Hyderabad – 500 007

2023

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (ii) 19

Śrīnivāsavilāsacampūḥ

(Re-printing of rare book project)
This publication is published with the financial support under Ashtadashi Scheme of Central Sanskrit University, New Delhi

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University Campus,
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Śrīnivāsavilāsacampūḥ

ISBN – 978-93-80171-82-1

© Sanskrit Academy

Year : 2023
Pages : xxxviii+100
Copies : 300
Price : Rs 250

In Public domain. Digitization Muthulakshmi Research Academy

Preface

ओम् श्री गुरुभ्यो नमः

।।श्रीशङ्करभगवत्पादाः विजयन्ते।।

'A narrative in mixed prose and verse has been called Champu' is the definition given by rhetoricians of Sanskrit. And "this variety of composition enlarges the scope and ease of the poet's expression and entertains the reader by the presentation of combinative of varying melodies" said by Bhojaraja in ChampuRamayana (गद्यानुबन्धरसमिश्रितपद्यसूक्तिः हृद्या हि वाद्यकलया कलितेव गीतिः). And composer of many Champukavyas Sri Melpattur NarayanaBhattatiri also reiterated that गद्यावली पद्यपरम्परा च प्रत्येकमेवावहति प्रमोदम्। हर्षप्रकर्षं तनुते मिलित्वा. Many prose passages have been seen in the midst of the verses in the Puranas, but there is not any instance of classical poetry of this recognized class known earlier. The rhetoricians of Sanskrit literature from Bhamaha of 6th century A. D. have given the definition to ChampuKavya. Hence it is thought that Kavyas in the form Champu must have been composed even before the 6th A.D. "But the earliest works of such class are found only after the 10th century A.D. And then on wards Champus became very popular and particularly they were composed largely in South India" said by M. Krishnamachariar, Sri Baladev Upadhyaya, Prof. M. Gopal reddy and other authors

 In Public domain. Digitization Muthulakshmi Research Academy

of history of Classical Sanskrit Literature. According to these, 257 ChampuKavyas have been traced out till now and some of them were published from various institutes and especially most of the ChampuKavyas were written by the poets belonged to Telangana, Andhra Pradesh, Tamilnadu, Karnataka and Kerala.

Yashastilakachampu of Somadeva / Soma-prabhasuri, *Yuddhakanda* of Bhoja's *Champu Ramayana* composed by Laksmanasuri, *Sreenivasa vilasa champu* of Krishnakavi, *Bhadrachalachampu* of Raghavarya, *Rameshwara vijayachampu* of Brahmatantraparakalaswamy are some of the famous champukavyas belong to Telangana.

We have recently published ***Ramakrishna yudhisthiracharitachampu*** of Sriman Perumalla Venkatarajakavi, ***Jagannatha Champu*** of Jagannathaarya, ***Yudhishthiraashwamadha Champu*** of Venkata shastry, ***Sri Venkatesha ChampuPrabandha*** of **Sriman Shirisinahal Perumandlacharya**, ***Raghunatha vijaya Champu*** **Sri Krishnakavi.** And now we are very happy to bring out another beautiful *ChampuKavya* authored by the same scholarly poet of Telanagana State of **Sri Krishnakavi.** This book was published long ago in Telugu script from Sri Saraswati Mudranaalaya, Chennai.

According to the History this Krishnakavi, he is said to have been lived between 1830 - 1919, and composed 100 above books on various Shastras, Kavyas, stotras. The Govinda Namams which are heard every where in pleasing tune were composed by him, it is said. He took sannyasaasrama on the advice of his gurus and became famous as Srimatparamahamsa Parivrajakacharya Sri Krishna Brahmateertha Yateendra. The famous Telugu writers Sri Suravaram Pratap Reddy and Sri Tumati Donappa have given a detaled note on Sansthanas of Telangana and their contribution to the literature in **Golkonda Kavula Sanchika** and **Andhra Samsthanamulu-Sahityaposhana** respectively. All the details are added here in Sanskrit Introduction. Sri Krishnakavi had composed this **Srinivasavilasa champu** on the advice of Sri Sitaramabhupala the rular of Atmakur Samsthan. He composed this Champukavya on the theme of Padukamahotsava of Lord Srinivasa of Sri Kurumurthy Temple in five chapters. His poetry is beautiful and pleasing and his prose is almost similar to that of Bana and Dandi and other champu authours like Trivikramabhatta. Indeed it is a rare champukavya which is written on a particular festival (Paadukamahotsava) of lord Srinivasa celebrated every year.

 In Public domain. Digitization Muthulakshmi Research Academy

I appreciate the honest efforts Dr K. Varalakshmi, Deputy Director of the academy. She made a thorough research on the life of Krishnakavi and his श्रीनिवासविलासचम्पू and prepared a very comprehensive foreword that could be useful for further research on the contributions of Samsthanas in Telangana. She has published a book सुरपुरसंक्षिप्तराजकीयेतिहासः in Sanskrit from our academy. I congratulate Dr K. Varalaksmi and wish her to bring some more critical studies based on the rare Sanskrit works.

I thank another amicable deputy director Dr V. Subrahmanyam for his continuous help in the publications of Academy and congratulations to Sri K. V. Suryaprakash senior research assistant and in charge of project of reprinting of rare books. He has readily agreed to publish this book under the reprinting of rare books. My thanks to Dr Joshi Santosh Kumar research assistant in the academy. He is always readily available for I bless my young and sincere research scholar Mr Joshi Bharadwaj who made this book ready for publication.

I thank Prof Srinivasa Varkhedi Hon'ble V.C. and Prof. Ranjit Kumar Barman Registrar I/c Central Sanskrit University, New Delhi for their continuous encouragement and for sanctioning such projects to

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy. I thank our Hon'ble Chairman Prof. D. Ravinder V. C. and Prof. P. Lakshmi narayana Registrar of Osmania University for their amicable support for the development of Sanskrit Academy. I thank Prof. Gayatri Muralikrishna Director, Aadharsh Institutions in CSU Delhi.

I thank Karshak Art Printers Vidyanagar, Hyderabad for printing this book on time.

सुधीजनविधेयः
Prof. K. Neelakantham
Director

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

प्राक्कथनम्

कृष्णकविविरचिता श्रीनिवासविलासचम्पूः

श्रीश्रीश्रीकृष्णब्रह्मतन्त्रपरकालयतीन्द्रमहादेशिक इति अपर नामाभिधःनवदुर्गं (होसदुर्गं) कृष्णकविः-

रघुनाथविजय-श्रीनिवासविलासचम्पूप्रबन्धयोः कर्ता कृष्णकविरेव इत्यतः रघुनाथविजयचम्पूप्रबन्धात् श्रीनिवासविलास चम्पूप्रबन्धाच्च कृतिकार-जीवनविशेषाणां अन्तरङ्ग प्रमाणानि सङ्गृह्य प्रस्तूयन्ते येन भारतस्य भव्यमितिहासं सनातनसंस्कृतिं सम्प्रदायांश्च ज्ञातुं प्रभवामो वयं भारतीयाः।

गोलकोण्ड-कवुल-सञ्चिका इति ग्रन्थे सुरवरं प्रतापरेड्डि महाभागः नैकेषां विद्वत्कवीनां परिचयपूर्वकं वर्णनं चकार। तस्मात् ग्रन्थात् बहिरङ्गप्रमाणानि च सङ्गृहीतानि। तूमाटि दोणप्प विरचितः आन्ध्रसंस्थानमुलु – साहित्यपोषणम् इति तेलुगुभाषाविरचित-ग्रन्थादपि कवेः कविकृतीनाञ्च प्रमाणानि सङ्गृह्यन्ते।

कृष्णकवेः जीवनकाव्यम्

श्रीनिवासविलास-रघुनाथविजयचम्पूप्रबन्धकर्ता कृष्णकविः वनपर्त्तिसंस्थाने धर्माधिकारी आसीत्। गृहस्थाश्रमे होसदुर्गं कृष्णमाचार्यः इति प्रथितोऽयं कविः अनन्तरं सन्न्यस्य श्रीश्रीश्रीकृष्णब्रह्मतन्त्रपरकालयतीन्द्रमहादेशिक इति विश्रुत अभूत्। परश्शतग्रन्थकर्ताऽयं कृष्णकविः रघुनाथविजयचम्पूप्रबन्धे

 In Public domain. Digitization Muthulakshmi Research Academy

श्रीनिवासविलासचम्पूप्रबन्धे रामेश्वरविजयचम्पूप्रबन्धे च स्ववंश चरित्रमधिकृत्य नैकान् विशेषान् उल्लिलेख।

होसदुर्गं कृष्णमाचार्यः - नवदुर्गकृष्णकविः

रघुनाथविजयचम्पू-श्रीनिवासविलासचम्पूप्रबन्धयोः कर्त्ता होसदुर्गं कृष्णमाचार्यः इति साहित्यग्रन्थेषु बहुधा दरीदृश्यते। प्रबन्धद्वये तु नवदुर्गकृष्णकविः नव्यदुर्गनिलयः प्रत्यग्रदुर्गस्थितिः नवदुर्गस्थः इति कृष्णकविः स्वपरिचयं प्रस्तौति।

श्रीमत्प्रत्यग्रदुर्गस्थितिरिह तनुते सम्मतं सन्मतीनां
नव्यं काव्यं सुभव्यं मितमतिललितं कृष्णनामा कवीन्द्रः[1]।।

श्रीनव्यदुर्गनिलयः कृष्णः कविसार्वभौमविरुदाढ्यः[2]।

श्रीमन्नवदुर्गस्थः कृष्णकविः सार्वभौमबिरुदाढ्यः[3]।

आहूतः श्रीशैलताताभिधकृतितनुजो **नूत्नदुर्गात्तवासः**[4]।

नवदुर्गकृष्णकविना जवेन रघुनाथविजयेऽस्मिन्[5]।

श्रीप्रत्यग्रदुर्ग-कविसार्वभौम-कविगण्डभेरुण्डबिरुदाङ्कितकृष्णार्येण कारितःश्रीनिवासविलासाख्यश्चम्पूप्रबन्धः[6].....

---

[1] र.वि.च. 1. 7

[2] र.वि. च.1. 34

[3] र.वि. च.2.20

[4] र.वि. च.5.23

[5] र.वि. च. 5. 3

[6] श्री.वि.1.पृ.सं.01

प्रत्यग्रदुर्गपुरकृतावसतिना तेन श्रीकृष्णकविना निर्मीयते- श्रीनिवास-विलासाख्यः ..चम्पूप्रबन्धः[7]।

इति **श्रीनवीनदुर्गनिलयस्य** कृष्णकविसार्वभौमस्य[8]....

श्रीमच्छ्रीशैलघनगिरिप्रत्यग्रदुर्ग.....श्रीकृष्णकविसार्वभौमस्य[9].....

होसदुर्गम् इत्यस्मिन् पदप्रयोगे 'होस' इति कन्नडभाषागतं पदमस्ति। 'होस' इति कन्नडपदस्य अर्थः **नव** इति भवति। कृष्णकविना होसदुर्गम् इति पदस्य संस्कृतीकरणं विहितमिति अनुमीयते। 'होस' इति पदस्य स्थाने नवनव्यनवीननवदुर्गपुर प्रत्यग्रादीनि पदानि कविना प्रयुक्तानि। नवदुर्गपुरे (होसदुर्गपुरे) कृष्णकविवंशजाः निवासं चक्रुरिति ज्ञायते।

कम्पिलिदेवरायनिर्मितःहोसदुर्गः (नवदुर्गः)

आन्ध्रसंस्थानमुलु – साहित्यपोषणम् इति ग्रन्थे आनेङ्गुदि संस्थानस्य वर्णनसन्दर्भे होसदुर्गस्य वर्णनम् उपलभ्यते। निजाम राष्ट्रस्य नैऋतिदिशि तुङ्गभद्रानद्याः उत्तरतीरे विद्यमाने होसपेट तालुकायां कमलापुरसमीपे आनेगोन्दिनामकः ग्रामः अस्ति। आने इति कन्नडभाषापदमस्ति। तस्य अर्थः गजः इति अस्ति। गोन्दि इत्यक्ते कुपथः इत्यर्थः। गजाकृत्या साम्यं भजतः पर्वतत्रयसङ्गमे अस्तीत्यतः आनेगोन्दीति नामकरणं कृतम्। सम्प्रति मैसुरु राज्यस्थे रायचूरुमण्डलान्तर्गतोऽस्ति अयं ग्रामः। क्रि.श. 14

---

[7] श्री.वि.1.पृ.सं. 05

[8] श्री.वि.च.3

[9] श्री.वि.च.5

 In Public domain. Digitization Muthulakshmi Research Academy

शताब्देः पूर्वार्धे बल्लारिमण्डलस्य शासकः कम्पिलिदेवरायलाभिधः राजा आनेङ्गुदिप्रदेशे शत्रुजनदुर्गमं 'होसमले' इति दुर्गं निर्मितवानिति ज्ञायते। अधुना एषः दुर्गः आनेगोन्दिदुर्गः इत्येव व्यवह्रियते। होस इति कन्नडपदस्य नव इत्यर्थः। होसदुर्गम् इति निवासस्थानस्याधारेण कृष्णकविवंशः प्रथित इति तर्कयितुं शक्नुमः। श्रीनिवासविलासचम्पूप्रबन्धस्यान्ते आनेङ्गुन्दिप्रस्तावः कृतः कविना । अतः कविवंशः आनेङ्गुन्दिस्थ-नवदुर्ग(होसदुर्ग) सम्बद्धः इति निष्कर्षः प्राप्यते।

आनेङ्गुन्दिक्षितीन्द्रात्तिरुमलनृपतेः प्राप्तसन्मानवृत्तिः[10]।

जीवनकालः - ख्रिस्ताब्दः 1840 – 1915

जननम् – शा.श.1761 विकारि ज्येष्ठकृष्णपञ्चमी (1840 A. D.)

मरणम् – शा.श. 1836 आनन्दकार्तीकबहुलपञ्चमी (1915 AD)

परकालपीठाधिपत्यम् – ख्रिस्ताब्दः 1885-1915

परकालमठाधीशेभ्यः श्रीश्रीश्रीनिवासब्रह्मतन्त्रमहादेशिभ्यः पञ्चसंस्कारदीक्षां प्राप्य हयग्रीवमन्त्रोपासकस्सन् मैसूरु चामराजेन्द्रस्य प्रार्थनया परकालमठाधिपत्यं स्वीचकार। मैसूरुचाम राजेन्द्रस्य धर्मपत्न्यै श्रीसीताविलासदेवाजम्मायै भरन्यासदीक्षां प्रदाय ताम् अन्वग्रहीत्। दीक्षास्वीकारात्पूर्वं वनपर्तिसंस्थानस्य धर्माधिकारी आसीत्।

जन्मस्थानं कर्णाटकस्थहोसदुर्गः।

---

[10] श्री.वि.च. 5. 22

In Public domain. Digitization Muthulakshmi Research Academy

वंशचरितम्

श्रीशैलकुलतिलकः शठमर्षणकुलतिलकः कृष्णकविः

श्रीशैलवंशस्य तिलकः शठमर्षणकुलस्य तिलक इति कृष्णकविः स्वपरिचयं चकार। शठमर्षणगोत्रे लब्धजन्माऽयमिति हेतोः शठमर्षणकुलतिलक इति आत्मानं वर्णयति कविः।

श्रीशैलवंशतिलकः कृष्णः कविसार्वभौमबिरुदाढ्यः[11]।

शठमर्षणकुलतिलकः कृष्णः कविसार्वभौमबिरुदाढ्यः[12]।

इति श्रीशैलकुलतिलकवेङ्कटार्यवर्यपौत्र-नवीनदुर्गपुरस्थित तातार्यवर्य-विद्वच्चूडामणि-द्वितीयतनूभुव-कृष्णकविसार्वभौम कृतिषु रघुनाथविजयाख्यचम्पूप्रबन्धः समाप्तः[13]।

श्रीशैलवंशपम्परा - विद्वत्परम्परा

श्रीनिवासविलासचम्पूप्रबन्धान्तेऽपि कृष्णकविः स्ववंश महत्त्वं कीर्तयामास। अत्र कृष्णकविवंशपरम्परा तत्कालीन विद्वत्परम्परा च विशदीभवति।

1 पितामहः – वेङ्कटार्यः

2 मातामहः – श्रीमदुक्कल श्रीवत्सकुल रामार्यः

3 मातामही – अनन्ताम्बा

4 तातार्यः – पिता कृष्णाम्बा – माता

---

[11] र.वि. च.3.35

[12] श्री.वि.च.2

[13] र.वि.च. 5

 In Public domain. Digitization Muthulakshmi Research Academy

5 वेङ्कटाचार्यः – अग्रजः

6 कृष्णार्यः – द्वितीयपुत्रः रचयिता

7 वेदान्ताचार्यः अनुजः

8 होसदुर्गं श्रीनिवासराघवाचार्यः पुत्रः – न्यायव्याकरण-
वेदान्तज्यौतिषवैद्यशास्त्रज्ञः

9 मातुलः – रङ्गनाथः

10 श्रीनिवासार्यः-मातृष्वसेयः प्यापलिनिवासी
रङ्गाम्बाबोज्जिकृष्णदम्पत्योः पुत्रः

11 श्रीरङ्गार्यः नृसिंहः तातार्यः(पिता)-गुरवः

12 प्यापलीग्रामनिवासी-कोण्डमार्यः-व्याकरणशास्त्रगुरुः

13 बुच्चि स्त्रीवेङ्कटार्यः-सुरपुरमहाराजवेंकटभूपगुरुः
तस्याः पतिः बोज्जिकृष्णः प्यापलीग्रामवासिनौ)

14 पुराणं दीक्षिताचार्यः-गद्वालास्थानकविः

श्रीवासब्रह्मतन्त्रादिमपदपरकालार्यवर्यानघाङ्घ्रि
द्वन्द्वाब्जानुग्रहात्तप्रतिपदविविधग्रन्थनिर्माणशक्तिः।
सञ्ज्ञावान् **कृष्णनामा सरसकविघटासार्वभौमो** व्यतानी-
च्छ्रीमत्प्रत्यग्रदुर्गस्थितिरतिललितं सर्वभव्यं सुकाव्यम्।।

श्रीमत्सवायिराजाबहदरुबहिरीत्यादिचिह्नाङ्कितस्य
श्रीसीतारामभूमीपतिमकुटमणेर्मुक्कराख्यान्वयेन्दोः।
सभ्यास्सर्वे समेतास्समदगजमिहारोप्य सञ्चार्य वीथ्यां

In Public domain. Digitization Muthulakshmi Research Academy

हर्षाद्यं तूर्यघोषैस्समदकविघटाघण्डभेरुण्डमाख्यन्[14](म्)।।

इति **श्रीमच्छ्रीनिवासब्रह्मतन्त्रपरकालगुरुवरकरुणाकटाक्ष-**समासादित निरवद्यकविता-प्रतिभाभासुरस्य श्रीमच्छ्रीशैलघनगिरि-प्रत्यग्रदुर्ग **तातार्यवर्यद्वैतीयीकनन्दनस्य** साहितीज्यौतिष-**पारदृश्व-वेङ्कटाचार्य वर्यानुजन्मनश्श्रीमदुक्कलश्रीवत्सवंशरामार्यानन्ताम्बा-दौहित्रस्य श्रीकृष्णकवि-सार्वभौमस्य** एतद्ग्रन्थनिशमनावसरात्मकूरु-**पुराधिप सीतारामभूपालास्थानकविव्रजप्रदत्तसमदकविघटागण्ड-भेरुण्ड बिरुदस्य** कृतिषु श्रीनिवासविलासाख्यश्चम्पूप्रबन्धो **दशमः** श्रीश्रीनिवासपरब्रह्मणे नमः[15]।

कृष्णकविसोदरः होसदुर्गं वेदान्ताचार्यः

एतस्य जीवनचरितविशेषाः 'गोलकोण्ड-कवुल-सञ्चिका' इति ग्रन्थे उपलभ्यन्ते। जन्मस्थानं महबूबनगरजिल्लास्थं वनपर्त्ति संस्थानम्। गद्वालसंस्थानस्य धर्माधिकारी। जननम् शा.श. 1764 संवत्सरे (खिस्ताब्दः 1842) शुभकृत्संवत्सरे माघमासे शु. 5 नवतिवर्षदेशीय आसीदिति। भावसंवत्सरे श्रावणमासे 3 (तृतीयायां) परमपदम् अलञ्चकार। (अयं क्रि.श. 1932 तमे वर्षे परमपदम् अलञ्चकार इति ज्ञायते।) रचनाः **श्रीकृष्णब्रह्मतन्त्रार्य वेदपादस्तवः** मुद्रितः[16], **आचार्यवैभवादुलु** अमुद्रिता रचना।

---

[14] श्री.वि.च.5. 118,119

[15] श्री.च5.120, 121, 122, 123, 124 , 125

[16] वेदान्ताचार्यविरचितोऽयं स्तवः गोलकोण्डकुवुलसञ्चिकायां मुद्रितः।

In Public domain. Digitization Muthulakshmi Research Academy

5 वेङ्कटाचार्यः – अग्रजः

6 कृष्णार्यः – द्वितीयपुत्रः रचयिता

7 वेदान्ताचार्यः अनुजः

8 होसदुर्गं श्रीनिवासराघवाचार्यः पुत्रः – न्यायव्याकरण-
वेदान्तज्यौतिषवैद्यशास्त्रज्ञः

9 मातुलः – रङ्गनाथः

10 श्रीनिवासार्यः-मातृष्वसेयः प्यापलिनिवासी
रङ्गाम्बाबोज्जिकृष्णदम्पत्योः पुत्रः

11 श्रीरङ्गार्यः नृसिंहः तातार्यः(पिता)-गुरवः

12 प्यापलीग्रामनिवासी-कोण्डमार्यः-व्याकरणशास्त्रगुरुः

13 बुच्चि स्त्रीवेङ्कटार्यः-सुरपुरमहाराजवेंकटभूपगुरुः
तस्याः पतिः बोज्जिकृष्णः प्यापलीग्रामवासिनौ)

14 पुराणं दीक्षिताचार्यः-गद्वालास्थानकविः

श्रीवासब्रह्मतन्त्रादिमपदपरकालार्यवर्यानघाङ्घ्रि
द्वन्द्वाब्जानुग्रहात्तप्रतिपदविविधग्रन्थनिर्माणशक्तिः।
सङ्ख्यावान् **कृष्णनामा सरसकविघटासार्वभौमो** व्यतानी-
च्छ्रीमत्प्रत्यग्रदुर्गस्थितिरतिललितं सर्वभव्यं सुकाव्यम्।।

श्रीमत्सवायिराजाबहदरुबहिरीत्यादिचिह्नाङ्कितस्य
श्रीसीतारामभूमीपतिमकुटमणेर्मुक्कराख्यान्वयेन्दोः।
सभ्यास्सर्वे समेतास्समदगजमिहारोप्य सञ्चार्य वीथ्यां

In Public domain. Digitization Muthulakshmi Research Academy

हर्षाद्यं तूर्यघोषैस्समदकविघटाघण्डभेरुण्डमाख्यन्[14](म्)।।

इति **श्रीमच्छ्रीनिवासब्रह्मतन्त्रपरकालगुरुवर**करुणाकटाक्ष-समासादित निरवद्यकविता-प्रतिभाभासुरस्य श्रीमच्छ्रीशैलघनगिरि-प्रत्यग्रदुर्ग **तातार्यवर्यद्वैतीयीकनन्दनस्य** साहितीज्यौतिष-**पारदृश्व-वेङ्कटाचार्य वर्यानुजन्मनश्श्रीमदुक्कलश्रीवत्सवंशरामार्यानन्ताम्बा-दौहित्रस्य श्रीकृष्णकवि-सार्वभौमस्य** एतद्ग्रन्थनिशमनावसरात्मकूरु-**पुराधिप सीतारामभूपालास्थानकविव्रजप्रदत्तसमदकविघटागण्ड-भेरुण्ड बिरुदस्य** कृतिषु श्रीनिवासविलासाख्यश्चम्पूप्रबन्धो **दशमः** श्रीश्रीनिवासपरब्रह्मणे नमः[15]।

कृष्णकविसोदरः होसदुर्गं वेदान्ताचार्यः

एतस्य जीवनचरितविशेषाः 'गोलकोण्ड-कवुल-सञ्चिका' इति ग्रन्थे उपलभ्यन्ते। जन्मस्थानं महबूबनगरजिल्लास्थं वनपर्त्ति संस्थानम्। गद्वालसंस्थानस्य धर्माधिकारी। जननम् शा.श. 1764 संवत्सरे (ख्रिस्ताब्दः 1842) शुभकृत्संवत्सरे माघमासे शु. 5 नवतिवर्षदेशीय आसीदिति। भावसंवत्सरे श्रावणमासे 3 (तृतीयायां) परमपदम् अलञ्चकार। (अयं क्रि.श. 1932 तमे वर्षे परमपदम् अलञ्चकार इति ज्ञायते।) रचनाः **श्रीकृष्णब्रह्मतन्त्रार्य वेदपादस्तवः** मुद्रितः[16], **आचार्यवैभवादुलु** अमुद्रिता रचना।

---

[14] श्री.वि.च.5. 118,119

[15] श्री.च5.120, 121, 122, 123, 124 , 125

[16] वेदान्ताचार्यविरचितोऽयं स्तवः गोलकोण्डकुवुलसञ्चिकायां मुद्रितः।

In Public domain. Digitization Muthulakshmi Research Academy

कृष्णकविपुत्रः होसदुर्गं श्रीनिवासराघवाचार्यः

कृष्णकविकृतिषु अस्य उल्लेखो नास्ति। संस्कृतसाहित्य चरित्रसम्बद्धग्रन्थेषु कृष्णकविपुत्रोल्लेखः दृश्यते। तदनुसारं कृष्णकविपुत्रविवरणमत्र प्रस्तूयते। अस्य जन्मस्थानं महबूब नगरस्थ-वनपर्तिसंस्थानम्। प्रजोत्पत्तिकार्तिकबहुले षष्ठितमे वयसि दिवङ्गतः। वीरराघवीयभूमिका, आचार्यवैभवम्, स्वभावपद्धतिश्च अस्य रचनाः।

आध्यात्मिकगुरुः

श्रीमच्छ्रीसज्जयार्यः स्वविद्यागुरुरिति कविरुल्लिलेख। श्रीमत्परकाल गुरुः आध्यात्मिकगुरुरिति ज्ञायते। **श्रीमत्परकाल गुरुविजयः** इति प्रबन्धोऽपि कविना रचितः।

श्रीमच्छ्रीसज्जयार्याभिधगुरुणा प्राप्तविद्याविलासः[17]।

श्रीमत्परकालगुरुविजयाद्यनेकप्रबन्धरचनधुरन्धरेण....कृष्णार्येण कारितः श्रीनिवासविलासचम्पूः[18]।

समकालिककविपण्डिताः

तिरुमलश्रीबुक्कपुरी श्रीश्रीनिवासार्यः

कविरयं सुरपुरसंस्थानस्थः आसीत्। कालः शालिवाहनशकः 1730 (1808 ख्रिस्ताब्दः) 24000 श्लोकात्मकः तत्त्वमार्ताण्डः, नयद्युमणिः, गुणमीमांसा, सिद्धान्तचिन्तामणिः,

---

[17] श्री.वि. 5.22

[18] श्री.वि. 1

In Public domain. Digitization Muthulakshmi Research Academy

उपसंहारविजयपराजयः, ज्ञानरत्नप्रकाशिका, चतुस्सूत्री, त्रय्यन्त घण्टाथः, दुरुपदेशाधिक्कारः, रहस्यत्रयसारगाथाव्याख्या, दत्तरत्न प्रदीपिका, ग्रहणभुक्तिदीपिका, श्रीजयन्तीनिर्णयश्च अस्य रचनाः। कृष्णकविः श्रीनिवासार्यस्य तत्त्वमार्ताण्डस्य उल्लेखमकोरत्।

बुच्चि श्रीवेङ्कटार्यः सुरुपुरास्थानकविः

खिस्ताब्दः 1700 कवेः कालः। सुरपुरसंस्थानास्थान कविः। महान् विद्वान्। चतुश्शास्त्रपारीणः। 75 तमे वयसि दिवङ्गतः। वेदान्तकारिकावलिः, अभिनवश्रृङ्गाररसमञ्जरीभाणः, कल्याणपुरञ्चन नाटकं, श्रृङ्गारसर्वस्वम् इत्यादयः कृतयः कविकृताः। श्रीबुक्कपुर्यन्वयसम्भवः बुच्चि श्रीवेङ्कटार्यः। श्रीनिवासार्यस्य नप्ता रङ्गनाथार्यः। रङ्गनाथार्यस्य तनुज एव बुच्चिवेङ्कटार्यः। सः शाब्दिकः कार्यवेत्ता च[19]।

पुराणं दीक्षिताचार्यः गद्वालास्थानकविः

श्रीनिवासविलसचम्पूप्रबन्धान्ते कृष्णकविः पुराणं दीक्षिताचार्यं प्रशशंस। गद्वालसंस्थानस्थ पुल्लगुम्मिग्रामवासी अयं कविः 1894 खिस्ताब्दिपर्यन्तं जीवितवानिति ज्ञायते। जननम् शा.श 1744 (खिस्ताब्दः 1822) मरणम् शा.श. 1791 (खिस्ताब्दः 1869) अस्य कवेः रामचम्पूः, छन्दोमुकुरः इति संस्कृतरचनाद्वयं, रामनृपकरणपूरणम्, केशवसुप्रभातम् काव्योत्कर्षः इति अमुद्रितरचनात्रयञ्च स्तः। गद्वालसंस्थानप्रभोः

---

[19] श्री.वि. 126

In Public domain. Digitization Muthulakshmi Research Academy

रामभूपालस्य विद्यागुरुः। साहित्यविद्वन्मणिबिरुदाञ्चितः[20]। बुच्चि वेङ्कटाचार्यस्य पुराणं दीक्षिताचार्यस्य प्रशंसापात्रतां गतः मदीयः श्रीनिवासविलासचम्पूप्रबन्धः इति कृष्णकविः स्वप्रबन्धस्य महत्त्वं प्रकटीचकार[21]।

संस्थानानि – सम्माननानि-

तेलङ्गाणाराज्ये विद्यमानानि प्रमुखसंस्थानानि यानि आन्ध्रसंस्थानमुलु – साहित्यपोषणमु इति ग्रन्थे उल्लिखितानि -

1. गद्वालजनपदस्थं गद्वालसंस्थानम्
2. वनपर्तिजनपदस्थं वनपर्तिसंस्थानम्
3. नागरकर्नूलुजनपदस्थं जटप्रोलुसंस्थानम्
4. कामारेड्डिजनपदस्थं दोमकोण्डसंस्थानम्
5. अमरचिन्त अथवा आत्मकूरुसंस्थानम्
6. वनपर्तिजनपदस्थं पापन्नपेटसंस्थानम्
7. आनेङ्गन्दि (स्वातन्त्र्यप्राप्तेः पूर्वं नैजामराज्यान्तर्गतं संस्थानम्)

आनेङ्गुदिपालकस्य तिरुमलनृपतेः वनपर्तिसंस्थानस्य रामेश्वरनृपतेः आत्मकूरुसंस्थानस्य मुक्करवंशभूपालस्य श्रीसीतारामस्य आस्थाने प्राप्तसन्मानवृत्तिरिति स्वयं कविः उल्लिखितवान्। रघुनाथविजय प्रबन्धरचनापरिशीलनेन ज्ञायते यत् कृष्णकविः महाराष्ट्रस्थ विञ्चूरपुरपालकानामपि सत्कारं प्राप्नोत्[22]।

---

[20] श्री. वि च 127, 128, 130
[21] ibid
[22] र वि च 20-25

In Public domain. Digitization Muthulakshmi Research Academy

बिरुदानि

विद्वत्कविः कवीन्द्रः कविसार्वभौमः समदकविघटागण्ड भेरुण्डः इति बिरुदाञ्चितः कृष्णकविः। श्रीनिवासविलास चम्पूप्रबन्धस्य निशमनावसरे आत्मकूरु पूराधिपस्य सीतारामभूपालस्य आस्थानकविगणेन समदकविघटा गण्डभेरुण्डबिरुदः प्रदत्तः। बिरुदप्रदानात्पूर्वं गजारोहणेनापि कविः सत्कृतः इति वर्णितम्[23]।

परश्शतग्रन्थकर्त्ता – नवदुर्गं कृष्णकविः

गोलकोण्ड-कवुलसञ्चिकानुसारं कृष्णकवेः मुद्रितामुद्रित ग्रन्थानां विवरणं प्रस्तूयते। श्रीपरकालविजयः, उत्तरपरकालगुरु विजयः, रामेश्वरविजयः, रघुनाथविजयः, श्रीनिवासविलासः, रङ्गराजविलासः, नृसिंहविलासः, मदनगोपालमाहात्म्यम्, कार्तिकोत्सवदीपिका, केशवोत्सवमालिका, श्रीलक्ष्मीसहस्त्रम्, रसास्वादिनी, आचार्यवेद पादस्तवव्याख्यानम्, नवरत्नहारस्तव व्याख्यानम्, काव्योत्कर्षरक्षा, सरस्वतीमूलधनम्, श्रीकृष्णजयन्ती पौर्वापर्यनिर्णयः, शिष्टसिद्धान्तपद्धतिः, शूद्राशीर्निर्णयः, कर्तृक्रम निर्णयः, स्वयंव्यक्तप्रतिष्ठानिर्णयः, अधिकमासोत्सवनिर्णयः, सोदर कन्याद्वयविवाहनिर्णयः, अतिक्रान्तश्राद्धकालनिर्णयः, विवाहकाल निर्णयः, प्रसन्नाभरणम्, अलङ्कारमणिहारः, वृत्तिमुक्ताहारस्तुति

---

[23] र.वि. 5. 23,24

In Public domain. Digitization Muthulakshmi Research Academy

व्याख्यानम्, विजयदशमीनिर्णयः, नूतनोपाकर्मनिर्णयः, सुभद्रा परिणयः विक्रान्त राघवम्, उन्मत्तपाण्डवञ्च।

स्तोत्राणि

प्रसन्नान्दस्तवः, प्रसन्नामृतस्तवः, श्रीरामवेदपादस्तवः, श्रीनिवासवेदपादस्तवः, देशिकेन्द्रवेदपादस्तवः, आचार्यवेदपाद स्तवः, नवरत्नहारस्तवः, चपेटाहतिस्तुतिः, श्रीरामसुप्रभातम्, श्रीहयग्रीवसुप्रभातम्, श्रीगोपालसुप्रभातम्, श्रीरङ्गनाथसुप्रभातम्, सूर्यदण्डकम्, आचार्यगद्यम्, वेदान्तदेशिकसुप्रभातम्, श्रीहयग्रीव पञ्चरत्नस्तवः, श्रीलक्ष्मीपञ्चरत्नस्तवः, श्रीनारायणाष्टकम्, श्रीसम्पत्कुमाराष्टकम्, श्रीरामाष्टकम्, पञ्चायुधस्तोत्रम्, श्रीनावास नवरत्नमाला, लक्ष्मीनवरत्नमाला, अलङ्करणमालिका, कावेरीलहरी स्तुतिः प्रसन्नसौभाग्यम् वृत्तमुक्ताहारस्तुतिः नेत्रोल्लासः धर्मानुशासनम् आळवन्दारस्तोत्रम् जितं ते स्तोत्रम् चामराजेन्द्राशीर्नवरत्नमालिका ।

विभिन्नग्रन्थाः

आह्निकरत्नम्, श्रीमद्भागवतसप्ताहाह्वानपत्रिका, नव्योपाकर्मनिर्णयः, मेघमाला, समयामृतम्, सूर्योपरागदर्पणः, राजवंशरत्नावलिः, कल्याणगीतमञ्जरी, उत्तररङ्गमहात्म्यम्, मदनगोपालमाहात्म्यम्, श्रीरामायणवैभवम्, आराधनक्रमः, स्वस्तिवाचनम्, श्रीपरकालश्रीमठशिलाशासनश्लोकावलिः, उत्तररङ्गनाथाध्ययनोत्सवमण्डपशिलाशासनम्, उत्तररङ्गनाथमहाद्वारगोपुरशिलाशासनश्लोकावलिः, शङ्कराम्बासमुद्रशिलाशासनश्लोकावलिः, शम्भु-

In Public domain. Digitization Muthulakshmi Research Academy

रहस्यम्, श्रीनिवास-सुप्रभातम्, ऐकोद्दिष्टद्यन्नभोक्तृप्रायश्चित्तादि-निर्णयः, श्रीशरदम्बुजमाला, श्रीसर्वर्तुकुसुममाला, श्रीरामचन्द्र-मङ्गलमालिका श्रीदशावतारस्तुतिः, श्रीमज्जार्जिचक्रवर्त्या-शीर्मालिका तिरुपति वेङ्कटेश्वरगोविन्दनामानि च।

श्रीनिवासविलासचम्पूप्रबन्धः

श्रीनिवासविलासचम्पूप्रबन्धस्य रचयिता नवदुर्गं (होसदुर्गं) कृष्णमाचार्यः वनपर्त्तिसंस्थानास्थानकविः। वनपर्त्तिसंस्थानस्थं श्रीरङ्गापुरं उत्तररङ्गमहात्म्यम् इति काव्ये जटप्रोलुसंस्थानस्थं मदनगोपालदेवालयं मदनगोपालमाहात्म्यम् इति काव्ये गद्वाल संस्थानस्थकार्तिकोत्सवमधिकृत्य कार्तिकोत्सवदीपिका इति काव्ये आत्मकूरुसंस्थानस्थं कुरुमूर्तिदेवालयमधिकृत्य श्रीनिवासविलासम् इति काव्ये सिङ्गवटं नृसिंहपुराणम् इति कृतौ च महबूबनगर जनपदस्थदिव्यक्षेत्राणि क्षेत्रपुराणानि च संस्कृतेन वर्णितवान् कृष्णकविः। रघुनाथविजयचम्पूप्रबन्धे अपि विंशत्यधिकदिव्य क्षेत्राणि कविना वर्णितानि। दिव्यक्षेत्रपुराणवर्णनपरकेषु प्रबन्धेषु श्रीनिवासविलासचम्पूप्रबन्धः अन्यतमोऽस्ति।

रचनाकालः -

शा.श.1787 ग्रीष्मऋतुः शुक्लपक्षः प्रथमदिवसः (खिस्ताब्दः1865) इति कविना काव्यान्ते वर्णितम्[24]।

---

[24] श्री.च.5. 131s

In Public domain. Digitization Muthulakshmi Research Academy

आन्ध्रपद्यानुवादः-

आत्मकूरुपुराधिपसीतारामभूपालस्य आज्ञया तिरुपतिवेङ्कटकवी अस्य काव्यस्य आन्ध्रपद्यानुवादं शालिवाहन शकाब्दे हेमलम्बि वत्सरे 1897 ख्रिस्ताब्दे चक्रतुः।

प्रबन्धस्वरूपम्

पञ्चोल्लासान्वितः श्रीनिवासविलासचम्पूप्रबन्धः।

प्रथमोल्लासः - 66 श्लोकाः 03 गद्यानि – 69

द्वितीयोल्लासः – 93 श्लोकाः 05 गद्यानि – 98

तृतीयोल्लासः – 83 श्लोकाः 05 गद्यानि – 88

चतुर्थोल्लासः – 65 श्लोकाः 05 गद्यानि – 70

पञ्चमोल्लासः – 132 श्लोकाः 0 गद्यम् – 132

आहत्य 439 श्लोकाः 21 गद्यानि च अस्मिन् प्रबन्धे सन्ति ।

कथावस्तु – कूरुमूर्तिदेवालयस्य पादुकोत्सवस्य च वर्णनम्

कृतिकर्त्ता कृष्णार्यः

काव्यारम्भे कृष्णकविः काव्यस्य विवरणं प्रादात् यत् निज कुलदैवतश्रीनिवासविषये आत्मकूरुसंस्थानाधीश्वरेण मुक्कर सोम भूपालनन्दन श्रीसीतारामभूपालमणिना कृष्णार्येण कारितः श्रीनिवासविलासचम्पूप्रबन्धः।

प्रथममुद्रणम्

श्रीसीतारामभूपालस्याज्ञयैव चन्नपुर्यां विद्यमानायां सरस्वतीनिलयाख्ययां स्वकीयमुद्राक्षरशालायां ख्रिस्ताब्दे 1867 तिरुवेङ्गडाचार्येण वं.रामकृष्णमाचार्येण च प्रबन्धोऽयं मुद्रापितः।

In Public domain. Digitization Muthulakshmi Research Academy

आत्मकूरुसंस्थानचरितम्

आत्मकूरुसंस्थानं महबूबुनगरजनपदे अन्तर्भवति। नैजाम राज्यस्य पुरातनसंस्थानेषु अन्यतममस्ति। पूर्वं अमरचिन्ता वर्धमानु चेति 'परगण'द्वयमास्ताम्। तिप्पुडम्पल्ली प्रथमा राजधानी आसीत्। अनन्तरं आत्मकूरुः राजधानीत्वेन कल्पिता। कृष्णानद्याः उभयतः आत्मकूरुसंस्थानं गद्वालसंस्थानञ्च विद्येते।

मुक्करवंशमूलपुरुषः - गोपालरेड्डिः 1214

आत्मकूरुसंस्थानस्य पालकाः पाकनाटिरेड्डि इति ख्याताः। मुक्कर इति वंशस्य पुरुषाः। गोपालरेड्डिः इति शासकः वंशमूलपुरुषः। एषः आदौ तिरुपतिस्थचन्द्रगिरिपत्तननिवासी आसीत्। काकतीयचक्रवर्तिनां सामन्तप्रभुः गोनबुद्धारेड्डिः सपरिवारं तिरुपतियात्रां यदा चकार तदा गोपालरेड्डिः तं सश्रद्धम् असेवत। तेन अतीव प्रसन्नः गोनबुद्धारेड्डिः गोपालरेड्डिं स्वराजधानीं प्रति 1214 शा.श. (खिस्ताब्दे 1292) समाह्वयत्। तस्मै मक्तल-नाडगौडपदं प्रदाय सम्मानयामास।

मुक्करान्वये पञ्चविंशतिः पुरुषाः(25 descendents) सन्ति। प्रमुखानां भूपालानां वर्णनमेवात्र सङ्क्षेपेण प्रस्तूयते।

चिन्नगोपिरेड्डिभूपालः

गोपालरेड्डिभूपालस्य पुत्रः चिन्नगोपिरेड्डिभूपालः संस्थानस्य विस्तरणं चकार। अयं शा.श 1285 (1363) 5 परगणान् पञ्चमहलतालुकां सर्नाडगौडिवतन् काटभूपतेः सनदद्वारा (उत्तराधिकारिप्रमाणपत्रद्वारा) प्राप्तोत्। खिस्ताब्दे 1304 तमे वर्षे

In Public domain. Digitization Muthulakshmi Research Academy

प्रतापरुद्रं तुग्लकपुत्रः पराजितवान्। ततः बहमनीराज्यस्थापन मभूत्। तदा अल्लावुद्दीन् हसन् गङ्गूबहमनीसुलतानं प्रति राजारामः नामकः कश्चित् विरोधं प्रकटीचकार। गोपिरेड्डिभूपालः तं निग्रहीतुं नियुक्तः। कार्यसफलाय गोपिरेड्डिभूपालाय फिरोजुगढसम्बद्धः सर्वकारः मुजफरनगरपरगणे कडेचूरुनामके प्रदेशे च नाडगौडुसर्नाडगौडुदेशमुखीदेशपाण्डागिरिदेशायिगिरीत्यादिकररू पशुल्कं स्वीकर्तुं सनदद्वारा (आधिकारिकपत्रद्वारा) अर्हः जातः।

तृतीयः पुरुषः - चन्द्रारेड्डिः 1350 - कुरुमूर्तिदेवालयस्य निर्माता

तस्य पुत्रः चन्द्रारेड्डिः 35 वर्षाणि यावत् शासनं चकार। चन्द्रारेड्डिभूपाल एव स्वशासनकाले कुरुमूर्तिदेवालयस्य निर्माणं चकार। चन्द्रारेड्डिभूपालस्य अनन्तरं ये भूपालाः शासनं चक्रुः ते सर्वेऽपि देवालयस्य अभिवृद्धिं चक्रुः।

22 पुरुषः- राजावेङ्कटरेड्डिः - ख्रिस्ताब्दः 1810-1840

कुरुमतिदेवालयस्याभिवृद्धये राजावेङ्कटरेड्डिः महत्त्वपूर्णं योगदानं चकार इति इतिहासविदः वदन्ति। तस्य शासनकाले एव अत्रत्यः आञ्जनेयस्वामिदेवालयः निर्मितः।

23 पुरुषः- राजासोमभूपालरावः

राजासोमभूपालरावस्य पितामहस्य पेद्दवेङ्कटरेड्डिभूपालस्य शासनकाले आत्मकूरुः राजधानीरूपेण विहितः। तिरुपतिक्षेत्रवत् कुरुमतिगिरिरपि सप्तशैलान्वित इति प्रथितोऽस्ति। शेषाद्रिः एकाद्रिः भल्लूकाद्रिः देवताद्रिः घनाद्रिः पतकाद्रिः कोटाद्रिश्चेति। पालमूरुजिल्लायां आत्मकूरुसंस्थाने चिन्नचिन्तकुण्टमण्डले

In Public domain. Digitization Muthulakshmi Research Academy

अम्मापुरग्रामनिकटे देवताद्रिगिरौ काञ्चनगुहाम् अधिष्ठितः श्रीनिवासः इति स्थलपुराणं श्रूयते। असफजाहिनासिरुद्धवौला शासनकालीनः (1794-1857) आत्मकूरुसंस्थानशासकः मुक्करान्वयः राजासोमभूपालरावः कुरुगिरिस्थदेवालयं प्राप्तुं सोपानपङ्क्तिं निर्माय पादुकास्वीकरणमहोत्सवाचरणस्य सम्प्रदायम् आरब्धवानिति श्रूयते। राजासोमभूपालरावस्य पुत्र एव राजासीतारामभूपालरावः।

24 पुरुषः- राजा सीतारामभूपालरावः (जननम् 1851-1852 मरणम् 1905-1906)

सवायिराजासीतारामभूपालरावबलवन्तबहदरुपालकः विरोधिकृत्संवत्सरे आश्वयुजबहुलपञ्चम्यां लब्धजनिः। आजानुबाहुः गम्भीराकृतिः वीराग्रेसरः कुशलः शासकश्च। अश्वविद्याकुशलः युद्धविद्याकुशलश्च। व्याघ्राणाम् आखेटे निपुणः। स्वशासनकाले जलकुल्याव्यवस्थां कल्पितवान्। जनन्याः आज्ञया लक्षं रूप्यकाणि व्ययीकृत्य नवदशवर्षीयः राजासीतारामभूपालरावः शुक्लसंवत्सरे महासप्ताहं विरचय्य स्ववंशस्य स्वसंस्थानस्य कीर्तिपताकम् वियदङ्गणे प्रतिष्ठापितवान्। विद्वद्गोष्ठीः विद्वत्सम्माननानि च कृत्वा आत्मकूरुसंस्थाने तेभ्यः आश्रयं कल्पितवान्। राजर्षितुल्यः राजा सीतारामभूपालरावः स्वजीवनकाले एव विश्वावसुसंवत्सरे कार्तिक बहुलसप्तम्यां स्वपुत्राय राजाश्रीरामभूपालाय पट्टाभिषेकं विरचय्य राज्यभारं प्रादात्। तस्मिन्नेव वर्षे कार्तिकबहुलनवम्यां दिवं ययौ। राजा सीतारामभूपालरावः कुरुमूर्तिदेवालये पादुकामहोत्सवं

In Public domain. Digitization Muthulakshmi Research Academy

विरचय्य तद्वैशिष्ट्यं ग्रन्थस्थं कर्तुं कृष्णकविं प्रार्थयत्। तदा श्रीनिवास विलासचम्पूप्रबन्धः खिस्ताब्दे 1865 विरचितः।

25 राजा श्रीरामभूपालरावः

जननम् खिस्ताब्दः 1888 – मरणम् खिस्ताब्दः 1930

रामलक्ष्मम्माराजासीतारामभूपालयोः पुत्रः श्रीरामभूपालः शा.श. 1810 (खिस्ताब्दे 1888) सर्वधारिसंवत्सरे अधिकचैत्रशुक्लपञ्चम्यां वृश्चिकलग्नेलब्धजनिः। महानुभावोयमान्ध्र-आङ्ग्लफार्सीभाषानिष्णातः गुणगणसम्पन्नः। प्रमोदूतसंवत्सरे वैशाखबहुलामावास्यायां परलोकं प्राप्तः। श्रीरामभूपालः (1870-1878) पादुकामण्डपं कल्पितवान्।

राज्ञी भाग्यलक्ष्मम्मा (जननम् 1891 शासनकालः 1934)

राणी बहदर भाग्यलक्ष्मम्मा दोमकोण्डसंस्थानधीशस्य जस्वन्तस्य पुत्री। माता रङ्गमाम्बा। खरसंवत्सरे आश्वयुजशुक्लषष्ठ्यां वृषभलग्ने लब्धजनिः। पतिव्रता पुण्यशीला भाग्यलक्ष्मम्मा पत्या **राजाश्रीराम भूपालरावेण** सह दक्षिणयात्रां चकार। विद्याविनयसम्पन्ना इयं राणी पत्युः मरणानन्तरं हेच्.इ.हेच्.निजाम् उस्मानियापादुषानुग्रहेण खिस्ताब्दे 1934 भावसंवत्सरज्येष्ठ-शुक्लपूर्णिमायां अमरचिन्तात्म-कूरुसंस्थानसिंहासनमधिष्ठितवती। उदारमतिरियं गोलकोण्डकवुल सञ्चिकायाः मुद्रणे वित्तसाहाय्यम् आचरितवती। तिरुमलबुच्चि वेङ्कटाचार्यः जोश्यं वेङ्कटाचार्यः

In Public domain. Digitization Muthulakshmi Research Academy

राणीभाग्यलक्ष्मम्मायाः पद्यकवनेन स्तुतिं चक्रतुः[25]। तदनन्तरं भारतस्वातन्त्र्यसिद्धिपर्यन्तं राज्ञी भाग्यलक्ष्म्यम्बिका एव अमरचिन्तात्मकूरुसंस्थानं शशास। स्वातन्त्र्योत्तरकाले संस्थानानि भारतदेशे विलीनानि जातानि।

अमरचिन्तात्मकूरुसंस्थानम् – साहित्यपोषणम्

आत्मकूरु-गद्वाल-जटोप्रोलु-आनेङ्गोन्दी-वनपर्तिसंस्थानानि साहित्यपोषणरतान्यासन्। तेषु अन्यतमम् अमरचिन्तात्मकूरु संस्थानं प्रतिवर्षं फाल्गुनशुक्लपक्षे साहित्यसभाः शास्त्रगोष्ठीः कविगायकसम्मेलनानि नृत्यनाटकप्रदर्शनानि च भवन्ति स्म। कविपण्डितकलाकाराणां सत्कारः क्रियते स्म।

आत्मकूरुसंस्थानाधीशानां वंशावलिः

[25] गो.क.स.

In Public domain. Digitization Muthulakshmi Research Academy

- मुक्करगोपालरेड्डिः (मूलपुरुषः)
  - पेद्दगोपिरेड्डिः
  - चिन्नगोपिरेड्डिः
    - चन्द्रारेड्डिः (कुरुमूर्तिदेवालयनिर्माता)
    - रामकृष्णरेड्डिः
    - तिरुमलरावः
    - साहेबुरेड्डिः
      - द्वितीयः गोपिरेड्डिः
        - सर्वारेड्डिः
        - चिन्नरेड्डिदेशायि
        - सर्वारेड्डिः
        - प्रथमतिम्मारेड्डिः
        - प्रथमसाहेबुरेड्डिः
        - रङ्गारेड्डिः
        - गोपिरेड्डिः
        - द्वितीयः साहेबुरेड्डिः
        - बुक्कारेड्डिः
        - लक्ष्मारेड्डिः
        - शेषाद्रिरेड्डिः
        - तातारेड्डिः
        - द्वितीयः तिम्मारेड्डिः

In Public domain. Digitization Muthulakshmi Research Academy

सोमिरेड्डिः

पेद्दवेङ्कटरेड्डिः

चिन्नवेङ्कटरेड्डिः

बालकृष्णारेड्डिः

राजासोमभूपालरावः

राजासीतारामभूपालरावः
(श्रीनिवासविलासचम्पूप्रबन्धकारयिता)

राजा श्रीरामभूपालरावः

राज्ञी भाग्यलक्ष्म्यम्बिका

आत्मकूरास्थानकविपण्डिताः

सुरपुरं केशवय्यः –अस्य कालः ख्रिस्ताब्दः 1760। अस्य निरोष्ठ्यरामायणं प्रौढकाव्यम् आत्मकूरुसंस्थानाधीश्वराय श्रीराजासोमभूपालाय समर्पितम्।

तिरुमलबुक्कपत्तनं रङ्गाचार्यः – बालसरस्वतिबिरुदाञ्चितस्य तिरुमलबुक्कपत्तनं श्रीनिवासाचार्यस्य पितृव्यः। **गुणरत्नाकरः पद्मिनीपरिणयचम्पूः** इति संस्कृतरचनाः चकारायं कविः।

In Public domain. Digitization Muthulakshmi Research Academy

तिरुमलबुक्कपत्तनं श्रीनिवासाचार्यः(1863-1919)– तर्कतीर्थ बालसरस्वतीत्यादिबिरुदाञ्चितः आत्मकूरास्थानपण्डितः। शतघण्टाकवने अद्वितीयप्रतिभापाण्डित्यं प्रादर्शयत्। अयं कविः आशुकवितायां प्रतिभासम्पन्नः। आत्मकूरुसंस्थानाधि पतिना सम्मानितः। श्रीनिवासाचार्यः विशिष्टाद्वैतधर्मं प्रतिष्ठापकरूपेण प्रसिद्धिं गतः। इन्दोरु ग्वालियर-दर्भाङ्गा-धारानगरादिषु संस्थानेषु स्ववैदुष्यप्रदर्शनेन तत्तत्पालकानां प्रशंसापात्रतां गतः। संस्कृतप्राकृतान्ध्रभाषासु आशुकविताप्रदर्शनं चकारायं विद्वत्कविः। शतावधानिनौ तिरुपतिवेङ्कटकवी अनेन कविना साकं शास्त्रार्थं विहितवन्तौ। अस्य वैदुष्यकारणादेव तिरुपतिवेङ्कटकवी षण्मासपर्यन्तं प्रभुसत्कारं प्राप्तुं न शक्तवन्तौ। तिरुपतिवेङ्कटकवी स्वग्रन्थेपि अस्य कवेः उल्लेखमकुरुताम्। **जाम्बवतीपरिणयः तत्त्वमार्ताण्डप्रभामण्डलः दुर्मद निर्मथनम् नञ्चराजचम्पूः राजशेखरचरित्रम् सुरपुरवेङ्कट गुरुचरित्रम्** इत्यदीः कृतीः व्यरचयत्।

दीक्षितुलनरसिंहशास्त्री – महाकवि बिरुदाञ्चितः। **लक्ष्मण परिणयः विदुराश्वत्थमाहात्म्यम् श्रीरङ्गमहोत्सववर्ण मालिका सत्यनारायणव्रतकल्पम्** इत्यादयः अस्य कृतयः।

हारतिदीक्षाचार्यः- अलङ्कारमणिमाला आचार्यविंशतिः महान्तर्लाप मालेत्यादयः अस्य कृतयः।

लक्ष्मीसहस्रव्याख्याकर्ता अरिशाणपालं वेङ्कटाध्वरिः आशुकविताविशारदः जातकविद्वन्मणिः तिरुमलवेङ्कटाचार्यः

In Public domain. Digitization Muthulakshmi Research Academy

चेञ्चुनाटकहनुमच्छतकादिकाव्यकर्त्ता दीक्षितुलपापाशास्त्री व्याकरणवेदान्तशास्त्रविशारदः तिरुमलबुक्कपत्तनं बुच्चिवेङ्कटाचार्यः व्याकरणमीमांसावेदान्तादिशास्त्रपारीणः मुदिगोण्डनागलिङ्गशत्री तिरुमलबुक्कपत्तनं कृष्णदेशिकाचार्यः आत्मकूरुसंस्थानास्थानकविषु सुप्रथितास्सन्ति।

सीतारामभूपालस्य प्रार्थनया कृष्णकविः श्रीनिवासविलास चम्पूप्रबन्धं 1865 ख्रिस्ताब्दे व्यरचयत्। भूपालस्याज्ञयैव तिरुपतिवेङ्कटकवी अस्य प्रबन्धस्य आन्ध्रानुवादं चक्रतुः।

कार्यम्पूडिराजमन्नारुकविः (1846-1917) आत्मकूरु संस्थानीधशस्य प्रार्थनया श्रीसीतारामभूपालविलास इति काव्यं व्यरचयत्।

श्रीनिवासविलासचम्पूप्रबन्धः

सुप्रसिद्धश्रीवैष्णवक्षेत्रं कुरुमूर्तिदेवालयम् अधिष्ठितं कुरुमूर्तिं श्रीनिवासं पादुकोमहेत्सवञ्चाभिवर्णयन् कृष्णकविः प्रबन्धमेनं व्यरचयत्। स्वकृतिषु एषः प्रबन्धः दशम इति काव्यान्ते उल्लिखति कविः। कार्तिकमासे उत्सवोऽयं पाञ्चरात्रागमोक्तविधिना प्रचलति। कार्तिकशुद्धप्रतिपदः आरभ्य शुद्धसप्तमीपर्यन्तं उत्सवः प्रचलति। तदनु अपि मासं यावत् उत्सवः अनुवर्त्तते[26]।

---

[26] 'श्रीकृष्णकविसार्वभौमस्य.....श्रीनिवासविलासाख्यश्चम्पूप्रबन्धो दशमः'। श्री.च.5

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमोल्लासः

इष्टदेवतास्तुतिः, गुरुस्तुतिः, आत्मकूरुसंस्थानस्य संस्थानाधिपस्य च स्तुतिः, सचिवमुख्यस्य वेङ्कटरेड्डिवर्यस्य स्तुतिः, तिरुमलरायस्य, ततः वेङ्कटरायस्य प्रशंसावर्णनं, महीशूर(मैसूर्) पुरे, आनेङ्गोन्दिसंस्थाने, विद्यानगरसंस्थाने च कृष्णकवेः सम्माननानि, कुरुमूर्तिदेवालय स्थलपुराणम् इत्याद्यनेकविषयान् कविः वर्णितवान् अस्मिन् प्रथमोल्लासे।

द्वितीयोल्लासः

पूर्वजैः निर्मितेऽस्मिन् कुरुमूर्तिदेवालये सांवत्सरदिव्य पादुकास्वीकरणमहोत्सवाचरणं विदधाति स्म सीतारामभूपालः। शरदृतुवर्णनेन आरम्भः भवति। सांवत्सरदिव्यपादुका स्वीकरण महोत्सवसमयः सम्प्राप्त इति श्रीहरेः सेनाधिपतिः विष्वक्सेनः भक्तजनान् सतर्कान् करोति। कार्तिकशुद्धपाड्यमिं आरभ्य दिनचतुष्टयं यावत् क्रियमाणाः उत्सवाः सेवाश्च शब्दालङ्कारभरितैः श्लोकैः गद्यैश्च वर्णिताः। कनकशिबिकाम् अधिरूढः श्रीनिवासः भक्तजनौघाय दिव्यदर्शनं प्रदाय अनुगृह्णाति[27]। दशमीवेदिकायां निषण्णः श्रीनिवासः पूजाः स्वीकरोति। तदनन्तरं गिरिगुहां देवः प्रविशतीति उत्सवक्रमं वर्णयति कविः[28]। कुरुमूर्तिगिरिदेवालयेन सह विविधजातीनाम् अनुबन्धः महत्त्वपूर्णः वर्त्तते।

---

[27] श्री.च.2.55,

[28] श्री.च.2.62

In Public domain. Digitization Muthulakshmi Research Academy

नानाजातिसम्बध्दाः जनाः श्रीनिवासोत्सवे प्रमुखपात्रं वहन्ति। तस्यापि उल्लेखः कविना कृतः।

राजासीतारामभूपालस्य पूर्वजस्य राजावेङ्कटरेड्डिवर्यस्य (खिस्ताब्दः 1810-1840) स्वशासनकाले अत्रत्यः आञ्जनेयस्वामिदेवालयः निर्मितः। श्रीनिवासमहोत्सवे विभिन्न सेवासु हनुमद्वाहनसेवा अन्यतमा या द्वितीयदिने देवालये समाचर्यते। तस्मिन् प्रसङ्गे कविना हनूमतः वर्णनं कृतम्। चतुर्थ्यां सपर्याः स्वीकृत्य दशमीवेदिकायां श्रीनिवासः यथापूर्वं कन्दरां प्रविवेश[29]। एवमत्र कुरुमूर्तिदेवालयस्य पादुकामहोत्सवम्, हनुमन्महोत्सवं चावर्णयत् कविः।

तृतीयोल्लासः

अम्बापुरम् लोकभाषया अम्मापुरमिति व्यवह्रियते। प्राचीनपालमूरुजिल्लायां आत्मकूरुसंस्थाने चिन्नचिन्तकुण्डमण्डले अम्मापुरग्रामनिकटे देवताद्रौ काञ्चनगुहाम् अधिष्ठितस्य श्रीनिवासस्य महोत्सवे भक्ताः लक्षशः समागच्छन्ति। भक्तजनानां कृते आत्मकूरुसंस्थानाधीशाः अन्नदानसत्राणि निर्वहन्ति स्म।

तृतीयोल्लासे राजासीतारामभूपालस्य आज्ञया पुरुषोत्तम रायसंज्ञकस्य आध्यक्षे अन्नदानसत्रम् अम्बापुरे रचितम्। अस्य अन्नदानसत्रस्य सुविपुलं वर्णनं सहृदयपाठकचेतोहारि वर्त्तते। **यात्रावर्णनम्-** राजासीतारामभूपालः निजभवनतः मन्त्रिणा

---

[29] श्री.च.2.92

In Public domain. Digitization Muthulakshmi Research Academy

वेङ्कटरेड्डिवर्येण सह गजारोहणं कृत्वा उत्सवे भागग्रहणाय प्रस्थितः[30]। यात्रागमनमार्गः गोमयलेपनेन रङ्गवल्लीभिश्च अलङ्कृत आसीत् इति वर्णयति कविः[31]। पौरललनाः राजानं प्रेक्ष्य कीदृशीः लीलाः प्रदर्शयामुसुरिति हृद्यं वर्णनमत्र प्राप्यते। लाजाभिः भूपालं सम्मानितवत्यः[32]। ततः आत्मकूर् नगरं, श्री केशवस्वानिदेवालयं, मध्येमार्गं विद्यमानस्य आरामस्य शोभां वर्णयति कविः[33]। ततश्च परमेश्वरालयं[34] राजमन्दिरम् अम्बापुरम्[35] वर्णयति सः।

चतुर्थोल्लासः

पादुकोत्सवः अथवा उद्दालोत्सवः[36], नृत्यकार्यक्रमः[37], गरुडवाहनसेवा[38], हनुमद्देवालयः[39], श्रीमद्रामानुजाचार्यस्तुतिः[40] इत्यादीन् वर्णयति कविः अस्मिन् उल्लासे।

---

30 श्री.च.3.ग.3, श्री.च.3.15

31 श्री.च. 3.41

32 श्री.च.3.44

33 'श्री. च. 3. ग.

34 श्री.च.3.ग.

35 श्री.च.3.श्लो.76.78, 79

36 'श्री.च.4.ग

37 श्री.च.4.ग.1

38 श्री.च.4.4

39 'श्री.च.4.ग.

40 श्री.च.4.श्लो.37

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चमोल्लासः

द्वौ सादिनौ सीतारामभूपालमुपगत्य उत्सवार्थम् आगतं भक्तसङ्घवृत्तं निवेदयामासतुः। भक्ताः चूडाकर्मसंस्कारं रचयन्ति। पुष्करिणीतीर्थे निमज्जनं कुर्वन्ति। गोविन्दनाम भजन्तीत्यादिकं प्रस्तुवतः सादिनौ इत्यनेन पञ्चमोल्लासस्यारम्भो भवति। ततः कुट्टिममण्डपः[41] पादुकास्वीकरणमहोत्सवः[42] सप्तशैलेषु घनाद्रि-कनकाद्रि इत्यनयोः वर्णनम्,[43] व्याकरणसास्त्रप्रसङ्गः, अखण्डदीपः[44], गन्धकयन्त्रपिटकयुग्मम्, लक्ष्मीश्रीनिवाससंवादः[45], साप्ताहिकोत्सवः[46] इत्यादीन् वर्णयित्वा अन्त्ये कविपण्डितसम्माननं, कविवंशप्रशस्तिं च प्रास्तौत्।

---

41 श्री.च.5.11

42 तेलङ्गाणाराज्ये महबूबनगरे कार्तिकमासे प्रवर्तमाने श्रीनिवासमहोत्सवे पादुकास्वीकरणोत्सवः अत्यन्तं प्राधान्यं भजति। उद्दालोत्सवः इति लौकिकभाषागतव्यवहारः। पादुकाः उद्दालु इति तेलुगुभाषया व्यवह्रियते। वड्डेमान् इत्याख्ये (वर्धमानाख्ये) ग्रामे शूद्राः दिव्यपादुकानिर्माणं कुर्वन्ति। दीपावल्याः अमावास्याः आरभ्यः सप्ताहं यावत् सनियमं उपवासं कृत्वा धेनुचर्मणा पादुकानिर्माणं कुर्वन्ति भक्ताः। पल्लमर्रिग्रामीणाः मेदराख्यवर्गजनाः शूर्पान् रचयन्ति। तस्मिन् शूर्पयुगले दिव्यपादुके संस्थाप्य शोभायात्रां कृत्वा मण्डपनिकटम् आनयन्ति। पादुकसंस्थापनाय मण्डपं राजाश्रीरामभूपालः खिस्ताब्दे 1878 निर्मितवान्। अमरचिन्तात्मकूरुसंस्थानाधिपास्सर्वे कुरुमतिगिरिदेवालयस्य संरक्षणे उत्सवनिर्वहणे च महत्त्वपूर्णं योगदानं चक्रुः। तेलङ्गाणाराज्ये स च उत्सवः अद्यावधि निरवच्छिन्नं प्रचलतीति विशेषः। एरुकल-मेदरादिशूद्रवर्गजनानां प्राधान्यमस्मिन् देवालये दरीदृश्यते इति विशेषः। दिव्यपादुकास्पर्शनेन समस्ताघनिवारणं भवतीति विश्वसिति भक्तजनौघः।

43 श्री.च.5.ग.

44 श्री.च. 5.45श्लो.

45 श्री.च.5.74

46 श्री.च.5.श्लो.100

 In Public domain. Digitization Muthulakshmi Research Academy

कुरुमूर्त्युत्सवः (कुरुमूर्तिजातर)

तेलङ्गाणाराज्ये महब्बूबनगरजनपदे अम्मापुरग्रामनिकटे विद्यमाने कुरुमूर्तिदेवालये प्रतिवर्षं कार्तिकमासे कुरुमूर्त्युत्सवः (जातर) प्रचलति। कृष्णकविः कुरुमूर्त्युत्सवर्णनपरकेऽस्मिन् प्रबन्धे तेलङ्गाणाराज्यस्य दिव्यक्षेत्रान् संस्कृतिं सम्प्रदायान् आचारान् विशिष्य विभिन्नसंस्थानानाम् इतिहासं अक्षरबद्धं चकार। तादृशस्य महत्त्वपूर्णस्य श्रीनिवासविलासचम्पूप्रबन्धराजस्य पीठिकां रचयितुं प्रचोदितवद्भ्यः विद्वद्भ्यः संस्कृत अकाडमीनिदेशकेभ्यः प्रो. के. नीलकण्ठमहोदयेभ्यः कार्तज्ञ्यं निवेदयामि। श्रीनिवासविलास चम्पूप्रबन्धकर्तुः कृष्णकवेः जीवनचरितविशेषान् कृतिविशेषांश्च सुष्ठु बोधितवद्भ्यः पण्डितेभ्यः वैद्यं वेङ्कटेश्वराचार्युलुवर्येभ्यः कृतज्ञतामावेदयामि। मम शोधकर्मणि निस्तुलमुपकुर्वद्भ्यः सहोद्योगिभ्यः श्री के.वि.सूर्यप्रकाशवर्याय सन्तोषजोषिवर्याय च सस्नेहं कार्तज्ञ्यं समर्पयामि।

इति बुधजनविनीता
डॉ. के. वरलक्ष्मीः

In Public domain. Digitization Muthulakshmi Research Academy

आकरग्रन्थाः

1. 1. सुरवरं प्रतापरेड्डि गोलकोण्डकवुलसञ्चिका तेलङ्गाणाजागृति हैदराबाद 2009

2. कृष्णकविः श्रीरघुनाथविजयचम्पूः संस्कृत अकाडमी, उस्मानियाविश्वविद्यालयः हैदराबाद 2023

3. तूमाटि दोणप्पः आन्ध्रसंस्थानमुलु साहित्यपोषणमु आन्ध्रविश्वकलापरिषत् 1969

4. श्रीनिवासविलासमु तिरुपतिवेङ्कटकविविरचितम् 1897 https://archive.org/details/in.ernet.dli.2015.386867/page/n168/mode/1up

5.चित्रसङ्कलनम्
https://www.facebook.com/photo/?fbid=2881202832194810&set=g.137541958519407

6.चित्रसङ्कलनम्
https://www.facebook.com/profile.php?id=100022344934825



 In Public domain. Digitization Muthulakshmi Research Academy



अमरचिन्तात्मकूरुसंस्थानम्

अमरचिन्तात्मकूरुसंस्थानाधीश्वरः

श्रीमत्सवायिराजाबहदरबलवन्तबिरुदाङ्कितमुक्करसोमभूपालनन्दनः

श्रीसीतारामभूपालः

In Public domain. Digitization Muthulakshmi Research Academy

राजाश्रीरामभूपालरावः

 In Public domain. Digitization Muthulakshmi Research Academy



।।कुरुमूर्तिः श्रीनिवासः।।

In Public domain. Digitization Muthulakshmi Research Academy

शुभमस्तु

श्रीहयग्रीवाय नमः

श्री श्रीनिवासपरब्रह्मणे नमः

श्रीमते श्रीनिवास-ब्रह्मतन्त्र-परकालमहादेशिकाय नमः

अस्मद्गुरुभ्यो नमः

श्रीनिवासविलासे - प्रथमः उल्लासः

.....

लक्ष्म्याः प्राथमिकोपभोगललित प्रक्रान्तचाटूक्तिका
चातुर्यक्षणसम्मुखीनरभसव्यावृत्ततन्वा मनाक् ।
प्रौढैकस्तनकोटिघट्टनवशाज्ञातो दृढालिङ्गने
श्रीवत्सोऽवतु मां चिरात्किण इव श्री वेङ्कटाद्रीशितुः ॥१॥

येनाश्रितो धवलिमा येन कृतोऽभूद्विलोमतद्वाच्यः ।
ते पाञ्चजन्यचक्रे दधत्कुरुमतिक्षमाधरेशोऽव्यात् ॥२॥

चिरतरमिनबिम्बवासजाग्रद्गुरुतरतापविधूननाय नूनम् ।
शिशिरमधिवसत्सुधांशुबिम्बं तुरगमुखाभिधधामवन्दिषीय ॥३॥

शमितो वदावदो भुवि विलोमतद्वाच्य इव घनेन सदा ।
येन स गुरुर्विजयतां श्रीवासब्रह्मतन्त्रपरकालः ॥४॥

चिरमेधिषीष्ट स गुरुर्नाम्ना तातो ममापि तातो यः ॥
प्रतिलोमनिजाभिख्या वाच्या भुवि कीर्तयो यस्य ॥५॥

शरद्रविकरस्फुटाम्बुजमधूळिसेव्यैर्विय-
त्पनीपतदनीचनिर्जरधुनीविनीतिप्रदैः ।
वचोभिरवनौ जयानभजतेति यस्यानघाभिधैव-
कथयत्ययं दिशतु सञ्जयार्यश्रियम् ॥६॥
प्राचीनाः कृतयो लुठन्ति भुवने नव्याः कृतीर्लालये-
त्को वेति प्रलपन्तु मत्सरहृदो हीनाः कवित्वेन च ।

In Public domain. Digitization Muthulakshmi Research Academy

किं तेषां वचनं त्रयीनवनवान् ग्रन्थानुदारः कवि
र्ग्रथ्नात्येव मुदा कलङ्कितहृदस्ते सन्त्वसूयाभरात् ॥७॥

तादृशकविताभावात्सुकवेः कवितां विनिन्दतात्कुकविः ।
निन्दतु कुरूपजानिः परवनितां सुन्दरीं क्षतिः काऽस्याः ॥८॥

अतिसरसा अतिकठिना मध्या अपि सन्तु भुवि कृतौ श्लोकाः ।
को दोषोऽत्र पितामहसृष्टावेवास्ति बहुविधा रीतिः ॥९॥

मृदुलं वा कठिनं वा सरसं चेत्पद्यमादधाति मुदम् ।
रसिकस्याधरदलमिव कुचयुगमपि किं न मोदमावहति ॥१०॥

गुणबहुलेषु रसज्ञा ग्रन्थेष्वल्पं न दोषमीक्षन्ते ।
द्राक्षाचर्वणरसिको निष्ठीवति को नु तद्बीजम् ॥११॥

सरसकवितासर्वस्वज्ञैश्शिरस्पदलालिता
मधुरकविता तद्ग्रन्थास्वादनेऽति दवीयसाम् ।
धुरि न पदमाधत्तां मृद्वी नवा सुममालिका
शिरसि सुदृशां लाल्या हस्ते कपेरिव जात्वपि ॥१२॥

श्रुतमात्रा रसिकानां हृदयं तरलयति सत्कवेः फणितिः ।
तरुणीजनकलकाञ्चीझणझणितनिनादभङ्गीव ॥१३॥

रसिकांस्तरलयते भुवि यदृच्छयोक्तापि सुकविता कविना ।
लावण्यनिधिस्तरुणी त्यक्तविभूषापि ननु न कस्य मुदे ॥१४॥

निर्व्याजवत्सलहृदामुर्व्यां विगुणापि लाल्यतामेति ।
कृतिवर्याणां कृतिरियमति बालोक्तिर्हि लाल्यते सर्वैः ॥१५॥

गद्यम् ॥

इह खलु निखिलधरणीरमणीमणिरमणीयमहानीलमणीमौक्तिकहारायमाण
नीरावली सुभगम्भविष्णुकृष्णागोदावरीमध्यभागाध्यासीन सकलजनभोग्यभाग्यनगरदेश
भूकान्तावदनललन्तिकायमानात्मकूरु पुरदेशपरिपालनचातुर्यधुर्यस्य निखिलजनशर्माळि

In Public domain. Digitization Muthulakshmi Research Academy

निर्माणधर्मालङ्कर्मीणनिजानघभुजायुगनिरङ्कुश समङ्कुरत्प्रतापतपनोत्सङ्गरङ्गजनक-
वात्सल्यसङ्गतत्तुङ्गतरयमुनायमानग-गनाभोगस्य सन्ततन्तन्यमानदक्षिणबुधरक्षण
मुखसुकृतजनितक्षिराम्बुधिमाराहितहीरामृतधाराकनदैरावत सीरायुधतारामर चीराम्बराब्ज-
भवदारातितुङ्गनीहाराद्रिशरदुदितधाराधरावलिस्वाराजकरतुलितसारा-
युधाग्र्यमन्दारातिरुचिरतमधारालरुचिनिचयदोराहवाकलनधीराखिलावनिस्मेरात्म-
सत्कीर्तिराराजिताग्रकर्पूरातिपूरविमलीकृतनिजकलङ्क विलोकन समङ्कूरित हर्षोत्कर्ष-
निष्कलङ्कराजभावश्लाघनार्थ समवतीर्ण पूर्णकुमुद्वतीपरिबृढ़ामन्दसन्देहसन्दोहदोहन-
कुशलविशदातपत्रपरिष्कृतमकुटीतटीप्रकटीकृतनित्यसाम्राज्यवैभवस्य भूजार्गलनिरर्गल-
विनिर्गलत्प्रतापप्रभावविभावसुपरिभावितनिजमित्रमित्रावमानभेदसङ्कुचित-
तन्निवारणाभ्यर्थनार्थपुञ्जायमान कञ्जातकुट्मल भ्रमावहसमागतसामन्तक्षमाकान्त-
सन्ततिसन्ततमकुटतटसमुदञ्चिताञ्जलिपुञ्जविलोकनसम्माननाकलित प्रतिहारतति-
निवेदनवचननिशमनक्षणव्यावृत्तवदनचन्द्रस्य न्यक्कृतरिपुचक्रकनद्विक्रममदफक्किकशुभ-
मुक्करकुलकलशाम्बुधिचन्द्रस्य सुगुणावलिसान्द्रस्य श्रीमत्कुरुमुर्तिगिरिनिलयश्रीनिवास-
करुणाकटाक्षवीक्षणलब्धाखण्डसाम्राज्यनयविनयसौशील्यवात्सल्यमुखगुणगणैकता
नास्थानायितयोः कौसल्यादशरथसाम्यसीमासमारूढ़योः लक्ष्म्यम्बा सोमभूपालयो-
श्चिरन्तनानल्पसुकृतपरिपाककल्पतरोः परिपूर्णफलायमानस्य मानाधिककविजनक-
लितानघललिताद्भुतकवितालताविताननसमुन्मेषणस्सीतारामायितस्य सीता-रामाभिधस्य
भूपालमणेर्ललितगतितुरगततिपृथुतररथवरकरिकरभवृषभमहिषपरिचरणचणमनुजघन-
तरकनक मयदश मृगतनुरुहवसनमरकतकपरिखचित-रुचिररुचिघटितकटकथलथल-
दनुपमविविधमणिगणकवचित तरलतरलरुचिसरलसरलतरतरलमणिकनदविरलघृणि-
मसृणितबहुविधमणिसरविसरनिखिलपरिकरणनिकरभरितभवनसकलफलनिवह-
वितरणनिपुणधरणिकनदनुपमघनलसदुपवनशतमुखनिजनिरतिशयविभववितरण-
विवशितहृदय बुधसमुदयसमितिसततविरचितनवनवसरसिजसमुदयगलदसदृश-
मधुमदविदलनचणललितकवनवचनलहरिनिशमनजनितमितसितहसितलसितविमल-
निजवदनसितकिरणकिरणायमानापाङ्गभङ्गी विवशाङ्गीकृत कनकाङ्गीजन-
निचयाङ्गीकृतमङ्गलतरमृदङ्गनिनदसङ्गतसङ्गीत भङ्गीबहुविधारोहणावरोहणचातुरीश्रवण
समुदञ्चदमन्दानन्दसोमरोचिश्चामरोद्वीजनोद्वेल्लित भजवल्लि किङ्करीनिकरमन्दस्मितगर्भित

In Public domain. Digitization Muthulakshmi Research Academy
थलथलत्कपोलरुचिनिचयविलोकन सञ्जातलज्जावन-तवदनैरिवस्तम्भोपाग्रकीलितकालाय-सकीलघटितमूलघनतरतुलाधःप्रदेशाधो मुखाबद्धैर्मुकुरनिकरैः कामपि कान्तिमुद्वहन्त्यां ममैवाधिवसति मण्डलं भगवान् हिरण्मयवपुरिति निश्शङ्कमहङ्कृतिं भजति पङ्कजबान्धवे तदीयाधिक्यासहनतया द्वादशात्मनस्तस्मादपि वैशिष्ट्याकाङ्क्षयानेकधावतीर्यान्तर्मण्डलं भगवन्तं स्वर्ण-वर्णम्बिभ्राणेन तारकानिकरकोरकितोपान्तेन परिपूर्णचन्द्रमण्डलेनेव अन्त-स्समुज्वलत्प्रदीपकलिकेन स्फटिकमणिघुटिकाघटितसरविसरवलयितेनस्फाटिक-समुद्गक सहस्रेण सडिण्डीरखण्डमण्डलेन प्रतिबिम्बिताम्बरमणिबिम्बगर्भेण निर्भरमहाबुद्बुद-समुदयेन मेदुरीकृतमम्बुधिमिव तुलयन्त्यामास्थानसभायां बुद्धिसमृद्धिलताप्रतानाश्रय-कल्पवृक्षायमाणमनोभवमनोहरमूर्तिना राजनीति जनित चातुर्यधैर्यस्थैर्यस्फूर्तिना सकलजनगुणग्रहण परोपकारविख्यातसौजन्यपूर्तिना निर्धूतकलङ्काङ्कुरेण वेङ्कटरेड्डि समाख्येन शुभाभिख्येन सचिवमुख्येनाधिष्ठितवामपार्श्वं नीरन्ध्रतरान्ध्रकवितापुरन्ध्रि समालिङ्गनधुरन्धरमतिना कदाचिदप्य-नुन्मिषन्मत्सरतया सरसतरैकपद श्रवणेऽपि विवशीकृत हृदयेन तुङ्गतुरङ्गशिक्षाविचारधौरेयेण तिरुमलरायेण रमणीयदक्षिणभागं सुजनकार्यघटनचातुर्यवक्तृत्व विभूषितैर्वेङ्कटरायप्रभृतिभिरधिकृतजनैर्यथामर्यादं निषण्णै रमणीय प्रान्तमतिकान्तं साम्राज्यसिंहासनं कदाचिदधिरुढ़ेन तेन भूपालपरिवृढेन समर्यादमाहूतेन महीशूरपुराधीश्वरकृष्णराजसार्वभैमसभा सम्मानितनिजविरचित बहुतररसोत्तरङ्गितमङ्गलतररङ्गराजविलासाख्य चम्पूप्रबन्धस्वीकरणावसरश्रीमत्कर्णाट-मण्डलमण्डनायमानानेगोन्दिसमाख्या विख्यातहृद्यविद्यानगरसंस्थानाधीश्वरासेतुहैमाचल-विख्यात श्री वीरप्रतापनरपतिबिरुदाङ्कित श्रीमत्कृष्णदेवरायमान्यश्रीमदच्युतदेवराय कुलकलशपारावारसुरमहीरुहायमाण विमलमतितिरुमल देवरायनरपतितिलक सुन्दरचामरयुगान्दोलनरमणीयच्छत्रसमुल्लसत्कुम्भीश्वाराग्र सम्भृतकनक मण्डपारोहण-महोत्सवमर्यादापूर्वक वितीर्णबहुविधवृत्तिबहुमते बहुमते कविकुलसार्वभैमास्मत्कुलदैवत कुरुमूर्तिधराधरशिरोमणिश्रिनिवासमहोत्सववर्णनं तूर्णं विरचय्य प्रबन्धेनानन्दयास्मानिति दत्तानुज्ञेन ह्य एव रात्रौ तेनैव भगवताहमपि प्रबन्धमारचयेत्यनुशिष्टोऽस्मि करुणयेत्यभिधाय स्वप्रवृत्तान्तं सभक्तिहर्षपुलकं प्रत्यग्रदूर्गपुरकृतावसतिना तेन श्रीकृष्ण-कविना निर्मीयते खल्वयं श्रीनिवासविलासाख्यस्सहृद्यगद्यपद्यानुबन्धश्चम्पूप्रबन्धः ॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रीवासब्रह्मतन्त्राग्रिमपदपरकालार्यवर्याङ्घ्रिदीव्यै
क्तारुण्याधैर्नितान्तं कविकरटिघटास्फारसाम्राज्यभागे ।
धीमान्यस्सार्वभौमोऽयमिति विरचितानर्घपट्टाभिषेको
यज्ज्यायान् सर्वविद्या प्रचुरतरमतिर्वेङ्कटाचार्यवर्यः ॥१६॥

करुणाजलधे ध्रुवाय यद्वच्छिशवे वाचमदामुदात्युदार ।
कुरुमूर्तिपते तथावचस्ते प्रणुतै साहसिकाय मे प्रदद्याः ॥१७॥

नाथश्श्रीकुरुमूर्तिभूधरशिरश्चिन्तामणिश्श्रीपति-
र्ग्रन्थस्याङ्गतया यदीह बहुशः प्रख्याप्य ते वर्णनम् ।
तत्तद्वस्तुचयस्य तत्र कृतिनो रामायणादीन्मुहु
र्द्रष्टारस्सरसाः कदाचिदपि नो निन्दन्ति किं नः परैः ॥१८॥

विरिञ्चिललनाकराञ्चितविपञ्चिकाञ्चत्स्वर
प्रपञ्च किलिकिञ्चित प्रतति वञ्चनाचुञ्चुभिः ।
दुरासदपराक्रमैस्सुकविकृष्णवाचाभरै-
र्निराकृतपरालिभिर्भुवनमञ्जसा रञ्जितम् ॥१९॥

गद्यम् ॥

विराजते किल धरान्तरे पुरान्तकामरवरादिमाखिलसुरावलिजेगीयमाननिजमहिमा हिमाचल इव महानटव्यापारसत्त्वपोषणनिदानं दानवान्वय इव परिकम्पित-सुपर्ववंशातिबलमनोहरः हर इव सदा गजानन पुष्करचुम्बितविमलगङ्गाभिरामः राम इव समाश्रितचित्रकूट काननजातः जातरूपगिरिरिवाश्रितसुमनश्शिलाकन्दरः दर इव घनवनमालि कान्तशयविलसितः सितकर इव महानीलखनिहितः हितजन इवोज्जीवनानूपदेश-रञ्जितमानवः नवयौवनजन इव सदा कृशोदरी परिरब्धावयवः यवराशिरिव कृष्णसारमहितताभिवृद्धः वृद्ध इव बहुतर प्रपातकम्पितपञ्चशाखाकलितागमः निरन्तर-हरीन्द्रविदलित करीन्द्रकुम्भस्थलविगलित स्थूलमुक्ताफलमेदुरीभूतदरी मुखवरीवृत्यमान-चमरीगणनरीनृत्य मानवालजालजरीजृभ्यमाण सविधनिर्झर झरीशीकरशिशिरीकृतवात-जाताधरीकृतश्रमामरीसमुदयविभावरीश सोदरीभवदाननचुम्बनगरीय स्तरपरीरम्भचातुरी-प्रमुखविविधसुरतरीतिसादरीभूतसुरपूरीजनधुरीणकराम्बुजव्यतिकरविश्लथतदीय

In Public domain. Digitization Muthulakshmi Research Academy

निबिरीसकबरीभरकृतपरीपातपरीपाकविदलितनवमल्लिकामतल्लिकाप्रचुरीभूत परीमलास्वादनप्रमोदबन्धुरीभवद्भ्रमरी समुदयोदरीकृतवीणा स्वरीभूतझङ्कारनिशमना-स्थिरीकृतहृदयहरिण रमणीनिकटकटक विटपिविटपपटलविनिहितकलिन्द नन्दिनीतरङ्ग बिन्दुबृन्दसन्देहसन्दोहसन्दायिकटाक्षवीक्षणरुचिनिचयजनितजाम्बवकदम्बादभ्रविभ्रम-तदाहरण प्रसारितकरतलतदलाभवृक्षाग्र तदक्षयप्रतिक्षणोन्मीलदति चापलायासितपटुतर-मुनिवटुपटल निशामनविरचितभृशापहसनरमेशानघसेवाहेवाकविशारदनागरिक-कृशाङ्गीजन वशानुगतरुणसंस्तूयमानतच्चतुरालापश्रवणारचिततदनुवाद कीरवारतारतार-सारतरनिनदमुखरितदिशावकाशः हरीश्वराश्रितशिखरोप्यहरीश्वराश्रितशिखरः वनप्रियद्विजकलितोऽपि न वनप्रियद्विजकलितः अगकेसरकुसुममसृणितोऽपि नागकेसरकुसुमसृणितः रङ्कुशशादनकुलेष्टावनीरम्योऽप्यरङ्कुशशादनकुलेष्टावनीरम्यः वैणवराराजितोऽपि न वैणवराराजितः सप्तपर्णतरुशोभितोऽप्यसङ्ख्यातपर्णतरुशोभितः जम्भविजृम्भणप्रदोऽपि देववल्लभप्रियः द्विपारिभद्राञ्चितोऽप्यसङ्ख्य-पारिभद्राञ्चितः वटसहस्रकलितप्रान्तोऽप्यवटसहस्रकलितप्रान्तः द्विजपावनाव-नीकलितोऽपि बहुजपावनावनी कलितः निरन्तरैकविष्णुक्रान्तावनियुतोऽपि सर्वदा पिनाकिसमाक्रान्तावनियुतः तालीरक्षणनिपुणोऽपि नतालीरक्षणनिपुणः अनुक्षणदिनमणिकिरणगण सङ्क्रमण-समुन्मीलन्मयूखरेखाकलितनिरवधिकपद्मरागमणिमसृणित शिखरनिकरतया प्रतिक्षण-रत्नपरीक्षणविचक्षणसार्थवाहजनखानित खनीतलसमुक्षिप्त विकीर्णस्फारहीरभारतार-कितततया तदीयशुचिरुचिनिचयनिचोलिततया च निरन्तरश्रीनिवासविहारकृते सभक्तिप्रकर्षं वितत्यरत्ननिकरोज्चलां वदनाग्रानुपदलेलिहानरसनाच्छटाञ्चितां स्फुटाकृतिं स्पटाततिं हठान्निर्भिद्य रत्नगर्भागर्भं विनिर्ग तस्थलथलितधवलतरसुन्दरबिन्दुमण्डली-विभूषितपाण्डराङ्गो मण्डलीभूय निषण्ण इव कुण्डलीन्द्रः कदाचन पारदसच्छाय-शारदानीरदनिचयकञ्चुकिताधित्यकतया सम्फुल्लचम्पकसुमसम्पत्सम्पूर्णोपत्यकतया बहुतरपरिपतन्निर्झरनिकरतया च अनङ्गवैरिदृढालिङ्गनसङ्गतविभूतिमयाङ्गरा-गच्छुरितोर्ध्वभागं शातकुम्भकुम्भश्रीविडम्बनधुरन्धरं व्यालोलमौक्तिकहारन्तदर्धाङ्ग-सङ्गिसर्वमङ्गलातुङ्गतरैक-स्तनमिव समानयन् नानाविधप्रचुरसूनालिमकरन्दपानातिमुदितालिमानाधिक ध्वानगाना-निशश्रवणलूनात्मधैर्यभरलीनात्महृदयनिजमीनाक्ष्युदग्रतर पीनाद्रिकुचभासमानात्मकर-युगशयानामरोत्तमवितानातिसुखभरनिदानावनीराजमानाच्छसन्मल्लिकानागवल्ली

In Public domain. Digitization Muthulakshmi Research Academy
महानारिकेल-प्रधानागमाञ्चितोद्यानान्तजाग्रदभिमानानदत्केकिनीनादकण्ठोदितानाकवि-भ्राजमानारवश्रुतिसमानापतद्बर्हीणी नाट्यरम्योतिदूनान्तरङ्गबहु-दीनावलि त्राणदानाति-निपुणचरितभरितः परितोषितकुरुपतिर्गिरिपतिः ॥

कुरुमूर्तिकुरुमतिधरवर्णनम्

पद्यम् ॥

कुरुपतिगिरिरिति कुरुमतिगिरिरिति कुरुमूर्तिधरणिधर इति च।
कुरुमूर्तिभूभृदिति यः कुर्मतिधर इति च भूतले ख्यातः ॥२०॥

गगनगमनवेला कीटकोटीमुखोऽद्य द्वि-
वरतति निविष्टस्फारतारा उदाराः ।
अभिदधति हि मुक्ता यत्र वंशेषु नो चेद्वि
यदिदमुडुतुच्छं तत्र तत्रास्त कस्मात् ॥२१॥

महाभागवतं सत्त्वं प्राप्तं येन स यत्तटे ।
शुकश्शुक इवाभाति कुरुराज इवानिशम् ॥२२॥

यत्र सदापि कपोतस्वरललितास्सुरतसौख्यपरितान्ताः ।
सुरकान्तावनिकान्तावसन्तदिवसश्रियोऽनुकुर्वन्ति ॥२३॥

विपिनदरीनरीनृतदुदग्रहरीन्द्रगलो
द्गलदुरुगर्जितश्रवणतर्जितधैर्यतया ।
तटभुवि तत्र तत्र विचलावयवान् द्विरदान्
यदुदितगण्डशैलनिवहान्मनुते मनुजः ॥२४॥

निभिडालवालकलनादरागवद्विरिकाकपोतरववद्यदन्तरम् ।
निभिडालवालकलनादरागवद्विरिकाकपोतरववद्यदन्तरम् ॥२५॥

प्रचुरमणीखनीततियुतोऽपि गुरुत्वमय
न्नपि धरणीधरोऽपि बहुवञ्चकमित्रतया ।
अतिकितवत्वमाप भूवने प्रवदन्ति ततो
गिरिवरमप्रमाण इति यं मनुजा निखिलाः ॥२६॥

In Public domain. Digitization Muthulakshmi Research Academy

गच्छन्मध्येऽन्तरिक्षं यदुदितहरिणीवीक्षणात्सम्लुते स्वे
बिम्बावासे मृगे यत् स्फटिकरुचिभृतच्छिद्र इन्दुः क्षणार्धम् ।
संहृष्टो नैष्कलङ्क्यद्धुरिगमनगलत्तद्रुचिच्छिद्रदृश्य
व्योमागीतः कलङ्कीत्युदितमपयशो दुस्त्यजं सर्वथापि ॥२७॥

अनेकपनसाश्लिष्टा यत् प्रान्ता इव सन्ततम् ।
निर्वैरा यत्र पश्चास्याश्चित्रं क्षेत्रस्य वैभवम् ॥२८॥

प्राप्तोऽयं हृदयाम्बुजं चिरतपोभ्यासात्समुन्मीलना
दीषल्लोचनयोर्गमिष्यति बहिर्लब्धायनश्श्रीपतिः ।
इत्यामील्य दृढं विलोचनयुगं ध्यायन्ति यत्राच्युतं
सानन्दं मुनयो भवन्ति मनुजाः कृच्छ्रार्जिते सादराः ॥२९॥

गद्यम् ॥

यत्र च विचित्रतरसुन्दरकदरामुखेषु प्रियैस्सह विहरमाणाः नाति मुग्धा नागललनाः दृढतरकुचशातकुम्भकुम्भपरिरम्भारम्भसम्भ्रमजृम्भितकुतूहलतया गृहीतैकतरकरेषु प्रियेषु लज्जाभरभरिततया कथञ्चन विमोच्य तं करं तदितरकरेण प्रविश्यान्तर्दयितेष्वप्यनुसृत्य सानुरागं गृहीतसिचयाञ्चलेषु निरवधिकनिजशिरोमणि-घृणिविशकलितगाढान्धतमसे तत्रापि विफलितान्तः प्रवेशप्रयासाः उद्धृय भुजलते करतलाभ्यां पिदधाना अपि शिरोमणिं प्रतिक्षणाङ्गुलिविवराविरलविगलत्तन्मयूखविद्युद्रेखास्फुरणे न व्यक्ताव्यक्ततनुलताः फणामणिसमाच्छादनप्रसक्तकरयुगतलतया अशङ्कितविमोचनभयप्रियबहुसुलभानु-भूयमानभुजाद्वयोत्क्षेण निरतिशयोत्तुङ्गकुचयुगलाश्लेषाः निजतनू विमोचनाय तूष्णीमव-स्थानाय च व्यग्रहृदयास्समन्दहासानुरागलज्जितं निन्दन्त्यशिरोमणिविधातारं विधातारं समन्ताद्रमन्ते ॥

श्रीनिवासवर्णनम्

पद्यम् ॥चिरं दूरे शेषाचलशिखरदुर्गे यदि वसा-
म्यहं भक्तश्रेणी मम बहुपरिश्रान्तिमयते ।
मदीक्षायै तन्नोचितमिदमिति प्राप्तकरुण
स्सदाध्यास्ते श्रीमान् कुरुमतिगिरिं तं मुररिपुः ॥३०॥

In Public domain. Digitization Muthulakshmi Research Academy

द्विरदाधिप वरदानस्फुरदादरणः पुरा कुरुधरेशम् ।
निरतिशय वरवितरणैर्भरतं चक्रे प्रमोदभरितं यः ॥३१॥

निजनाम समुचितस्थलसंश्रयकुतुकं हरिर्दधान इव ।
कन्दरभुवमस्य गिरेर्मन्दिरयति नित्यमिन्दिरेशो यः ॥३२॥

वारणभीतिनिवारणकारणमिह पुण्डरीक नयनं यम् ।
चित्रं संसेव्य हरिं वित्रासं जहति मानवानीलम् ॥३३॥

समुद्भूतं खन्यां कुरुमतिगिरेर्यं मनुमहे
महानीलं रत्नं मुररिपुमनर्घं घनरुचिम् ।
अतो यं क्षीराब्धौ मणिगणपरीक्षाकुतुकिना
परिन्यस्तः केनाप्यथ न यदि सिन्धौ वसतिकः ॥३४॥

जलदसरसान्तनुं भुवि हृदये ध्यायन्ति यस्य मुनिनिवहाः ।
व्यत्यस्त तदभिधेयं रोचिर्मुष्णाति यस्य नेत्रयुगी ॥३५॥

तच्छृङ्गप्रकराग्रसङ्गतमहाकादम्बिनी विस्मृतः
कश्चित् प्रावृषि नीलवारिदशिशुर्यातुं सहायं विना ।
त्यक्त्वा धैर्यमथान्तिकस्थितगुहामेनां प्रविश्य स्थितो
नूनं श्रीपतिरेष नो यदि जगत्तापं कथं वा हरेत् ॥३६॥

प्रौढध्वान्तदुरन्तदन्तुरतमं यत्कन्दराभ्यन्तर
प्रान्तं द्योतयितुं धृतातिकुतुकः कान्तश्रियस्सन्ततम् ।
धत्ते पद्मसुहृत्तमं सरसिजस्मेरे करे दक्षिणे
देवो नूनमितीरयन्ति कवयो यं चक्रदीव्यत्करम् ॥३७॥

प्रायः कलौ पुमांसो जाया बिभ्रति शिरस्स्विति श्रीमान् ।
व्यञ्जयितुमिव निजोपरि कञ्जगृहां रञ्जयत्ययं शिखरे ॥३८॥

वैवाहिकोत्सवविधौ प्रमदेन भर्तु
रारोहमूर्धतलमित्युदिते मुनीन्द्रैः ।

In Public domain. Digitization Muthulakshmi Research Academy

मन्त्रे तदाप्तवचनं भुवि सार्थयन्ती
नूनं हरेरुपरि तत्र रमा चकास्ति ॥३९॥

उरसि विपुलेऽवकाशे सरसिजनयनेन दत्तमात्रे श्रीः।
शिरसि समारुक्षदहो सरसिजनयना विशृङ्खलाः प्रायः ॥४०॥

पुरुषाः पुरातना ये तेषामतिसुन्दरेषु दारेषु ।
अतिचापलमिन्धे यद्धत्ते मूर्धनि रमां कुरुमतीशः ॥४१॥

वधूनामन्यासां क्व नु जगति लावण्यगरिमा
क्व वा लक्ष्म्या लोकोत्तर विभवलावण्यमहिमा ।
जगन्मातृत्वेऽपि प्रचुर कनकाद्रि द्रढिमव-
त्कुचद्वन्द्वां यत्तामुरसि वहते कामजनकः ॥४२॥

नित्यं श्रीभूमिनीलादिमबहुरमणीनिर्विशेषानुकूल्य-
प्रौढ्यां दक्षोऽपि तासां मिथरुदितमहारोषसन्धानलीलाम् ।
कारं कारं नितान्तं विवशितहृदयः प्रायशश्श्रीनिवासो
नोचेत्त्यक्त्वा स्वकीयं पदमचलगुहामाश्रयेदेष कस्मात् ॥४३॥

तत्र हि ॥

पत्युर्वक्षस्युदञ्चत्थलथलितमणीबिम्बितात्मोदितान्य
प्रौढस्त्री भ्रान्ति भाराधृतकरमपि तं कान्तमुद्धूय रोषात् ।
लक्ष्मीश्शैलाग्रभूमीमभजत दयितोद्धूनमोदञ्चितैत-
द्धस्तप्रस्तोर्मिकाग्रारुणमणय इवाभान्त्यखण्डाः प्रदीपाः ॥४४॥

अपि च ॥

अस्मद्वल्लभशेषभूधरशिरोभूषात्र लक्ष्मीपति-
र्मोदात्सन्निदधेयमित्यतितर स्नेहागुहाभ्यन्तरे ।
तस्मिन् शुभ्रदशाच्छला हि ललना मन्दानिलान्दोलितै-
र्देवं दीपशिखाशिरोमणिगणैर्नीराजयन्ति ध्रुवं ॥४५॥

In Public domain. Digitization Muthulakshmi Research Academy

किञ्च ॥

प्रत्येकं शिखरे गिरेस्थितवतीं दृष्ट्वा स्वसारं श्रियं
कस्मादेवमिति श्रियः प्रियतमं प्रष्टुं जवादिन्दुना ।
आज्ञप्ता इव तारका गिरिगुहाप्रान्तं प्रविष्टास्सदा
दीपा भान्ति हि जन्मगेहजनतालोकेऽधिकं वत्सला ॥ ४६॥

अन्यच्च ॥

मय्येवायं वसति हरिरित्यात्मजां दिव्यरत्नं
चादामद्य क्व गत इति तं मार्गितुं सिन्धुना द्राक् ।
दत्तानुज्ञो मणिगण इवोपागतास्तत्र दीप
व्यूहो भाति क्षणधुतकृताः प्राप्तजामातृभावाः ॥४७॥

सुचिरं भगवांस्तस्मिन्नचितविहारो गिरेर्गुहाप्रान्ते ।
प्रचुरान्निर्जरनरकृतरुचिरानुदिनोत्सवानुपादत्त ॥४८॥

कर्तव्यं भुवि वेङ्कटाद्रिशिखरे यद्यद्धरेस्सन्निधा
वत्रायं भगवान् स एव जयतीत्युन्मस्तभक्त्यान्विताः ।
तत्तत्तस्य मुदे नरा विदधते तस्मिन् गिरौ प्रार्थितं
तेनाम्रेडितसम्मदं प्रभजते शेषाद्रिभूषामणिः ॥४९॥

नखविधुरेखिकासतत सन्निधितोऽत्र हरे
र्निशि निशि कां विधां भजति वाङ्घ्रिसरोजयुगम् ।
इति किल लालयत्युदय एव तदब्जसखः
करशतकैस्सरागमनघैरनुघस्रमपि ॥५०॥

वर्षर्तुवर्णनम्

अथ कदाचित् ॥

मेघं करदिग्वदनैऋतिं करैर्नीपसर्जमुकुलानाम् ।
विरहिभयंकरुपैर्दिवसैः कैश्चित्पदं न्यधायि भुवि ॥५१॥

In Public domain. Digitization Muthulakshmi Research Academy

श्लिष्टाभीरसित करानाभिरतिमात्र चपलहृदयाभिरलम् ।
घनमालाभीरङ्गत्पुष्करशयनाभिरुपमिता कृष्णतनुः ॥५२॥

लोके पयोधराणामाच्छादनमम्बरेण किल दृष्टम् ।
अम्बरमेव पयोधरसंछन्नमभूद्विचित्रमिदम् ॥४३॥

यत्र ज्वलनन्तापस्तत्रैवेति श्रुतं जनैर्लोके ।
विद्युज्ज्वाल घने तापस्तु वियोगिनामुदैद्विचित्रम् ॥५४॥

घननीलाश्वा विद्युच्छलकनककशाग्रचलनतो नुन्नाः ।
मरुदाख्यसादिपतिना नभस्थले चक्रुरद्भुतधाराः ॥५५॥

सरिदधिपतिमौक्तिकानि हृत्वा जलदचयः करकच्छलादवर्षत् ।
न्यगिलदतिजवेन तानि भूमिस्तदिह जनैर्जगदेहि रत्नगर्भा ॥५६॥

अनुसरति घनं मुदा बलाकाप्रियमिति केन विदीरिता स भावम् ।
इयमनुसरतीति दर्शयन्ती किल चतुरा परिषस्वजे तमेव ॥५७॥

जलधौ निपीतसलिलस्स्वच्छन्दं जलधरो ववर्षेति ।
युक्तमनिपीतजलमप्यक्ष्णोर्युगलं वियोगिनां चित्रम् ॥५८॥

ललनापयोधराणां दृष्टं नैल्यं मुखाग्र एव जनैः ।
वर्षापयोधराणामानीलं रूपमखिलमिति चित्रम् ॥५९॥

यस्माद्गर्भं दत्ते ललना सूते हि तादृशं सूनुम् ।
अरुणकिरणात्तगर्भा यदिन्द्रकोपानसूत घनपटली ॥६०॥

समताडि शरैर्भूधरनिकरो जलदेन सेन्द्रचापेन ।
विरहिजनानां हृदयं विदलितमासीद्विचित्रमिदम् ॥६१॥

केकारवयुतनिर्झरललिता दिवसा इति प्रियेणोक्ता ।
प्रत्युत्तरं न्यगादीत्प्रत्युत्पन्नं तदेव कापि वधूः ॥६२॥

ऊर्जस्वलगर्जानां पर्जन्यानां रसस्समग्रभुवि ।
व्यत्यस्त स्वाभिख्या वाच्यं सर्वं च पूरयामास ॥६३॥

In Public domain. Digitization Muthulakshmi Research Academy

अभिवृद्धतृणाङ्कूराः प्रहृष्टरोमाण इव बभुर्गिरयः ।
जगति न हृष्येत्को वा पयोधरस्पर्शनेन कठिनोऽपि ॥६४॥

सङ्कुचितमहसि रचिते विधौ घनैर्नभसि तत्र वर्षासु ।
कुरुमुर्तिगिरौ तु घना विधोर्महो वर्धयन्त नभसि बत ॥६५॥

कोटितुलस्यर्पणपरिपाटिमहैः कुर्मतीश्वरो मुमुदे ।
अभवन् भोजनविभवप्रभवन्मोदास्सहस्रमपि विप्राः ॥६६॥

श्रीशैलवंशतिलकः कृष्णः कविसार्वभौमबिरुदाढ्यः ।
श्रीनिवासविलसेऽस्मिन्नुल्लासं प्रथममभ्यधान्मोदात् ॥

इति श्रीमत्प्रत्यग्रदुर्गकृष्णकविसार्वभौमस्य कृतिषु
श्रीनिवासविलासाख्ये चम्पूप्रबन्धे
॥ प्रथमोल्लासः ॥

In Public domain. Digitization Muthulakshmi Research Academy

श्री श्रीनिवासपरब्रह्मणे नमः

श्रीनिवासविलासे - द्वितीयः उल्लासः

.....

एष मम लालनीयो मम लाल्यो नृपति बालकोऽयमिति ।
श्रीकुरुमूर्तीश्वरयोस्सल्लापाः पान्तु सोमभूपसुतम् ॥१॥

शरदृतुवर्णनम्

द्विरदालसगमनानां सुरदानवसिद्धमर्त्यललनानाम् ।
स्मरदाननिपुणमहिमा शरदागम एकदाविरास तदा ॥२॥

धून्वन् घनाघनानां भाति स्मेरं मदन्निजप्रभया ।
शरदागमस्तदानीं कुरुमूर्तिशिखरीन्द्र इव समग्रभुवि ॥३॥

भूकान्ता प्रथमं रजस्वलतया रम्या ततस्स्नापिता
मेघालीभिरलं शिखिद्विजरवैर्मन्त्रव्रजैस्संस्कृता ।
क्षेत्राजीवसमुप्त बीजविलसद्गर्भा चिरायानघान्
सस्यव्याजशिशुव्रजान् प्रसुषुवे नानाविधानादरात् ॥४॥

तदानीम् ॥

केकीशानन्दकरा याता दिवसा इतीरिताः पतिभिः ।
तदुरुत्तरं त्रिचतुरास्तदेव ललनासु सुचतुराः काश्चित् ॥५॥

सान्द्रोज्जृम्भितसप्तपर्णकदलीं सौरभ्यगर्भानिलां
दृष्ट्वा शारदसम्पदं मुमुदिरे व्यादीनवा मानवाः ।
उन्मीलच्छुचितारकेन्दुवदनामृष्टाम्बरान्तोच्चल
न्मञ्जुस्वच्छपयोधरा न मनसे रोचेत कस्यावनौ ॥६॥

सप्तच्छदा एव विकासमापुर्वयं कुतः कुड्मलिता भवाम ॥
इतीर्ष्यया किं शतपत्रपुञ्जास्सहस्रपत्रप्रकराश्च फुल्लाः ॥७॥

शारदनिशि मरुदधिपतिकरिशाबा इव विरेजिरे जलदाः ।
तत्करमुख विवरगलच्छीकरनिकरा इवाच्छताराश्च ॥८॥

In Public domain. Digitization Muthulakshmi Research Academy

सम्प्राप्तश्च पलानुषङ्गमनिशं दुःखं वियोगिव्रजे
दाता जातमहानुतापविवशो दत्वा नृणां जीवनम्
उच्चैः प्राप्य शुचित्वमम्बुदचयश्चिक्रीड सद्भिस्समं
भूमौ नूनमकार्यकारिजनता दानेन शुद्धिं भजेत् ॥९॥

मानसक्लृप्तनिवासा अपि हंसा नयनपथमथारुक्षन् ।
नृणां विचित्रमेतत्सरसा अजनिषत सारसा अपि च ॥१०॥

कादम्बिनी समग्रा मम सदृशी द्यौरियं तमवधिमिति ।
कादम्बिनी समग्रा भूरप्यनिष्टं मत्सरेणेव ॥११॥

विकृतिं न यान्ति वर्णव्यत्यासेऽपि द्विजत्वकलिताश्च ।
इति सारसान्विदधिरे हंसा मैत्री पदे नूनम् ॥१२॥

वातान्दोलितसप्तपर्णकदलीपालीसमुट्टङ्किताः
कर्पूरालिपरागराशय इवादीव्यन् शरद्वारिदाः ।
बभ्राजे सुरवर्त्म तत्परिमलोत्कृष्टालिबृन्दायितं
ख्याताद्यस्य सिताभ्रता तदितरस्यातो द्विरेफा भिदा ॥१३॥

कन्दरविहारमाप्तुं सुन्दरिमन इच्छतीति कापि वधूः ।
गदिता पत्या चतुरा मुदिता प्रत्युत्तरन्तदेव ददौ ॥१४॥

नूनं स्वेन हृतान्कदम्बमुकुलान्व्योमाङ्गणे दर्शय
द्यामिन्यां शरदागमः प्रविलसत्तारा च्छलान्नो यदि ।
वर्षारात्रिषु केन वापि ददृशे नैकापि कस्मादुडु-
स्तस्मादेव सदा घनैश्शुचितमैर्भात्येष चोरीकृतः ॥१५॥

जलधौ निस्तलमौक्तिकैस्सह जलं पीत्वा प्रवृष्टोदका-
श्शरदादावुदरस्थतन्मणिरुचा स्वच्छा बभुर्वारिदाः
पवनोद्धूततदुत्थतन्मणिगणास्तारा स्फुटं सर्वतो
मुखमुक्ताश्रयता तदस्ति निखिलज्ञाता पयोदावलौ ॥१६॥

In Public domain. Digitization Muthulakshmi Research Academy

चित्रमवनावपि शरत्सपदि तदाकाशनिर्मलत्वमधात् ।
सततमपि राजहंसर्क्षमण्डली चङ्क्रमश्चेति ॥१७॥

शरन्मुखे सध्वनयो बलाहकादुर्गाहवर्णच्युतिमेत्य सम्प्रति ।
गतास्थितावेत्युदिता स्त्रियः प्रियै र्यातास्थिताश्चेत्यवदन् सचातुरि ॥१८॥

भित्वोद्धृतं घनखनीं शरदागम्माख्य-
पुंसा समुल्लिखितमम्बरशाणचक्रे ।
वृत्तैकरत्नतिलकं किल भानुबिम्बमुद्यद्
व्यभूषयत वासरलक्ष्मिवक्त्रम् ॥१९॥

घनततिधूमविज्वलदिरम्मदवह्निशिखोत्त-
पवनकनत्तटित्कनकदीर्घ शलाकिकया ।
द्युमणिरयं कृतस्समयहेमकृता कलशो
न यदि स तावदैक्षि मनुजैर्न कुतो गगने ॥२०॥

प्रादोषानिलधूतशारददलोड्डीनास्सिताभ्रच्छटा-
खण्डास्तारचया ध्रुवं निशि ततस्सन्ध्यानलोद्दीपिताः ।
प्रातस्सान्द्रिततच्छिखा इव बभुर्बालार्कभानुच्छटा-
स्तस्मादेव दिवा विलोचनपथं याता न तारा नृणाम् ॥२१॥

नष्टा अप्युदमीलन् शादास्सरितान्तटे प्रसन्नानाम् ।
व्यत्यस्त तदभिधेयास्तत्रैव बभुश्च तारणाय नृणाम् ॥२२॥

नष्टेऽपि कलापचये दलिते बाणासने शरेऽपि तदा ।
सर्वत्रापि नृपाणां रणाभिलाषो विचित्रमैधिष्ट ॥२३॥

गद्यम् ॥

तदा किल मदाकुलमदावलरदावलिविदारितशारद तरुसमुन्मीलत्सौरभी-विवशितहृदया दयिताभिस्सह निषण्णा इह कन्दलितबाणा सनमतनुसमरायाश्रयाम इति तास्समापृच्छ्य ताभिस्सवक्रोक्तिदलितबाणा सनं कमप्याश्रितानामतनुसमरप्रसक्तिः क्रेति दत्तोत्तराः पुनरपि किमेतैर्वक्रोत्तरैस्सममुत्तरं प्रदातव्यमिति तमेव प्रश्नं प्रपञ्चयन्तो-

In Public domain. Digitization Muthulakshmi Research Academy

ऽतिचतुराभिस्ताभिर्युवतिभिस्सलज्जमिह कन्दलितबाणासनमतनुसमरायाश्रयाम इति मुग्ध मभिहितास्साधुप्रौढाभिरुत्तरं वितीर्णं युष्माभिरिति श्लाघमाना वक्षोजक्षोणीधरयुगल कार्कश्यसाम्राज्यसौभाग्यसर्वस्वं निवेदयितुमिव हृदयाय सम्मुखीनास्ता अप्रदत्तैक चिकुर-मात्र प्रवेशान्तरं गाढं समालिङ्ग्य किमपि सौख्यमन्वभूवन्विलीनान्तःकरणास्तरुणाः ॥ पद्यम् ॥

हंसादृतो नितान्तं सारसनिचयः प्रफुल्लपत्राढ्यः ।
एकस्सरसि व्यलसत्परस्तु विजहार तत्र तत्र सुखम् ॥२४॥

अमरेन्द्रमणेर्लक्ष्मीमहरन् दूर्वास्समन्ततो रूढाः ।
अत एव रुषा चर्वति लब्धा लब्धा अयं हि दूर्वास्ताः ॥२५॥

सद्यस्तनोल्लसितसान्द्रफलाख्यमुक्ता-
च्छायान्विता प्रचुरपत्रमनोहराङ्गी ।
आमोदयद्बहुरसामलकी समग्रान्
रोचेत कस्य न हृदे भुनने वयस्था ॥२६॥

साम्यात्पश्यति हन्त सर्वतटिनीरस्मत्पतिस्सिन्धुरि-
त्येनं स्वस्ववशे विधातुमुदकैर्नद्यो धृताडम्बराः ।
अब्धिं क्षोभयितुं न किञ्चिदपि ताः प्रावृड्दिनेऽशक्नुवं
स्तन्नूनं स्वयमेव मन्दमगमन् जातप्रसादाः प्रियम् ॥२७॥

कान्ता रमयति का वा मां धिक्कृत्येति विपिनभुवि काचित् ।
केनचिदुक्तं श्लेषं विविच्य तस्मै ददावथाश्लेषम् ॥२८॥

घनागमनिशामुखे जलधिकान्तसङ्गार्जित
प्रतान्ति विवशा इव क्रशिमसङ्गता निम्नगाः ।
मनोहरतमा बभुस्सुरततान्त बालामणे
र्विभातितनिमा तनौ निजविलोमवाच्यो भुवि ॥२९॥

इह के नियामका इति तितीर्षुभिर्निम्नगां जनैः पृष्टाः ।
पृच्छामुत्तरयन्तस्तानपजहसुश्च पोतवाहनराः ॥३०॥

In Public domain. Digitization Muthulakshmi Research Academy

वरसारसारवोऽयं व्यत्यस्तोऽप्यात्मसदृशरीतिरिति
श्रुत्वा तं रसिकतमाः स्त्रीपुंसचया व्यमोदिषत ॥३१॥

स्फुरद्घनशरद्धनव्रजनिचोलितोपत्यको
व्यराजत धरातले कुरुमतिस्थिराभृत्पतिः ।
विलोडनचलोर्मिकाविततिमुग्धदुग्धार्णवा
तिदन्तुरहृदन्तरप्रकटमन्दरामन्दभाः ॥३२॥

केशपरिष्कृतवेणीकाशविकासप्रदे दिनेऽत्रेति ।
रचितानुयोग उचितं कयाचिदाहोत्तरं तदेव युवा ॥३३॥

व्यभ्रेऽखिले तदाभ्रे व्यभ्रेजिषतोत्कृताःखलेमाषाः ।
कालेन भाविवत्सरकालाम्बुदबीजराशय इवात्ताः ॥३४॥

अथोवृत्तः पूतः खलभुवि परं कुञ्चितमुख-
स्तिलोराशीभूतो व्यलसदथ कान्तस्फुटतरम् ।
अतस्सर्वे मर्त्यास्तिलक इव राजत्ययमिति
प्रशंसां तन्वानास्सपदि तिलराशिं जगृहिरे ॥३५॥

अन्योन्येक्षणकेलिभूरिकुतुकादप्राप्तनिद्राभरा
वाताम्रेक्षणसारसौ सुशयनोपावर्तनादानिशम् ।
प्रत्यूषे लुलितालकावथ चतुर्दश्या नवौ दम्पती
श्वश्रूसद्मनि कामपि श्रियमुपादत्तां शुभाभ्यञ्जने ॥३६॥

तदानीम् ॥

त्वं सौन्दर्यवतीति काममुदिता पत्यास्मि किं निश्चयो
हास्यं वा वद हन्त काममुदितापत्यासि किं मय्यपि ।
हास्यान्या तनुषे नितान्तमुदिता पत्या कदा वोदिता
पत्यासीति जहास काचन सखी प्रौढातिमुग्धां वधूम् ॥३७॥

आचैत्रादिह माससप्तकमभूदब्दे हरेरुत्सव
स्सम्प्राप्तः कुरुमूर्तिभूधरमणेरित्थं प्रसार्याङ्गुलीः ।

In Public domain. Digitization Muthulakshmi Research Academy

सङ्ख्या एव वितत्य तुङ्गकदलीबाहाग्रसप्तच्छदान्
श्रीशायार्पयितुं सिताभ्रमवनिर्दध्रे ध्रुवं कार्तिके ॥३८॥

स्वात्यभ्यञ्जननिर्मलौ सुरुचिरौ बद्धाञ्चलैः कुन्तलै-
रन्योन्यासनदर्शनातिकुतुकक्षिप्ते क्षणान्तौ क्षणम् ।
लज्जोन्मेषवशात्परस्परहृतापाङ्गौ नवीनौ तदा
श्वश्रूवेश्मनि दम्पती प्रमुदितौ दीपावलेरुत्सवे ॥३९॥

सर्वा बीजाकृता भूर्बहुतरविलसत्पक्वसस्याभिरामा
सर्वा गावः प्रसूता नवनवपयसा पोषयंस्तर्णकान् स्वान् ।
सर्वा प्रोद्धूतवर्षानिलतरणिकरोच्चण्डिमत्वान्मनोज्ञं
दुर्वारं दैवतैरप्यथ तरुणततिः प्राप सौख्यं नितान्तम् ॥४०॥

क्षारैर्नीरैः कदर्थीकृतनिजरसनास्सैन्धवैस्तानि मुक्त्वा
वर्षान्तेऽथावतीर्याध्यवनि सुमधुरं धेनुदुग्धं निपीय ।
उल्लङ्घ्योल्लङ्घ्य शश्वत्सुरपथगतये पीतदुग्धातिभारा
न्मेघव्यूहा अशक्ता इव भुवि ननृतुस्तर्णकाश्शुभ्रवर्णाः ॥४१॥

विकसितमालतीनिचय एव बभौ सितिमा
य इह घनागमे शरदृतौ स नितान्तमपि ।
जलदचयेन्दुमण्डलमरालविकासिशर
व्रजकुमुदामलाब्जनिचये सहस्रगुणम् ॥४२॥

गद्यम् ॥

समये तस्मिन् सुस्मेरवलमानजलदवलयदुकूलवल्लिमतल्लिकानि चयनिचोलित-हरिदङ्गनानिस्तलतमसुस्तनविन्यस्तमहासुन्दरतरचन्दिरकरचन्दनभरसुस्फारसारतारतार-हीरहारभारालङ्कारे शङ्काविधुरसमङ्कुरदुदारसदागतिकिशोरविशोधितविशोभितोपवना-भ्यर्णपरिपूर्णसप्तपर्ण समुदीर्णसौरभीघुजमघुमितदशदिशावकाशे काशप्रकाशप्रदान-निदाने दानवपतिधूननकृतमानस्य मानाधिकमहिमरश्मिसमाकृष्टसमस्त धरामण्डल-नरावलेर्विश्वम्भरस्याप्युन्मस्तकयुगपन्मिलितासेतुहैमाचल मनुजकुलानि वार्यसपर्याचर्या-पर्यादानायैकदैवानीशतयेव सरूपं दिव्यविग्रहान्तरमवलम्ब्य कुरुमूर्तिगिरिपति-

In Public domain. Digitization Muthulakshmi Research Academy
गुहाविहारमङ्गीकृत्य भक्त जनार्हणास्स्वीकुर्वाणस्य श्रीमन्नारायणस्य शेषाद्रिभूषामणेः सांवत्सरदिव्य-पादुकास्वीकरणमहोत्सवसमयोऽसौ सम्प्राप्त इति हृदयान्तर समुद्वेल्लदुल्लोल-कल्लोलकुतूहलजलधिभिर्भक्तनिवहैः परिष्कृतस्य सर्वतः प्रतिविहितसुधाविलेपन-विशदतया निरन्तररमाकान्तविहारनिशान्तायितरूपतया धरणीतलरमणीयो ऽभूत्फणीन्द्र-क्षोणीधर इत्युत्कर्षासहनतया स्वयमपि श्रीनिवासनिवासायितस्येव प्रालेयधरणीधरस्य क्वचिदन्तरान्तराघटितमनश्शिलापङ्कपट्ट सुधाविलेपनविलसितोन्नतगण्डशैल मण्डलपरि-मण्डिततया निजानुजस्य श्रीनिवासस्योत्सवसमय इति जम्भरिपुणार्हणाय प्रेषितस्य शृङ्गारितावयवनिजतनुजपरिवृतस्येव सुरगजराजस्य जगद्विदितवरकीर्तिशीलस्य कुरुमूर्ति-शैलस्य निर्वर्ण्यरूपं निश्शङ्कमङ्कुरितानन्दे निखिलजनबृन्दे कार्तिकमासवलक्षपक्षपक्षतिदिने समुत्सर्पति दिव्योत्सवे दूरोद्धूतविनताखिलजनतातङ्के पङ्केरुहाक्षस्य श्रीनिवासस्य दिव्याज्ञया निर्गत्य भगवान्विष्वक्सेनो वीज्यमान इन्दुकरबृन्दविनिन्दनोड्डामराभ्यां चामराभ्यां विभूषितमकुटीतटो हैमच्छत्रेण शतपत्रमित्रमित्रेण विहरमाणः पर्वतो-पत्यकाधित्यकाप्रदेशयोः परिकम्पयन्नन्तरनवकाशतया बहिरुद्गतां प्रतापतपनैककिरण-शिखामिव सौवर्णवेत्रलतामद्यप्रभृत्यासप्तमि भगवतः कुरुमूर्तिशैलपतेर्महोत्सवोऽभिवर्धते तदखिलैरपि भक्तकुलैस्सेवादत्तचित्तैर-प्रमत्तैर्भवितव्यं न कुत्रपि विषमपाषाणदन्तुरितं वा प्रचुरमृत्कूटस्थपुटितं वा असम्मृष्टं वा अपुष्पोपहारं वा अनुदिततोरणं वा अनुन्मूलितकण्टकं वा अनुन्मीलितमण्डपं वा अनुदञ्चितकेतनं वा स्थलमुपेक्ष्यतां सर्वतस्ताड्यन्तां दुन्दुभिबृन्दानि उद्धुष्यन्तां जयजयशब्दाः उन्मील्यन्तां रङ्गवल्लिकाः उदञ्च्यन्तां तत्र तत्र पर्णशालाः उत्सिञ्च्यन्तां भगवदागमनमार्गाः उद्धूप्यन्तां सुरभिलधूपवर्तिकाः उत्कीर्यन्तां लाजा उन्नीयन्तामुत्सवसम्भारा उत्क्षिप्यन्तां पटवासका उल्लास्यन्तां निखिलदेवता उदीर्यन्तां हर्षकोलहाला यदि केनचिदप्येषा वैष्वक्सेनी दिव्याज्ञा हेलनगोचरीक्रियते तेनैतत्कराञ्चलवेपमानवेत्रलताप्रताप दौर्ललित्यसर्वस्वाभिज्ञ-देहेन भूयत इत्यनुशास्ति श्रीनिवाससेनानीरेवं कारयितव्यमिदमिति श्रीमते कुरुमूर्तिशैल-शिरोमणिनिरवधिकरुणावरुणालयसमुच्छृम्भिततुङ्गतरतरङ्गसम्भावनाविजृम्भणसम्भृत-करावलम्बदिव्यापाङ्गवीक्षण प्रसरणशरणायिताय स्फीतासामान्यकृपाय सीतारामाख्य-नृपायात्मकूरुपुरीनाथाय निवेद्यतामियमाज्ञेत्याज्ञाप्य भृत्यान् स यावच्छ्रीनिवास दिव्य-सन्निधिं प्रविशति तावत्तदाज्ञायत्ततद्रूपालदत्ताज्ञा जना अप्रमादरचिततत्तत्कृत्याः प्रतीक्षन्ते स्म भगवदुत्सवसमुन्मेषणमखिलभुवनतोषणम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमदिनोत्सववर्णनम्

पद्यम् ॥

दिने तस्मिन् लक्ष्मीदयितकरनित्यस्थितिकन
ञ्जडत्वं धून्वानं किल मुररिपोर्दिव्यभवनात् ।
विनिर्गत्य श्रीमन्मनुजनिबिडे चङ्क्रममधा
त्तदा चक्रं दिव्यं कुरुमतिसमाख्ये शिखरिणि ॥४३॥

इयं तमवधिं हरेः करतलस्थितेर्गर्वितो
मदीयरुचिहृत्परं धुरि सुदर्शनो निर्गतः ।
इति प्रतिघबन्दुरस्तमथ तर्जितुं भानुमा
नुपागत इवाबभौ मणिमयातपत्रं तदा ॥४४॥

प्रतिमासं प्रददाति मञ्जुलकलाश्श्लाशाघ्यस्सखा मे भवा
निति लक्ष्मीशसुदर्शनं रविधिया स्तोतुं जवादम्बरात् ।
अवतीर्णं किल चन्द्रबिम्बममलं छत्रं चकाशे तदा
दिवि तस्मिन् दिवसे त एव न जनैर्दृष्टं विधोर्मण्डलम् ॥४५॥

भगवत्पदसेवनागतेभ्यो मनुजेभ्यो निजदर्शनेन हर्षम् ।
प्रतिदद्य सुदर्शनाभिधां स्वां हरिचक्रं रुचिरं स्फुटीचकार ॥४६॥

यद्यप्येष हि तेजसां निधिरथाप्यत्युग्रभानूत्करै-
र्दुर्दर्शः परमित्यकीर्तिमधिकां हर्तुं निजामर्यमा ।
जातः प्राप्य सुदर्शनत्वमलसन्नूनं जगत्यां जना
दोषानाददते महत्स्वपि गुणान्नैव प्रमादादपि ॥४७॥

युक्तं हि चक्रराजो हरिकरसंस्पर्शसौख्यवैधुर्यात् ।
एको व्यचरदितीदं चित्रमसावुल्ललासेति ॥४८॥

भुवि दुर्ग्राहबलातिभारकलनाक्रूराविमौ सर्वदा
न च भेदोऽस्त्यनयोस्समग्रविदितो नक्रेशचक्रेशयोः ।
इति तत्तज्जनजल्पनश्रवणतो योऽत्यर्थ नीचोपमा
सहनात्किं प्रथमस्य सर्वविदितां चक्रे द्वितीयोऽभिधाम् ॥४९॥

In Public domain. Digitization Muthulakshmi Research Academy

मन्दं मन्दं तदानीं परिजननिकरैश्चामरैर्वीज्यमानो
दर्शं दर्शं समग्रं गिरिपतिनिकटं भूषितं तत्र तत्र ।
ग्राहं ग्राहं सपर्या बहुजनरचिताः पुष्करिण्याः प्रतीरे
चारं चारं मुरारेर्निकटभुवमगाद्विक्रमी चक्रराजः ॥५०॥

हर्तुं चक्रस्य दीप्तिं रविरिह गगनादेत्य तस्योपरिष्टा
च्चारं चारं चिराय प्रविशति भवनं तावदेवाप्यमुष्मिन् ।
सन्त्रस्तो लोकनाथाद्बहिरिव निवसन्नुत्सवान्ते बभासे
हैमच्छत्रं निजेष्टाग्रहविकलितया सञ्चुकोचात एव ॥५१॥

मयि विलसत्यपि चक्रं दृष्ट्वा मत्प्रतिभटं प्रमोदोऽभूत् ।
सच्चक्राणामिति रविरसूययेवापपात चरमाब्धौ ॥५२॥

तदा किलाभ्यर्थनया सदावलेर्मुदा विनिर्गत्य हरिस्तदालयात् ।
उदारयानप्रवरे गदाधरः पदाब्जमाधत्त मदावलावनः ॥५३॥

चिरतरकृतावासो देवो महोत्सवहेतवे
गत इह बहिर्मोदादेवं विचार्य विभूषणैः ।
कनकवसनैश्चाभूष्याङ्गं गुहेव विनिर्गता
कनकशिबिका रेजे हेमाम्बरेण वितानिता ॥५४॥

कनकशिबिकान्तरगतं देवं केनापि सम्पुटे हैमे ।
न्यस्तं त्रयीवधूटी मकुटी हरिनीलममनुत जनौघः ॥५५॥

कनकचतुरन्तयाने चकास नीलाम्बुदद्युतिर्देवः ।
सुरतटिनी हैमाम्बुजकुट्मलमध्यस्थभृङ्गराज इव ॥५६॥

नखहीरनिकरविलसन्मयूखरेखोत्करभ्रमाधारे ।
ललनाकरनृत्यन्ती शनैश्शनैश्चामरे तदाभाताम् ॥५७॥

आरूढस्तां हैमीं मेरूपमितां रमापतिश्शिबिकाम् ।
घन इव शिखावलानां जनयामासाति सम्मदं नृणाम् ॥५८॥

In Public domain. Digitization Muthulakshmi Research Academy

मद्देवतदिवसेऽस्मिन् जातो भगवन्महोत्सवारम्भः ।
इत्थं प्रदीपरूपस्सस्नेहोऽग्निस्समुल्ललास तदा ॥५९॥

नवकाशसूनसमचामरद्वयी प्रविकासि मारुतधुताम्बराञ्चलः ।
शिबिकागतो हरिरवातरद्गिरेर्नवकामितार्थततिदानधीरधीः ॥६०॥

महाजननिभाम्बुधौ बहुभुजोर्मिसङ्घट्टनै-
र्मिथस्सरभसं तलादुपरि नीयमाना इव ।
महार्घमणयो मरुद्विलुलिताः प्रदीपच्छटा-
व्यरोचिषत शेषभूधरशिरोमणेरग्रतः ॥६१॥

तदनु ॥

पूजास्स्वीकृत्य तास्ताश्शुभतरदशमी वेदिकायां निषण्णो-
निर्गत्य श्रीनिवासः प्रमुदितहृदयो नन्दयन् लोकबृन्दम् ।
सेवाहेवाकमुद्यत्पटुतरपटहव्यूहरोहन्निनादैर्भिन्ने ब्रह्माण्ड-
भाण्डे सपदि गिरिगुहां पङ्कजाक्षोऽप्यविक्षत् ॥६२॥

द्वितीयदिनोत्तवर्णनम्

अन्येद्युः ॥

रसालफलशङ्कया ग्रहणसम्मुखीनैर्मिथः
प्रबुद्धकलहैघर्झषैः प्रचुरपुच्छविच्छोटनात् ।
महामणिरिवोदधेर्वियति दूरमुट्टङ्कित-
श्शुशोभ तरणिस्तदा समुदयन् बलारेर्दिशि ॥६३॥

अङ्गीकृतौषसिकमञ्जुलसत्सपर्याभङ्गी प्रमोदितमनाः कुरुमूर्तिनाथः।
सङ्गीतगोष्ठिरचनाविवशानघान्तरङ्गीकृतः प्रविजहार गुहागृहान्ते ॥६४॥

एतत्सम्प्रति निर्गमिष्यति मम प्रत्यर्थिरोचिर्हरे
श्चक्रं स्थेयमिहास्य मूर्धनि मयेत्यम्भोजबन्धुःक्षणम् ।
मध्येव्योमपदं निधाय समये चक्रोत्सवस्य क्षणा
त्प्राप्ते जातभयः किलास्तशिखरिप्रान्तं तदाशिश्रयत् ॥६५॥

In Public domain. Digitization Muthulakshmi Research Academy

ग्राहाकुलपुष्करिणी त्राणकृते सरभसं किल क्षिप्तम् ।
पुष्करिवरदेन तदा चक्रं तत्तीरमाप वेगेन ॥६६॥

तदनु ॥

मम सुहृदेष द्युमणिश्श्रयति पराद्रिं मयापि न स्थेयम् ।
इति सपदि चक्रराजो गृहीतपूजो गिरेर्गुहां भेजे ॥६७॥

कुरुपतिगिरिनाथश्रीशचक्रोत्सवं तं
विवशितहृदया या वीक्ष्य वीक्ष्य प्रमादात् ।
च्युत इव दिनलक्ष्म्याः कन्दुको हस्तपद्मा
त्कनकगुणनिबद्धो भानुबिम्बो बभासे ॥६८॥

समागतोऽयं हि चिरस्य कोस्तुभस्सुतो
ममेत्यब्जसखं मणिभ्रमात् ।
परार्णवो वीचिभुजाभिरुत्सुक
स्समालिलिङ्गेव पिता हि वत्सलः ॥६९॥

पाश्चात्याद्रितटीमहीरुहचये कीरैर्विलासोत्सुकै-
र्भास्वन्मण्डलपक्वदाडिमफलं चञ्चूपुटैः कुट्टितम् ।
शीर्णं तत्त्वशिवाभ्रपङ्क्तिरुदभाद्रक्तास्फुटन्तश्चत
द्बीजौघा इव सान्ध्यरागमसृणास्ताराश्शनैर्व्यद्युतन् ॥७०॥

एष श्रीमान् सोमबालाय राज्ञे वृद्धिं धत्ते प्रत्यहं श्रीनिवासः।
इत्यौत्सुक्यात्सेवितुं किन्नु देवं मन्दं मन्दं सोमबालो ललास ॥७१॥

गद्यम् ॥

तदानिमेव मुदा नीताञ्जनैरुदारतमामग्रतः महोत्सवसेवार्थमायान्तीं पश्चाद्दजूभूतबालां सम्मुखीनां निजप्रियतमां मिथोविस्तारितोन्नमितमणिमयफणाग्र-घटितताद्दश निजफणाग्रचुम्बता अवक्रवालेन दर्वीकरोर्वीपालेनेव मणिकलशावतंसित-राजतवितानविभूषितोन्नमितमध्येनोभयभागऋजूभूतेन रजतकवचितवंशदण्डेन निखिल-जगदानन्दजनिकां शिबिकां समारुह्य निजसनामायं हरिरिति दिनकरेणास्तमेष्यता

In Public domain. Digitization Muthulakshmi Research Academy
निक्षिप्तेषु बहुकालनिशाकरप्रदेयेषु कलाकलापेष्विव चामरेषूद्धूयमानेषु परिजनैरास्माकीननेतुः कमलासनस्य दिनमिदं महोत्सवेनानन्दयति भगवानिति हर्षादवतीर्य सत्यलोकाद्विलोकमानेन समन्ताद्विस्तृतपक्षेणेव विधातृवाहनवलक्षपत्रेण धवलच्छत्रेण किञ्चिदुड्डीनरजनीकरमवनीधरमुदयन्तन्तुलयन्तं चतुरन्तयानं विभूषयन् स्वभूषणप्रभापटलैश्चटुलैश्चिरकालास्मत्सुखनिवासनिराबाधसौधायमानवरमूर्ति कुरुमूर्ति गिरिवर्तिरमानिवासदिव्योत्सवो निकल एव प्रकटं विजृम्भितः किमिति तूष्णीमन्तरेव महोपलरीतिसदृशीं स्थितिमवलम्बामह इत्युत्सवदर्शनोत्कण्ठया निर्भिद्य रत्नखनीं निर्गतैरिव महारत्नैर्नूत्नैरयत्नोद्दीपितैः प्रदीपैस्सुरूपैर्दूरीकृततिमिरेण सोपानमार्गेण मन्दं मन्दमवतीर्य दशमी वेदिकामवाप्य निषण्णः क्षणं तत्र समर्पितामर्चकैः परिगृह्य सपर्यामपर्याप्तामुदञ्चितनीराजनो वाराङ्गनागानताननिशमनहृष्टान्तरङ्गस्तुङ्गतर मङ्गलतूर्यवर्यभेरीरव दूरीकृत पारावारतरङ्गसङ्घधीरारावेषु हृद्यवाद्यवादनकुशलेषु कुशीलवेषूद्गम्य तस्या वेदिकाया यावत्प्रविशति निजावासगुहां तावदेव रुक्मिणीसत्यभामामुख्यानां शुभाभिख्यानां भार्याणां सुचर्याणामष्टानां नित्यहृष्टानां वल्लभोऽप्येष कृष्णावतारश्रीनिवासः पश्यन्त्यामपि मयि महोत्सवेनोल्लसन्त्यामद्वितीयायां द्वितीयायां दशमीवेदिकामशिश्रयत्प्रायेण चपलाः पुरुषा नास्य पुरतस्स्थेयमितीर्ष्ययेव सा द्वितीयापि तृतीयागमहेतुरासीत् ॥

तृतीयदिनोत्सववर्णनम्

पद्यम् ॥

शेषाद्रीश्वरकार्तिकोत्सवकृते पूर्वाचलाख्योन्नत
स्तम्भाग्रं प्रतिरश्मिसन्ततिकृता बन्धः प्रभाबन्धुरः ।
प्रत्यूषाभिधपूरुषेण रचितोत्कर्षस्समारोपितो
दीपः किन्नु महान्विभावसुरभादन्येद्युरैन्द्रीमुखे ॥७२॥

वैतालिकगीतालिविधूतानघ निद्रधीरा
बहुधारालकृपाराजिसमुद्रम् ।
आरादथ नारायणमाराधयितुं तं
श्रीदं सममोदन्त शुभोदन्तमनन्तम् ॥७३॥

In Public domain. Digitization Muthulakshmi Research Academy

जातं नैजशिरस्थले पृथुतया तत्रोद्गतं मौक्तिकं
दन्तीन्द्रावनदक्षिणाय हरये भक्त्यार्पयन् कुञ्जरः ।
बिभ्राणः किल कुम्भयोर्भृतजलं कुम्भं दधद्राजतं
दिव्यं मज्जनहेतवे समुदगाच्छ्रीपुष्करिण्यास्तदा ॥७४॥

रात्र्या विस्मृत एष कश्चन शिशुर्भानुश्च तस्या रिपुः
कां वाप्नोति गतिं बतेति करिणं भ्रान्त्वा घनज्योतिषम् ।
तिग्मांशोः परिरक्षितुं सुरपथादागत्य तन्मस्तकं
जिघ्रंश्चन्द्र इव व्यरोचत महान् कुम्भस्तदा राजतः ॥७५॥

अतिमितकलितप्रहसनकलिकामसृणिततुलसीदलततिभिरलम् ।
कुरुमतिशिखरेऽर्चकवरततिभिर्हरिपदकमलार्चनमरचि तदा ॥७६॥

धनुर्मात्रोर्ध्वस्थे चरमशिखरीन्द्रस्य तरणौ
समेतानान्दिव्योत्सवकलनहेतोरथ नृणाम् ।
महापापव्यूहच्छलनिशिचरच्छेदनकृते
रुषा नुन्नं नूनं दितिजरिपुणा चक्रमुदगात् ॥७७॥

उद्धूतसहस्रारोऽप्येष सहस्रारभासुरावयवः ।
आगात्स चक्रराजो वेगात्पुष्करिणिकां यथापूर्वम् ॥७८॥

विधुकरसङ्गतिविधुरः पुष्करिणीं तां तदा धृतोल्लासाम् ।
विततान चक्रराडिति युक्तमिदं को न जानीते ॥७९॥

लक्ष्मीनिवासकरपुष्करनित्यमैत्र्या
चक्रेशपङ्कजसखौ सदृशौ तथापि ।
आद्यस्त्वपश्चिमगिरीश्वरमध्यरुक्षदन्त्य-
स्तु पश्चिमगिरेश्शिखरे विरेजे ॥८०॥

हरिकरकृतवासे भासुरे चक्रराजे हरि-
पदवसतिं मां चक्रराजं धरित्र्याम् ।
परिगणयति को वेतीर्ष्ययास्तङ्गतोऽर्को
भवति हि बलभाजा दुर्बलस्येह बाधः ॥८१॥

In Public domain. Digitization Muthulakshmi Research Academy

तदनु ॥

दृष्ट्वा चक्रमिदं निजप्रतिभटं स्थातुं पुरोऽस्माद्भिया
भानुर्मज्जतु सागरे मम पुनर्भीतिर्न जातूद्भवेत् ।
अस्याधस्थितवर्णमञ्जुलतनोरित्थं प्रतीच्या मुखे
नूनं वज्रललाटिकाकृतिरभाद्बालस्सुधादीधितिः ॥८२॥

अपि च ॥

वाणीशेन वलक्षपक्षघुटिकाखण्डेन नाकस्थली
राराजत्फलके समग्रसुदृशां मोदार्थमादौ मुदा ।
न्यस्ता मञ्जुलकामवृत्तसरणिप्रस्तारसम्बन्धिनी
रेखा किन्नु गुरुत्वसूचनकरी बालेन्दुरेखा बभौ ॥८३॥

गद्यम् ॥

तदनन्तरं तत्र विधात्रा वियन्नीलपत्रे तमोमष्यायं कुरुमूर्तिनाथ नखरेखिका-विजितश्चन्द्र इति लिखितायां प्रक्षिप्ताभ्रकपरागायां कालातिपाताच्छुष्कायां प्रथमवर्णा-वल्यामगृहीतपरागायां सवर्णतया तत्रैव लीनायां सद्यो लिखितत्वादार्द्रतया गृहीतपरागे विसर्गसहितचरमभागाधस्थितरेफवर्णरेखाविशेष इव राजमाने तारकाद्वयोल्लसितोपान्ते बालचन्द्रे निरन्तरसन्तोषसन्ततिदन्तुरितान्तरङ्गरङ्गदनङ्गभङ्गकरसुरपुङ्गवमुखगगनाङ्गणचर-तरङ्गिततुङ्गतरशृङ्गततिमङ्गलतमस्मूर्तिकुरुमूर्तिधराधराग्रेसराग्रभागस्थिरास्थली परिसरा-तिराजद्वरात्मदिव्यभवनद्वारावनावारात्परिवारावलिभिरुपानीतं कृपानिधिर-पारकुतूहलः मामकीनगिरिवरशिरोमणेश्श्रीनिवासस्य दिव्योत्सवे प्रवृत्तेऽपि किमिति गाढान्धतमसबन्धुरे पाताल एव जाता वसतिर्भवामि नवामिमां भगवन्महोत्सवरीतिं निरीतिं विलोक्य निशम्य च तत्र तत्र भक्तावली गीयमानास्तदीयदिव्यस्तुतीस्सहस्रतययुगलं नयनानां नयामि सफलतामिति सद्यो निर्भिद्य धरणीतलं निर्गतमिव निजदीप्तिविधुततुषारगिरि-कान्तिविशेषं शेषं धृतफणमणिविभूषं समारुह्य रमाकान्तो निजस्वसुर्हिमाद्रिसुताया वासरोऽयं निखिलजगदानन्दस्थूललक्षीक्रियते किलास्मज्जामात्रा सिन्धुजाकान्तेन दिव्योत्सवसङ्गतेनेति तुङ्गतरवत्सलान्तरङ्गया गङ्गया उपहारकृते प्रेषिताभ्यामिव वीचिभ्यामनीचीभ्यां चामरमञ्जरीभ्यामभिवीज्यमानः निजधिनाथशेषोत्सवसेवनकृते

In Public domain. Digitization Muthulakshmi Research Academy

सद्यो रसातलादुद्गत्य श्लाघाविघूर्णमानफणामणिषु विलोकमानेषु फणाधरेष्विव प्रदीपज्वलाविराजिताग्रेषु दण्डायमानवसन कलितमहावर्ति-काकदम्बेषु परिजनकर-गृहीतेषु पुरा किलास्मत्सनाम्ने शुद्धभावाय वसुदेवाय बहुतरप्रदत्तहिंसं कंसमयमेव ध्वंसयामास पुंसामवतंस इति प्रशंसत्स्विव अमन्दमधुरध्वनिजनितजगदा-नन्देष्वानकदुन्दुभिबृन्देषु मन्दन्मन्दं कन्दलितानन्दानारचयन् भक्तनिचयानवरुह्य गिरेरधित्यकाप्रदेशाद्दशमीवेदिकायामूरीकृतार्हणो मन्दमन्दगिरि-निर्झरश्रीकरनिकरकोर-कितत्क्षणोन्मीलितमारुतकिशोरसेवनपरिमुषितव्यायामायासः पुनरस्यारुह्याचलाग्रं मनोहरवदनचन्दिरया कचरुचिविजितेन्दिन्दिरया साकमिन्दिरया कन्दरामन्दिरान्तम-विक्षदक्षीणकृपाबन्धुरो जगत्सुन्दरः ॥

चतुर्थदिनोत्सववर्णनम्

पद्यम् ॥

पावयति मुरारिरयं मामिति दिवसश्चतुर्थ उदियाय ।
नूनं शेषाद्रिपतेश्शूद्रेषु कृपेति मुनिजनैर्गदितम् ॥८४॥

तदानीम् ॥

धूतश्चक्रस्य भासा प्रतिदिनमभवं नागमिष्यं किलास्य
प्रत्यक्षं नाभविष्यद्यदि मम दिवसाधीश्वरत्वं किमद्य ।
कार्यं कर्तव्यमेवेत्यतितरविमना लङ्घयैकांशमर्धं
पूर्णं बिम्बं स्वकीयं दिनकर उदये दर्शयत्किं क्रमेण ॥८५॥

तदनु ॥

गजराजमुखदिनमिदं महोत्सवैरञ्चयत्ययं देवः ।
इति हर्षादिव गजराण्मञ्जनकलशीमुपाहरच्छिरसा ॥८६॥

यद्वा ॥

मुक्ताबृन्दमिहास्तिमामकरुचिप्रत्यर्थिदीप्तीतित
द्वेत्तुं रोषवशादुपेत्य गगनात्कुम्भद्वयाग्रस्थितम् ।
स्थूलं तारमिवाथ राजतघटं मूर्ध्ना मुदा लालयन्
दन्तीन्द्रः कमलेशमञ्जनकृते पूर्णन्तदोपाहरत् ॥८७॥

In Public domain. Digitization Muthulakshmi Research Academy

कुरुमतिशिखराग्रभागे प्रभाकरकरनिकरेण जातप्रभे ।
सरसिजनयनोऽपि मोदं दधौ सरभसरचितात्मपूजोऽर्चकैः ॥८८॥

एनं पश्य सुमालिरुद्धमचलं दिव्योत्सवे श्रीपते
रित्युद्यज्जन जल्पितश्रवणतः क्रुद्धेन दैत्यारिणा ।
नुन्नं किन्नु सुदर्शनं सरभसं दिव्यालयात्प्रोद-
गात्सत्यासत्यविवेचनेऽपि विवरं क्रोधो न धत्ते बत ॥८९॥

इष्टार्थसिद्धिमनवाप्य पुरा शिशुत्वे
रुष्टस्समीरतनुजोऽद्य विजृम्भतेऽसौ ।
मां भक्षयेत्फलधियेति महाभयेन
पाश्चात्य सिन्धुसलिले मिहिरो ममज्ज ॥९०॥

अस्तं यातस्सुहृदि हरवीराजते चन्द्र एष
प्रत्यर्थी मे किमिह कलयामीत्यलं चिन्तयेव ।
वेगादागाद्धरिपरिसरं पुष्करिण्याः प्रतीरात्
स्थाने तत्रामितमुदमधाच्चक्रराट् चक्रिगेहे ॥९१॥

गद्यम् ॥

तदनु हनुमन्महोत्सवसूचकेष्वास्माकीनरूपसौभाग्यहरोऽयं सितकरोऽद्य तनुतर इति विचिन्त्य तमाह्वयमानेष्विव सङ्गरायाभङ्गुरसुवर्ण कोणाहति समुज्जृम्भमाणनिश्शङ्क-भाङ्कारधीरवादेन वर्तुलतरपुष्करघटित धवलाजिनेषु महादुन्दुभिवरेषु निर्गत्य भगवान् स गुहामुखात् पुरतः पुरा किलाञ्जनाचलशिखरभवद्वितीर्णवरसमासादितोऽयं तव बालकमिमं परिपालयेत्यञ्जनयेव समर्पितं बहुतरपुरस्समुच्छूनवर्तुलापाटलनासि-कौष्ठाधरचिबुकमण्डलतया शैशवासम्पूर्णमनोरथतया संस्मृत्य तमवमानमिदानीं निगिलन्तमिव बालभानुमन्मण्डलं हरीश्वरत्वप्रकटनायेव पिङ्गलतराभ्यां विलोचनाभ्यां मनश्शिलापाटलशिखरप्ररूढवैदूर्याभ्यामिव महागिरिं ताराधिपनिग्रहप्रमुदितहृदयस्य मम पुरतः क एष ताराधिपसंज्ञां वहतीतीर्ष्यया सरभसं भक्षितस्य वलक्षकिरणस्य विकलाभ्यामिव शकलाभ्याम् ओष्ठप्रान्तविनिर्गताभ्यां दंष्ट्राभ्यां रमणीयेन प्रवालदायादेन वदनेन उभयतोदृश्यमानशृङ्गचन्द्ररेखा मध्यभागपिधानकृता सन्ध्याम्बुदेनेव गिरिमलङ्कृतं

In Public domain. Digitization Muthulakshmi Research Academy

जलधिसमुल्लङ्घनावसरतारापथसरभसगतिवशकण्ठावसक्तनक्षत्रमालिकयेवाद्यापि दृश्यमानया नक्षत्रमालिकया मन्दश्च्योतन्निर्झररमणीयं धरणीधरं विडम्बयन्तं निजनन्दन-सुग्रीवकार्यसर्वस्वधूर्वहोऽयमितिवात्सल्यादुपागत्याजिघ्रता मूर्धानं सहस्रकिरणेन करैरिवालिङ्गितं कनककिरीटेन घटितोत्तमाङ्गं प्रचुरसुवर्णोपवीत हारावलिभिराराजितं समरसमयेषु निरतिशयदुरितभरितचरितनिरतनिशिचरचरण-व्यतिकरोऽपि जातोऽनयोस्तदुदितमुरुतरं दुरितभरं श्रीनिवासस्य शरदुदितदिनकर-करनिकरपरिफुल्लसरसिजतल्लजदौर्ललित्यनिर्लोडनमल्लचरणपल्लवयुगलपरिचरणेन निर्वापणीयमितीव प्रसारिताभ्यां करतलाभ्यामहो कियद्भाग्यं ममेतीवाभिनयन्तं काञ्चनवसनपरिकलितसंव्यानतया भविष्यत्ययं सरस्वतीनाथ इति हर्षवशात्तदंश-जनितयेव सरितादत्तोपगूहनं पश्चान्निकुञ्चितपुरः प्रसारिताकुञ्चितसव्यदक्षिणजानु तया वामो न पुरस्करणीयः दक्षिणः पुरस्करणीय एवेत्यौचित्यानौचित्य चातुरीमिव दर्शयन्तं मामकीनजीवनसमीरकुमारोऽसाविति वात्सल्यादाशीर्षं शरीरपश्चार्धं परिमृशतेव वासुकिना स्फिद्देशालवालनिरङ्कुशोज्जृम्भितोपघ्नसमाश्रय कौतुकोज्जृम्भितानिवार्य शौर्यलताशङ्कामङ्कूरयता वालधिमण्डलेन शोभितं वलयीभूतवालाग्रराजित मकुटाग्रतया कुरुमूर्ति शिखरिशेखरमणिमाश्रितानां न क्वचिदपि विषये साध्वसमिति चक्रं निधाय शिरसि प्रमाणमिव समाचरन्तं भगवन्तं हनुमन्तं तनुमन्तमिव प्रतापराशिं समारुह्य मामकीनकुलतिलक रघुवरसाहायकपारावारपारीणोऽयं हरिराज उत्सवप्रवृत्त इति वीक्षितु मागते सहस्रभानाविव निजरुचिनिग्रहणविग्रहचणभगवद्विग्रहरुचिविलोकनेन जातावमानया किमित्यमुष्मादप्युपरि स्थातव्यं मयेत्यङ्गादधो गलन्त्या निजतनुजया कालिन्द्येव इन्द्रनीलयष्ट्या तदुद्वहनवत्सलतयानुपदमेवावतीर्णयेव च्छायया च मनोहरत्वपात्रे हिरण्मयच्छत्रे समुल्लसति शीर्षभागे पुरा दाशरथिकार्यनिर्वाहत्वराविषय-प्रदत्तान्तरनवस्थानरूपनिजप्रतिज्ञादत्त दृष्टितया न स्वीकृता किल हनूमता मयोदश्चिता-र्हणेति स्मारं स्मारमुत्सवसमयोऽसावस्येति सादरं रत्नाकरेण प्रेषितैरात्मोद्भवमौक्तिक-हारपुञ्जैरिव महापृथुलरत्नैरिव च सन्तोषितामरैश्चामरैर्विद्युद्विद्योतनिर्धूनन सप्रतापैः प्रतीपैश्च जनितया प्रभया यामिनी कलिन्दनन्दनाया गङ्गासरस्वती सङ्गममिव सम्पादयन्नकम्पानु-कम्पाम्बुधिरवतीर्यगिरिवर शिखराद्दशमीवेदिकायां यथापुरमङ्गीकृतसपर्यस्समारुह्य पर्वतधूर्वहन्तं प्रविवेश बहुसुन्दरां निजकन्दराम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

पद्यम् ॥

रचितं विधुसेवनं चतुर्थ्यामपवादो भविता ध्रुवं ममेति ।
नुचिन्त्य किलोज्चलातपत्रं विपुलं तत्क्षणमेव सञ्चुकोच ॥९२॥

तदनु ॥

गगनाब्धिबुद्बुदाः किल तारास्तस्मादुषस्समीरेण ।
दलिता नो यदि कस्मात्तदा न केनापि दृष्टास्ताः ॥९३॥

शठमर्षणकुलतिलकः कृष्णः कविसार्वभौमबिरुदाढ्यः ।
श्रीनिवासविलासेऽस्मिन् द्वितीयमुल्लासमभ्यधान्मोदात् ॥

इति श्रीमत्प्रत्यग्रदुर्गकृष्णकविसार्वभौमस्य कृतिषु
श्रीनिवासविलासाख्ये चम्पूप्रबन्धे
॥ द्वितीयोल्लासः ॥

In Public domain. Digitization Muthulakshmi Research Academy

श्री श्रीनिवासपरब्रह्मणे नमः

श्रीनिवासविलासे - तृतीयः उल्लासः

.....

पञ्चम्यां तद्दैवतनागशिरोरत्नमिव पुरोऽभ्युदितम् ।
रविमण्डलमुदयगिरेर्नवमण्डन मुकुटतां दध्रे ॥१॥

तदनु ॥

अरचितकरिकुम्भद्वन्द्वनिर्भेदनं मां
हरिरिति निगदेत्किं लोक इत्येत्य कुम्भे ।
स्थितमिव सितभानुं तत्कृते रौप्यकुम्भं
दधदिभतिलकोऽभान्मज्जनार्थे मुरारेः ॥२॥

श्रीमत्पुष्करिणीजलेन बलभिन्माणिक्यभासा हरेः
पूजायै पृथुलैकबुद्बदलसच्छीर्षस्तरङ्गो महान् ।
नुन्नः किन्नु सुधांशुमण्डलरुचिं कुम्भं तदा राजतं
पूर्णं मज्जनहेतवे मुररिपोर्दन्ती स्वमूर्ध्नाहरत् ॥३॥

गद्यम् ॥

यावद्भगवानवार्यभक्तिकैङ्कर्यधुर्यजनकल्पितौषसिकसपर्या चर्यामर्यादा-प्राचुर्यापर्यप्ताश्चर्यः कुरुमूर्त्यहार्यधुर्यः गुहायां विहारमङ्गीकरोति तावदेव तदीय कटाक्षसुधाझरीनिरन्तर परिपूर्ण मुक्करकुलकलशाम्बुधिसोमायितेन सोमाव-निपतिबालेन सीतारामाभिध नरपालेनास्माकीनकुलदैवतकुरुमूर्तिगिरिवर्तिदेवताचक्रवर्तिमहोत्सव सेवामिलितानां जनतानामभ्यवहाराय तत्र सत्रं प्रवर्तनीयं यथामर्यादमिति पुरुषोत्तमकैङ्कर्याय तदुचित एव प्रेषणीय इतीव समाज्ञप्ते राज्ञामवतंसेन पुरुषोत्तमराय-संज्ञेऽध्यक्षे तत्क्षणमेव तद्विर्यधित्यका निकाम प्रकाशमाने निम्बजम्बीरकदम्बमुखतरु-सम्भृतोपवनकदम्बाकरे लसत्यम्बापुरे लेखकैरनेकैस्साकं निषण्णे सत्रमुखप्रान्ते तत्र समन्ताद्रोणी-मुखाद्विकीर्यमाणेषु राशीक्रियमाणेषु राशीकृतेषूत्कार्यमाणेषूत्कृतेषु हिमाचल-स्तनन्धयेष्विव तण्डुलराशिषूत्क्षिप्योत्क्षिप्य पिटकैरापूर्यामाणेष्वनारतमापूरितेषु किञ्चित्पूरितेष्वर्धपूरितेषु तत्तद्द्रव्यैरनेकभाण्डेषु आनीयमानेषु मुद्गदलेषु अपनीयमानेषु

In Public domain. Digitization Muthulakshmi Research Academy

चणकदलराशिषु उन्नीयमानेषु राजमाषेषु दीयमानेषु सर्षपेषु आदीयमानेषु लवणराशिषु निधीयमानेषु मरिचेषु स्थाप्यमानेषु गुडराशिषु मरिचकाटवविकृता भवेयुरिति दूरमपह्रियमाणेषु गोधूमपिष्टराशिषूद्धूयमानेषु द्रव्यान्तरपरिपूरणाय रिक्तवसनप्रसेविकाकदम्बेषु कुतूहलाद्रिक्तकुतूततिमवनमय्य सञ्जीकुर्वत्स्वाज्यपूरणाय केषुचित्पूरयत्सु केषुचित्तैलेन कुतूशतं मह्यं देयं मह्यं देयमित्यापतत्सु केषु चिदास्तामिदं मह्यं पुरतो देयं महती त्वरा परापततीत्युच्चैराक्रोशति कस्मिंश्चित्कियच्चिरन्क्षिप्यते समयो दीयतां जवेन न वेत्सि तारतम्यं यद्येवमद्यैव राज्ञे विज्ञापयामीति क्रोधव्याधूयमानभुजे द्विजे कस्मिंश्चित्तिष्ठत तिष्ठत प्रथममुष्मै दीयतां विप्रशतकप्रत्यवसानार्हा स्थालीबिलीयास्तण्डुलास्सोपस्करा इत्याज्ञापयति कस्मिंश्चित्किं तवैकस्यैव जवो जाग्रत्स्वव्यग्रेष्वस्मासु कस्मादेवमिति तत्प्रतिकूलमालपतिकस्मिंश्चित्कोऽसौ तवैतावदुद्धतवचनपद्धतिदौर्ललित्योद्वेल्लनायावकाशं प्रादत्त प्रमत्त तिष्ठतु प्रज्ञादेहे कोऽहमिति जानीषे मा नीचं जल्पीर्जल्पाकभिन्ने गण्डफलके बहुतरमनुतापं भजेरिति भर्त्सयति तं प्राथमिके स्थीयतां स्थीयतामत्र को वा युवयोः कलहारम्भस्सम्भावनीयावेवोभावपि युवामिति समादधानेषु केषुचित्पश्य पुनर्जल्पत्येष दुरात्मेति क्रोधहासलसितमुखे तस्मिन्नत्रन्तरे अहो सत्राध्यक्षा वयमिदानीमेवागता गोदावरी परिसराग्रहारनिवासिनो बलवती खल्वशनायास्माकम-शनाय दीयते वा न वा ब्रूथेति बाहूनुद्धृत्य जल्पत्सु धृष्टेषु केषुचित्कति यूयं समागता इति तान् पृच्छत्सु दाक्षिणात्येषु केषुचित्पञ्चाशद्वय-मित्युक्त्वा कति यूयमिति तान् पृच्छत्सु प्राथमिकेषु शतत्रयं वयमिति वदत्सु द्वितीयेषु मृषाभाषैतेषामागताः पुनरेते त्रिंशद्वदन्ति शतत्रयमिति तन्मर्माविधं वचनमुदञ्चयत्सु पुनराद्येषु दुरात्मानः किं ब्रूथ सन्ति किमये पंचाशद्यौष्माकीणा इति तानधिक्षिपत्सु द्वैतीयीकेषु हन्त सन्त्यास्माकीना इह केचन सद्मनि केचन पद्माकरे केचन पद्मावति सद्मनि केचन ग्रन्थिसदेशे केचन वसुन्धराधिपतिनिकटे केचन न वयं मृषा भाषामहे यूयमिवेति दत्तोत्तरेषु प्रथमेषु नैव युष्माकमपि वचस्तथ्यमिति वदत्सु पुनर्द्वितीयेष्वहो अपि शब्देनैतेषामपि वचनमसत्य-मित्यपहसत्सु मध्यस्थेषु कथं वा भवतु विप्रसात्करणीयमेवैतत्सर्वमिति सर्वजनीनकीर्तिना माहाजनिकधार्मिकत्वेन राज्ञा दत्तानुज्ञा वयं दीयतां यथेष्टमित्याज्ञापयति कस्मिंश्चिदधिकारिण्युत्क्षिप्योत्क्षिप्य प्रस्थानि पञ्चदशविंशति स्त्रिंशदिति परिपूर्य परिपूर्य उत्किरत्सु तण्डुलादीन् भृत्येषु साधु पूर्यतां विप्रा वयमिति प्रार्थयमानेषु तान् केषुचिद्गृह्यतां

In Public domain. Digitization Muthulakshmi Research Academy

गृह्यतां त्वरया समापतन्ति पश्चादिति वदत्सु केषुचिन्न किमप्यानीतं तण्डुलग्रथनाय जाल्मैरस्माभिरिति पश्चात्पुर-तश्चावलोकमानेषु केषुचिदत्रान्तर एव तिष्ठन्त्वेते च्छान्दसा इत्युत्तरीयेष्वेव ग्रथ्नत्सु तण्डुलान् जागरूकेषु केषुचिदत्रान्तरे वन्दिनो वयमाज्ञप्ता राज्ञा भवन्निकटगमनाय दीयतां मोदकार्हा सामग्री महाराजेत्युच्चैरुद्घुष्यत्सु स्तुतिपाठकेषु द्विजन्मनामपि मोदका युष्माकमपि मोदका वा दुरात्मानस्सूपान्नलाभेऽप्युज्जीविता युष्मत्प्रपितामहादयो वंश्या इति धिक्कुर्वत्सु तान् केषुचिद्भूदेवेषु तस्मिन्नेवान्तरे तत्तद्वस्तूपार्जनायागतानां वारवनितानामुरोजयुगलानि तिष्ठत क्षणमिति निवारयत्स्विव निपीडयत्सु केषुचिदहो कियानयं सम्मर्द इति मार्गान्विमोचयत्स्वि-वाङ्गान्यालिङ्गत्सु केषुचित्कुत इहागता असमये यूयमिति लालयत्स्विव केषु चिद्गृहीतचिबुकेषु अहो महानयं फणाधर इत्याजननादृष्ट नागरिकजनतया वेणीविलोकनेन ससाध्वसं वानरप्लुतेनोत्पुत्य जतसङ्घादुज्जीवितोऽस्मि विधिना मम जनन्या गर्भशिशिरः किं बहुनेति कम्पमाने ग्रामेयके कस्मिंश्चित्किम्पल्लवितेन केषुचित्सर्वावयवसंस्पर्श-सुखमयन्नादनुदितैककाचव्ययमनुभवत्सु तत्रान्तरे समागता राजतुरङ्गा दीयतां जवादभ्यूषार्थं कुलुत्थराशिरिति निर्लक्ष्यमाज्ञापयत्सु राजभृत्येषु अत्र दीयतां दृष्टिर्वयमिदानीमायाता इति चर्चरीवाद्यानि वादयत्सु बहुपटच्चरवसनकलितवेषेषु वृषभाजीवेषु जनेषु आस्तामिदं दृश्यतां वेशवार इत्याज्ञापयत्यधिकारिणि कस्मिंश्चित्तत्क्षणं तथेत्यपसार्य सङ्घं भुजाभ्यां गच्छति भृत्ये किमरे कुत्र गच्छस्युन्मत्त इवेत्युच्चैराहूय पृच्छति तस्मिन् वेश्याजनानयनाय वेशवारमिति वदति किङ्करे तस्मिन्नासिकाग्रे निधायाङ्गुलिं हन्त लोके का लोलता वेश्यासु जनानां रामठजीरकाद्युपस्करो दृश्यतामित्युदिते उत्पुत्योत्पुत्य गच्छत्येष इति हसत्सु केषुचित्तदानीमेव कुस्तुम्बुरुणावशिष्यते देहीति याचमानेकस्मिंश्चिद्भूमिस्तुम्बुरुणावशिष्यते वा मत्त इव दृश्यस इति तमपहसति कस्मिंश्चिदन्यत्र शुभगुणचणको भक्ष्यते तुरङ्गैरत्र वस्तुजाते वदेति केनचित्पृष्टे कस्मिंश्चिद्द्विजे शुभगुणचणको भक्ष्यते तुरङ्गैरिति तदेव वाक्यं प्रत्युत्तरयति तस्मिन्नवसरे आर्द्रकं देहीति कस्मिंश्चिदेत्य याचमाने एतद्गृहाण सङ्घसङ्घर्षस्विन्न सर्वावयवतयार्द्रकं जनकदम्बकमिति तस्य पुरतस्समाकृष्य दर्शयत्सु केषुचिद्भृत्येषु किमित्यपहससि मां शृङ्गिबेरं दीयतामित्यभ्यर्थयमाने पुनस्तस्मिन्नास्त्यत्र शृङ्गिबेरं गङ्गाकूलं प्रतिगम्यतामिति तस्मै ददत्सु प्रत्युत्तरं मुहुस्तेषु तन्न चेन्मास्तु विश्वं

In Public domain. Digitization Muthulakshmi Research Academy
याचामीति वदति तस्मिन् हन्त हन्त भवत एव विश्वमपि देयं वा नैव किञ्चिदप्याशा विप्राणामिति हसत्सु पुनस्तेष्वन्यस्य निकटमेत्य नागरं दीयतामित्यापृच्छ्य सर्वमपि नागरमेव दीयते नारण्यमेतदिति तेनापि दत्तोत्तरे पुनरितरमेत्य विश्वभेषजं देहीति प्रार्थ्यते नाप्यश्विनोरासन्नभुवि तिष्ठति विश्वभेषजमित्युक्ते न हि न हि तथा शुण्ठी दीयतामित्यभिगदति तस्मिन् बहुतरप्रार्थनाकुले किं पुनरत्रापि वैदुष्यप्रकटनमेव भवतस्तदानीमेव शुण्ठीति निगदितं यदि कस्मादियानायासस्यादाजन्ममुग्धच्छान्दस गृह्यतामियं याहि तूर्णं कालतिपातो महानासीदित्याश्वास्य ददत्सु तान् दासेरेषु केषुचिदापतद्भिरुत्पतद्भिर्गच्छद्भिगृहीत तण्डुलैस्स्वीकृतगुडैरात्तचणकैरङ्गीकृतराज-माषैरूरीकृतसर्षपैरुररीकृतजीरकैर्लब्धहरिद्राचूर्णैः प्राप्ततण्डुलपिष्टैस्संभृतपाणितै रार्जितक्रमुकैरधिगतघृतैस्सम्पादितवाननारिकेलफलखण्डैर्जनैरामासत्रयमासषष्ट्-कमावत्सरं यथायोगमदनोचितया निखिलसामग्र्या परिपूरितेष्वपि स्व स्व भवनेषु परिपूर्णसमस्तवस्तुजातमेव वृषभाजीवचर्चरीवाद्यशतरवमिलितमृदङ्गनिनदसङ्गतताल-कोटिध्वनिमिश्रित वेणुलक्षनिनादतरङ्गितभिक्षुकडमरुशतायुतचटचटात्कारोज्जीवित जनकोलाहलविजृम्भणानिशमितपरस्परवचनतया किमपि कुर्वित्याज्ञप्तेषु किमपि कुर्वत्सु लवणमानीयतामित्युक्ते गुडमानयत्सु तैलं दीयतामिति पृष्टे सर्षपो दत्त इति वदत्सु आगच्छेत्युक्ते दूरं गच्छत्सु गच्छेत्युक्ते समीपमागच्छत्सु रामठं देहीत्युक्ते कमठस्सरसि तिष्ठतीति प्रतिवदत्सु गुडो गुड इत्याक्रोशत्सु जडस्त्वमेवेति तेन सह कलहायमानेषु उच्चैराक्रोशासमर्थेषु केषुचिदियत्तिन्त्रिणीफलं देयमिति सूचयितुं वर्तुलाकुञ्चिताङ्गुलिं प्रदर्शयत्सु हस्तमुरोजं पृच्छथ वा नास्त्यत्र यात वेशवाटमिति प्रत्युत्तरं ददत्सु किं बहुना नैकविधं प्रवर्तमानासु चेष्टास्वारभ्य पञ्चमी-माससप्तम्यनुपशान्त कोलाहलमभूदभूमिर्महाकविवचसामपि महीयसां सत्रं न तत्रालब्धसामग्री को वा अलालितो वा अमानितो वा अधिक्षिप्तो वा असम्पूर्णमनोरथो वा अनुदितानन्दो वासीदुत्सवार्थमिलितासु जनतासु ॥

पद्यम् ॥

शरणागति भरणाञ्चित करुणात्मन इत्थं
कुरुमूर्तिशिखरिवर्तिन उरुकीर्तिरुदारम् ।
विनमत्सुरममुमुत्सवमुदयत्सु गुणोद्राग
शृणोन्मतिमसृणोऽवनिरमणोऽपि तदानीम् ॥४॥

In Public domain. Digitization Muthulakshmi Research Academy

कुरुमतिमहाभूभृन्नाथोत्तमाङ्ग विभूषण
प्रचुरकरुणापात्रं मित्रं सतां प्रतिभावताम् ।
अमितकुतुकं चित्ते धत्ते स्म मङ्गलमुत्सवं
परिकलयितुं सीतारामक्षमापति शेखरः ॥५॥

नतजनमुदं नाथो नित्यं घनीकुरुते सदा
विबुधविनुतो नूनं नेते दृशो भुवि नैधते ।
अहितदमनौ कानन्तस्य नः कलुषाम्बुधेः
कुरुमतिपतिः पात्वस्मानित्यवनौ नृपतिर्हृदि ॥६॥

आस्तामिदम् ॥

पुरासीद्यश्श्रीमान् सरसकविनाथार्पितकृति-
च्छलानां कन्यानामभवदवनावेकदयितः ।
पुनर्जातो भोजः कविवरकुलोज्जीवनकृते
क्षितावेवं सर्वैरपि निजगदे सद्गुणनिधिः ॥७॥

यस्यौदार्यभरैर्धुतस्सुरतरुर्मारन्दधारामिषा
दश्रूणि प्रविमुञ्चति प्रतिपदं संस्पर्शनात्कम्पते ।
नित्यं संश्रयते मरुत्पदमसौ कुत्रापि यायाद्भिये-
त्येवं तत्परिपालनाय जगृहे चक्षुस्सहस्रं वृषा ॥८॥

सदानन्दीड्यश्रीरजतधरसद्मा सुमनसां
प्रमोदार्थे हेमाचलमहदधच्चापमनघम् ।
यशस्सीमा सोमावनिप इति यः ख्यातिमभज
त्कुमारस्तस्यायञ्जयति यशसा तारकजयी ॥९॥

सीतारामेन्द्रनाम्नः क्षितिपतिशतकैर्मानितस्याथ तस्य
क्ष्माभर्तुश्श्रीनिवासोत्सवकलनकृते जातभक्तेस्सुकीर्तेः ।
आज्ञावश्यैस्समन्तात्कुरुमतिधरणीभृत्तटी यातु मारा-
दाज्ञप्ता मन्त्रिवर्गैः पटुभटपटलाग्रेसराश्चोदतिष्ठन् ॥१०॥

In Public domain. Digitization Muthulakshmi Research Academy
गद्यम् ॥

तदनु ॥कुरुमतिगिरिपतिशिखरविरचितनिलयश्रीनिवाससेवाहेवाकभावाति मुदितख्यातावामानघमति सीतारामावनिपतिदुर्लङ्घाज्ञापथजाङ्किकतया मुच्यमानतुरङ्गाणां बध्यमानपल्ल्याणानां न्यस्यमानखलीनानां भूष्यमाणमदावलानामुद्ध्रियमाणनलकानां प्रविश्यमानकञ्चुकानां प्रतिमुच्यमानसारसनानामामुच्यमानग्रैवेयकाणामुत्क्षिप्यमाण-कैक्षेयकाणां गृह्यमाणासि धेनुकानां नह्यमानशिरस्त्राणानामारुह्यमाणरथानामुह्यमान-खेटकानां नर्त्यमानघोटकानां सञ्जीक्रियमाणोष्ट्राणां नुद्यमानरथानामुत्कम्प्यमानकुन्ता-नामुद्धूयमानोत्कम्पवसनानां क्रियमाणसिंहनादानां कार्यमाणकरिगर्जितानां चाल्यमानकशानां वल्ग्यमानाजानेयानां निरुद्ध्यमानवनायुजानामा-स्फोट्यमानारट्ट-जानामाघट्ट्यमानजयदुन्दुभीनाम् आच्छोट्यमान हस्तानामट्यमानकाम्भोजानामा-वेष्ट्यमानशीर्षण्यपटानां विचेष्ट्यमान कलभानामुन्नट्यमान क्रमेलकानामेहि याहि देहि धेहि निधेहि विधेहि ब्रूहि पाहि जानीहि हरस्व विहरस्व परिहरस्व प्रहरस्वाहरस्वामोदस्व दयस्व विजयस्व ददस्व कुत्र यासि तिष्ठ कदा भूपालमणिर्बहिर्निर्गमिष्यति किं करोति कुत्रास्ते निर्गत एवेदानीं नास्त्यवकाश इति जल्पतां प्रतीक्षमाणानां तद्दर्शनं धिक्कृत प्रतिभटकरटिघटानामुज्जृम्भित प्रतापच्छटानां युद्धरङ्गोन्नटानां बहुधैर्यस्फुटानां दुर्वारसम्मदोत्कटानां यशो विमलितदिक्तटानां मदारुणान्तदृक्पुटानामत्युद्भटानां भटानाञ्च पटलैश्चटु-लैर्निबिडितमभूत्समन्तादात्मकूरुपुरं धिक्कृतामरपुरम् ॥

पद्यम् ॥

सीतारामेण दूरञ्चरणसरसिजाङ्गुष्ठनिष्ठ्यूतकाय
स्सुग्रीवाप्रत्ययं प्राक्तदपि न जनयामास कस्मादिहायम् ।
अयातस्स्याद्दुरात्मेत्यथ च परिजनास्स्वर्णकोणैर्निजघ्नु-
स्सीतारामाख्यभूमीपति मकुटमणेराज्ञया दुन्दुभिन्द्राक् ॥११॥

घनदुर्मदपरिकर्मितरिपुमर्मविदलनधर्मकर्मण्यः।
धृतकार्मुकनिजवर्मभृदतिशर्मकृदुदितनर्मधीर्मन्दम् ।
अतिनिर्दयजनमर्दितघनमर्दलनर्दनार्दनोद्दण्डतरम्
मददुर्दिनबहुदुर्दम रिपुकर्दमतर्दनार्क कुर्दनकलितम् ॥१३॥

In Public domain. Digitization Muthulakshmi Research Academy

बहुसुन्दरघनदुन्दुभिनिनदन्धुरिमन्दराद्रि कन्दरदलनम् ।
पटुपटहपटलचटुरवघटिकं शुश्राव भूपतिश्रेष्ठः ॥१४॥

गद्यम् ॥

तावदेव भावजपरिभावनव्यापारलोलरूपानन्दितनिखिलजनबृन्दो मन्दमन्दमाश्रितानां दाता कामानखिलान् सीतारामावनिपतिस्समुत्थाय सिंहसंहननस्सिंहासनाद्दीयमान-हस्तावलम्बो लम्बमानबाहुना करतलकलितसुकुमारवसनेन परिजनेन सविनयं निवेद्यमानमार्गः पदे पदे रक्षिवर्गैः रक्षिमार्गप्रविष्टमात्रान् मर्त्यानयमयमेवेति जानानोऽपि मानाधिक गाम्भीर्यादप्रकाशित-कुतूहलो यथामर्यादमार्यांस्तांस्तान् सम्भावयमानस्सगौरवं मत्सनाम्नस्सोमभूपालस्य नन्दनोऽसावित्यादरान्मूर्धानमुपाघ्रातुमुपर्युपरि मकुटं लम्बमानेन सौकुमार्यसौन्दर्यविलोकनविवशितहृदयतयालिङ्गितुमधःप्रसारितैकतर भुजदण्डेन बहुतरतारकापरिवृतेन सकिरीटेनेव चन्द्रमसा रजतदण्डाग्रमधिष्ठितेन बहुतरमौक्तिक-ग्रथितपट्टसूत्रप्रान्तजालकेन सहिरण्मयकलशेन विशदातपत्रेण विभूषित-मुकुटीतटः तत्तादृशसौन्दर्यावमानितनया जितोऽस्मीत्युपहारकृते कन्दर्पेणार्पितैस्तुरीयबाणनव-मल्लिकामतल्लिकामालिकापुञ्जैरिव चामरैर्वीज्यमानो निर्गत्य मामकजनकरत्नाकरजनितानि बहुविधानि रत्नानि सन्त्यात्मकूरु पुरभूपालान्तःपुरे तान्यानीयन्तामिति चन्द्रमसा ज्ञप्ततया प्रविश्य तूर्णं निशासु गवाक्षमार्गेणापहृत्य बहिर्धृतं यदि पश्येयुरिमे सौविदल्ला इति भिया निगीर्यापि मुकुरसच्छात्रदीप्तितया स्पष्टमुदरान्तर दृश्यमानापहृतरत्ना एता इति कुपितैः कञ्चुकिबृन्दैर्निगलिताभिस्सूक्ष्मतरं तारपरिवृताभिः पृथुलतारकाभिरिवान्त-स्समुज्ज्वलद्दीपकोरकाभिस्स्फटिकघुटिकासरविसरपरिकीर्णाभिर्वर्तुलस्फाटिक-पात्रीभिर्मनोहरात् चतुःपञ्चषड्दलघटितदर्पणमयकमलप्रतिबिम्बितसञ्चरन्मनुज-मुखानेकत्व प्रदर्शनेन पङ्कजासनशङ्करकुमारप्रमुखास्सर्वेऽपि मय्येव सन्ति तदखिल-लोकोत्तमसम्पत्तिमेदुराहमेवेत्यपहसत इव सर्वलोकसम्पदं दर्पण विसृमरशुचिरुचिव्याजेन सर्वतः प्रतिबद्धशुद्धविपुलबहुमुकुरनिकरतयान्तःप्रविष्टान् किं वयमपि विश्वरूपा अभूमेति चित्रितचित्तानारचयद्भिरनेकविहारगेहैर्निबिडितात् श्रेणीभूतरत्नघटि-तादपि निश्श्रेणीभूतरत्नघटितात् लसद्वारललनादपि विलसद्द्वारललनात् आस्थानात् गगनभागमिव सकलशस्तम्भाभिरामं राममिव परशुभवच्छीधरं धरणिधर-चक्रवर्तिनमिव सानुगतकान्तसुरमणीबृन्दं बृन्दारकेन्द्रमिव गारुत्मतपक्षकान्तस्थगितवज्रं वज्रमिव

In Public domain. Digitization Muthulakshmi Research Academy

स्वरूपलालिताभिख्यासुन्दरं दरमिव मनोहरललनाकन्धरा प्राप्तसाम्यतयोल्लसन्तं सन्तमिव अनन्तरूपदर्शनानन्दितसच्चित्तं विलोकय न्राजमन्दिरप्रदेशं निर्गत्यैककक्ष्यायाः पुरतस्सज्जीकृत पश्यत जना अनेनैवातिकर्कशतरेण करेण मम कोमलाङ्गीनाम-प्यूरुस्तम्भास्तुलिताः कियद्भागधेयं ममेति प्रदर्शयितुमिव जनानां प्रसारयन्तं मुहुर्मुहुर्विविध चित्रशृङ्गारितं शण्दादण्डं मुहुर्मुहुः करपुष्कराञ्चलनीरन्ध्रनिष्ठीव्यमान विमलजलशीकरनिकरतया स्वयमपि चामरमिवान्दोलयन्तम् अहोस्वित्पदे पदे निषादिकरकलितनिरङ्कुशाङ्कुशघट्टनवेदनासहनतया निजजन्म भूमिमपि परित्यज्य कुत्रापि यातुं नासिकाविवरान्निर्गतान् मौक्तिकपुञ्जानिवात्मजवत्सलतया राजसमीपं यातेत्युत्किरन्तम् अयं हिमकराभिख्यां वहते प्रवृद्धो यदि स्यान्नूनमनेन स्याद्बाधा गजानां तदधुनैवैनं ध्वंसयामीति स्मारं स्मारं मकरबाधितमात्मकुलकूटस्थं गजराजं रोषाच्छर्वणायास्यनिक्षिप्तबालचन्द्रमिव दन्तद्वयेन सुन्दरं निषादिहस्तोदस्तसृणिघट्टनसमय मन्दमन्दधूयमानशीर्षतया इमौ मम कुम्भौ नवयौवनोद्धतानां वनितानां घनतरस्य कुचयुगलस्य साम्यसीमां समारोपितौ विद्वद्भिरितीव श्लाघमानं शश्वदान्दोल्यमान-विपुलकर्णयुगलतया जन्म श्रीमानयं सीतारामभूपालो ममोपरि कनकमण्डपे निषीदति यत्किञ्चिदुष्णांशुकरव्यतिकरेऽपि परिश्रान्तिं भजेदिति तालवृन्तद्वयप्रेङ्खणमिवाभ्यस्यन्तं चकचकितकनकपरिस्तोमभूषितपश्चार्धतया शरत्समयान्निजदयितघनाघनादर्शनजनित-विरहविकलान्तरङ्गाभिरयमेवास्मद्वल्लभ इति भ्रमाद्विद्युल्लताभिर्जवादि-वालिङ्गितं वर्तुलाग्र-लम्बमानपुच्छतया कटकभागवल्मीकविनिर्गतविस्तृतफणलम्बमानकृष्णफणि सुन्दरमिव मन्दरं तुलयन्तं मुदावलमानं मदावलमेनं विलोक्य विन्यस्य पञ्चषानि पदानि स्फुटतररागा-वलीकलितभोगावलीपठनचटुलसुन्दरवन्दि बृन्दविश्राणितजयजयशब्दो जयाशीर्वचनपूर्वकं द्विजव्रजप्रदत्तान् करकञ्जमञ्जुलकिञ्जल्कपुञ्जानिवाक्षत-जयानक्षतचयान् सङ्गृह्णानो विनयविनमितोत्तमाङ्गतया वदनचन्द्रातिमात्र सन्निधानात्तत्क्षण सङ्कुचितेन भक्त्युन्नमितेनाञ्जलिपद्मेन यथोचितं मानयंस्तांस्तन् समीक्षमाणोऽध्यक्षाननुक्षणमखिलान् सैनिकांश्च निजविरोधिगजराज विलोकनसाध्व-सादिव प्राप्तसङ्कोचानां तुङ्गरङ्गत्तुरङ्गतरङ्गसङ्गत वाहिनीसमुन्मीलदम्बुजकुट्मलानामिव तदुदञ्चितानामञ्जलिपुञ्जानां निजवदनचन्द्रकटाक्षचन्द्रिकाप्रसरणेन चिरस्याप्यप्रदत्त-विकासस्सादरं प्रदत्तकरावलम्बः परिजनैरुपेत्य तस्य गजराजस्य निकटं

In Public domain. Digitization Muthulakshmi Research Academy

रजतनिश्रेणिकामार्गेण ध्यायं ध्यायं श्रीमत्कुरुमूर्तिधरणीधरचक्रवर्तिशिखरविरचित-नियतनिवासं श्रीनिवासं सानन्दगद्गदस्वरस्तदग्रप्रतिबद्धं मरकतकपरिखचितशिखरं महानीलमणिजालकलालितमौलितटं शुम्भच्छातकुम्भस्तम्भाग्र गुम्भितजम्भरिपुमणिरुचि-सम्भृताम्भोधरकदम्बप्रभाडम्बरं कलिकरुचिमण्डलं कनकमयमण्डपं पश्चान्ममत्वमेवा-रोहेति सुगुणसान्द्रं मन्त्रीन्द्रं वेङ्कटरेड्डिवर्यं शुभचर्यं समाज्ञाप्य समारुरोह।।

पद्यम् ।।

पङ्कजनयनपदाम्बुज सङ्कलितमतिः कृती गजेन्द्रं तम् ।
वेङ्कटरेड्डिवरोऽयं समारुरोह क्षमापतेः पश्चात् ।।१५।।

तावद् ब्रह्माण्ड भाण्डत्रुटनपटुतरोद्दण्डदण्ड प्रचण्डा
घातस्फीताविगीत स्फुटपटहसटा भेरिकाधीरनादैः ।
हेषाघोषात्तहस्तोद्भटकरटिघटागर्जिताल्यार्जिताति-
स्थैर्यैश्चर्यैरवार्यैर्भृशमखिलदिशान्दन्तुराण्यन्तराणि ।।१६ ।।

विशारदकशाहतिप्रतिपदोज्ज्वलन्नाटकै
र्भृशात्मबलशात्रवव्रज महामदोत्पाटकैः ।
स्थिराकृतिखुराहतिक्षणधरातलास्फोटकै
रनर्तिपरिवर्तितैस्स्फुटसटाच्छटैर्घोटकैः ।।१७।।

स्फुटतरदन्तकुन्त परिघट्टनकुट्टमितै
श्चटुकरदण्डकुण्डलनशौण्डतरैश्चतुरैः ।
अभवदति प्रभैर्घननिभैस्तदिभैश्शुभै
र्धुरिनगरान्तरं बहुलदन्तुरितं त्वरितम् ।।१८।।

गद्यम् ।।

तदनु यथाक्रमं प्रथमं कुरुमूर्तिशेखरमणिश्रीनिवाससाष्टाङ्गप्रणिनं सा कौतुकप्रसारितवरूथिनी वनिताभुजलताशङ्कामरमहीरुहायमाण समुदञ्चितपताकाकृता-लङ्कारः करिवरः तदनन्तरं मदग्रजाग्रदव्यग्र हृद्यवाद्यनिनादाटोपेनैव भूपालस्य कीर्तिपूर्तिः ख्याप्यत इति हर्षोत्कर्षादिव वल्गन्वल्गुतरः क्षणे क्षणे सादिकरकलितकनककोणाहति-जनितटाङ्कारप्रशस्तयशः पटहयुगलघटितपल्ल्याणो जवविजितविहङ्ग एकस्तुरङ्गः

In Public domain. Digitization Muthulakshmi Research Academy
तत्पश्चाद्रक्तोष्णीषनीलकञ्चुककान्तैः धृतकुन्तैः कशात्रयविशारदमतिभिस्सादि-पतिभिस्समाढौकितानिर्मितोर्मिगति विशेषास्सतोषास्त्वरापराकृतगन्धवाहावाहाः तत्पाश्चात्यभाग एको गजराजः तत्पश्चात्सेना ललनाधृतशरदुत्फुल्लहल्लकतल्लजमाल्य संशयाशंसिपाटलोष्णीषमालाजालावृतशीर्षास्सहर्षाउभयनितम्बलम्बमानाञ्चलचञ्चदरुण-सारसनावनद्धकटितटाः धवलतरकञ्चुकान्तरीयकवचाः गण्डमण्डलयुगललम्बमानकचाः यथाक्रमनिबद्धच्छटाः भटाः तत्पश्चादेको वारणेन्द्रः तदपदान्तरमेव निखिलजनरञ्जनघन-निनदहृद्यहूणवाद्यवादनचतुरकोणाभिरामपाणयश्श्रेणयः पाणिघानां वैणिकानाञ्च तदनन्तरमेवैको मदावलः तदव्यवहितमेव सैन्यलक्ष्मी-पृथुलमुक्ताहारायमाणराजतघुटिका-नाराजिताग्रशीर्षण्यशेखरिताः पाटलतरवर्माणः पराक्रमैकधर्माणः निर्मितपोषकशर्माणः निरन्तरकृत जयनर्माणः विचित्रकर्माणः विविधपरिकर्माणः प्रोत्क्षिप्तनलकाः धृतकरवालकाः असितान्तरीय कञ्चुकनिचोलिताधः प्रदेशा बहुप्रकाशाः पदातीशाः कोटिशः पङ्क्तीभूताः तदनुपदमेव चन्द्रमण्डल पाण्डुराखण्डडिण्डिममण्डलजर्झरित-निर्जरनिर्झरगर्जनझर्झरनिर्दयमर्दितमर्दलपणवगणवरतालजालमङ्गलतुङ्गशृङ्गसुमुखगोमुख पटपटात्कृतिचटुलपटहपटलनिर्यद्ध्वनितूर्यकलित-हस्तास्समौलिमस्ताः प्रशस्ताः पुरस्ता-दुदस्तावलयस्तदनुसृतमेव वाद्यमानवाद्यविशेष निस्सरट्टङ्कारसहचर निजकुण्ठाकुण्ठ-नादास्सहचरा इव घटोत्कचस्य सनाभय इव कबन्धस्य सच्छात्रा इवातिकायस्य सब्रह्मचारिण इव कुम्भकर्णस्य सगोत्रा इव नरान्तकस्य सीतारामभूपनाममात्र-श्रवणजातदृढतरभक्तयस्समागता इव विभीषणपालिताल्लङ्कापुरात्तत्रत्याश्शिशव इव तमसस्सूर्येण बालका इति करुणयावशेषिताः गजा इव कौतुकादवलम्बितमनुजरूपाः महाकोपाटोपाः कालयवनकुलीनाबलीनानिलीना एव शतेन सहस्रेणापि योधानां युद्धयमानाः प्रतापवन्तो नलकवन्तो द्रवन्तस्तदव्यवहितमेव नहि नहि भवानप्यस्मद्भूपति-सरूपवैभव इति शिरस्तिरश्चालनपूर्वकं निन्दद्भिरिव सङ्क्रन्दनं किङ्करकरनिश्शङ्क-कम्पितैस्सक्किङ्किणीरवैरत्युन्नतैरामूलाग्रं रजतवल्लिवेल्लितैः कामिनीतनुलता-समाश्लिष्टकामुकाकारं दधानैः प्रफुल्लैश्शृङ्गारभल्लैरतुल्यैस्तत्पश्चात्पुरुषाभ्यां द्वाभ्यां पार्श्वद्वयेऽपि मुहुर्मुहुरतिरभसोल्लङ्घनदौर्ललित्य निरोधसाटोपपरिगृहीतप्रग्रहतया उन्नमितनिगालं न्युब्जीभूतवदनमनेन किल ममापि निरोध इतीर्ष्यया पेष्टुमिव दन्तैर्मुहुर्मुहुस्सखलं खलशब्दं सलीलं मुखलीनं खलीनं चर्वन्तं श्रुतिद्वयमपि शिरसा

In Public domain. Digitization Muthulakshmi Research Academy

मान्यतेऽस्मद्भूपालेन वैष्णवाग्रगण्येनेतीव स्वयमपि शीर्षाग्रभागे श्रुतिद्वयमुदञ्चयन्तं निजाधिनाथरूपसौभाग्यगर्वसर्वस्वनिर्वापणधूर्व- होर्वीपतिवाहनत्वावलम्बनाय समागत्य एतत्तुरङ्गारोहणावसरेषु प्रथममुष्य भूपतेर्यदि नयनपदवी जङ्घालतामाश्रयामि तर्हि बहुतरानुरागं मय्येव भजेतेत्याशया मूर्धमध्यभागमध्यासीनेन परिचुम्बितदाडिमबीजेन मदनवाहन-शुकेनेव मरकतकरचितपक्षेण परिचुम्बित पद्मरागमणि चञ्चूपुटान्तरालेन भूषाशुकेन रमणीयं निजाधीश्वरतुरङ्गादधिकतरोऽयमित्यौत्सुक्यात्समन्ताच्चुम्बन्त्या शक्रधनुर्लतयेव नानावर्णरत्नखचितया भूषामुखरज्वा कमनीयकपोलयुग-ललाटभागं सर्वातिशायिजवमपि मामणुमात्रेण मानसेन समानयन्ति सङ्ख्यावन्तोऽपि कथं सोढव्यमिदमितीर्ष्ययेव प्रतिक्षणं पम्फुल्ल्यमानातिकोमलप्रोथपुटमुत्सृजन्तं सूत्कारान् उच्चैश्श्रवस्त्वेनावयोस्साम्ये स्फुटतरेऽपि कस्मात्त्वमस्मत्तोऽप्यूर्ध्वन्तिष्ठसीत्याह्वयमानमिव सङ्गरार्थमिन्द्रतुरङ्गमं शश्वदुत्क्षिप्यमाणाग्रपादद्वयम् अयं किल तुरङ्गस्य पश्चार्धो वातीति वात्सल्येन निर्जरपतिना परितोषणार्थं प्रदत्तया हैमाम्बुजमालिकयेव पृष्ठभागभसमानया विचित्रसौवर्णकलशकमालिकाग्रथितया कनक वध्र्यावलयितेनान्तरपर्याप्ततया बहिरुच्चलत्तेजोधारासारपुञ्जेनेव वालहस्तेनोदञ्चितेन कामपि कान्तिमुन्मीलयन्तम् अनवक्लृप्तैकत्रावस्थानतया सुधांशुसामन्तदीप्तितया च पारदेनेव निर्मितम् अनुक्षण वदनाग्रसमुन्मीलड्डिण्डीर खण्डपरिकीर्णधरातलतया मदावलैस्सार्धं स्पर्धया स्वयमपि मौक्तिकानीवोद्वमन्तं विविधमणिगणखचित कनकपल्याणपरिष्कृतपृष्ठभागं विद्युल्लतापरिरब्धमिव शारदाभ्रमुर्वीपतेरर्वन्तं गर्वन्तं परितः पङ्क्तीभूता बहुसत्वरगास्तुरगास्तदनन्तरं सेनालक्ष्मीकिरीट इवाग्रभाग राजमाने नूत्नरत्नखचित-सुचिरकनकमण्डपे तन्मध्यभागभासुरं महार्घमणिमिव सीतारामभूपालमणिं तत्प्रकाशनतत्परं शुद्धसुवर्णमिव शुद्धसुवर्णं तत्पश्चान्निषण्णं मन्त्रिवरेण्यञ्च सम्मानयन् कान्ततरदन्तो दन्तावलः परिवृतो बहुतरकरितुरग-भटपटलैः पश्चादेतस्य सौशील्य-दयालुत्वपत्याज्ञापरिपोषण भगवदायत्तचित्तत्वदाक्षिण्यौचित्यमहौदार्यानीतिमुखनिखिल-गुणतोषिततया परितोषणार्थं सरस्वत्या प्रदत्तैरिव हंसैर्धवलच्छत्रचामरैर्विभूषितशिरः पार्श्वभागां परिवारशतान्दोलिकासङ्घपरिवृतामधिरुह्यान्दोलिकां भूपालाम्बा लक्ष्म्यम्बा तत्पश्चादान्ध्र-कवितागङ्गातरङ्गमिव रङ्गन्तन्तुरङ्गमुभयथाप्यमध्यमवर्णमधिरुह्य वाजिधीरोऽपि न वाजिधीरः प्रविमलकायस्तिरुमलरायस्समारूढगन्धर्वः वेङ्कटरायश्च

In Public domain. Digitization Muthulakshmi Research Academy
तत्परितश्चाक्रामन्त इवाकाशपदवीं पातयन्त इव तारकाः पिबन्त इवाम्भोधिश्चर्वन्त इव रिपुच्छलघासान् चूर्णयन्त इव पर्वतान् घूर्णयन्त इव दिग्गजान् दारयन्त इव भुवं विसृजन्तो हेषारवानुत्क्षिपन्तः पदाग्राणि आकर्षन्त आकुञ्चित शीर्षं सादिक-राग्रात्प्रग्रहानास्फाल्यास्फाल्यस्कन्धान्वा मकरतलाकृष्टखलीनरश्मिदृढतर गृहीत पल्ल्याणमुखं वन्कान्तरनिहित वामचरणमधिरूढैस्सादिभिः कशाचलनमात्रप्रेरिताश्शत-शस्सहस्रशश्च पङ्क्तीभूतायुद्धरङ्गाखेटका घोटिकाः महासेनाजनितपारावार-भ्रमावतीर्णसगर्जन पर्जन्यशङ्का समार्जन चतुररिपुतर्जनस्फूर्जदूर्जस्वलघूर्णमान-चक्रनेमिसमुदीर्ण विशृङ्खलक्रेङ्कारसकलवीरजनहृदयानन्दनास्स्यन्दनाश्च बृन्दं बृन्दं प्रचुरमदबन्धुराणां सिन्धुराणामुपरि विशृङ्खलं ताड्यमानानां भेरीणां भाङ्कारैश्शिथिली-कृतेष्विव दिङ्मुखेषु मन्दमन्दमेवमग्रतो निदधुः पदं नगरीतोरणात्सवारणात् ॥

पद्यम् ॥

उच्चण्डैर्हिण्डमानैर्मदकरटिघटोद्दण्ड शुण्डा प्रकाण्ड
स्फीताघातातिभीतात्मभिरभिवियदुल्लङ्घना जाङ्घिकैस्तैः ।
काण्डव्यूहाण्डजेन्द्राद्भुतगतिलहरीखण्डनाखण्डशौण्डै
स्तूर्णं कीर्णात्युदीर्णैः क्षितिरतिरभसस्वान्तरङ्गैस्तुरङ्गैः ॥१९॥

रूक्षा उत्क्षिप्तकैक्षेयक थलथलिताखण्डदिङ्मण्डलीका
स्साद्यध्यक्षाश्च दक्षाभटकृत नलकोद्धुक्षणानुक्षणोग्रैः ।
फाट्कारैर्भीत भीतांश्चटुकृतनटनान् सामिक्लृप्तापसर्पान्
किञ्चिच्चञ्चत्खलीनं धुरि निजगृहिरे केऽपि तुङ्गास्तुरङ्गान् ॥२०॥

भेरीभाङ्कारभीताः कतिचन तुरगा उत्क्षिपन्तोग्रपादान्
स्तब्धश्रोत्रास्सुगात्रा विषमतरखुरास्सामिक्लृप्तापसर्पाः ।
आरूढैस्साधु नुन्ना मुदिततरहृदं चक्रिरे लोकमानं
लोकं सर्वस्य हृद्या परमपि कुटिला स्वानुरूपा हि चेष्टा ॥२१॥

कटुतरचण्डभानुकरतापभरं सहते
नहि मम पालकोऽयमिति सादरया धरया ।
विपुलमुदञ्चितं दिवि वितानमिवातिघनं
रज उदजृम्भताश्वखुरदारुणदारणजम् ॥२२॥

In Public domain. Digitization Muthulakshmi Research Academy

तुरगवरखुरखराहतिधूलीपालीमुहुर्व्यजृम्भिष्ट ।
एकातपत्रलीलामाकाशे बिभ्रतीवरूथिन्याः ॥२३॥

निजनाथाधिकविभवक्षितिपाल विलोककुतुकमिलितानाम् ।
मरुतां विषादहर्ष प्रदानशाण्डीबभूव बलरेणुः ॥२४॥

सेनोद्योगकृते मुखे करिघटान् नीलाञ्चितान् काहलान्
धत्ते हस्तमिषाद्ध्रुवं कुत इमे व्यत्यस्तरूपाधृताः ।
मत्तानां क्व विवेकितास्ति तददो नादाः पुनः काहला
रावाद्भिन्नतरा इति द्विपवरान् केचित्तदा तर्कयन् ॥२५॥

निजखुर दारिता बहुतरं धरणीति मुहु
स्तदनुनयाय सादिपदसञ्चलनैर्गमिताः ।
दृढपरिरम्भका इव विभुग्रनिजावयवा
जवभरिता हयाः कतिचिदाशुगतिं विदधुः ॥२६॥

श्रीनाथाश्रयधन्य एष इति तं मोदात् स्तुवन्तः किल
श्रीमत्कुर्मतिभूधरं बहुतरं तत्सन्निधिं सन्निधिम् ।
यान्तश्शैलवरा इवाति रभसप्रेङ्खद्रथाङ्गोन्मिष
त्क्रङ्काराः परिचक्रमुः पथि मुहुस्तुङ्गाश्शताङ्गोत्तमाः ॥२७॥

केचिन्मण्डल धोरणीषु तुरगास्सादिव्रजैर्वल्गिता
वेगात्पार्श्वयुगेऽपि पुच्छममलं सम्प्रेङ्खयन्तो मुहुः ।
श्लाघापूर्वकमादरात्तदभितः काशप्रकाशोपमा
दीव्यच्चामर युग्मवीजनमिव व्यातेनिरे कुत्रचित् ॥ २८ ॥

माद्यद्वन्धुरगन्धसिन्धुरचलत्पादातपादाहति
क्षुण्णक्षोणितलोच्चलद्बहुरजः प्रोद्भिन्नदिग्भित्तिका ।
हेषाघोषविघूर्णिताहितचमूयूथाधिनाथोद्भटा
नृत्यत्तुङ्गतुरङ्ग सङ्गतिघना रङ्गीच्छुभाङ्गीचमूः ॥२९॥

In Public domain. Digitization Muthulakshmi Research Academy

सेनामातङ्गपादाहतिभरकलुषास्मीति तद्दोषशान्त्यै
मन्दाकिन्यां निमङ्क्तुं ध्वजपटपवनैर्दत्तहस्तावलम्बा ।
अरोहन्तीव भूमिर्दिवमतिरभसाद्धूलिकापालिकाभा
न्मन्दं मन्दं चलन्त्यामभिविशिखमथोच्चध्वजिन्यां ध्वजिन्याम् ॥३०॥

महोत्सवदिदृक्षया द्रुततरं समासेदुषां
रजोव्रजनिचोलिते नभसि कौतुकं धून्वताम् ।
क्षणं दिविषदां तदा मुदमदान्मुहुः प्रेङ्खणोल्ल-
सत्पवनधिक्कृतक्षितिरजाः पताकावलिः ॥३१॥

तालारावाविमिश्रास्तुरगखुररवे काहलीनां विलीना-
ध्वानास्ते नागराजोत्तमनिचयसमुट्टङ्किते घीङ्कृते च ।
रिङ्खन्तश्शङ्खसङ्घाद्घनतरनिनदावाजिहेषाविशेषे
मिश्रा विश्रान्तिभाजः करिगलनिनदा भेरिकास्फारनादे ॥३२॥

निस्साणोदीर्णशब्दाः पृथुरथविचलच्चक्रचक्रप्रतिघोषे
प्राप्ताद्वैतास्तदानीं क्षणमभवदियं वाहिनी श्लाघनीया ।
रङ्गद्रङ्गस्थलीव क्षणमतिरभसादुच्चलन्ती समन्ता
दग्रे व्यग्रेव नारीरतिरभसभरात्कीर्णरूपा बभासे ॥३३॥

ललितामीलितलोचनं सुमधुरं मत्तेभविक्रीडितं
तुरगाणां चतुरां गतिञ्च बहुशो दृष्ट्वा प्रहृष्टा नराः ।
गगनोन्नम्रशिरोधरं च करभं वीक्ष्योच्चकैराहसन्
भुवि सौन्दर्यवतां पुरोऽति विकृतो हासास्पदं स्यान्न किम् ॥३४॥

स्तुत्वा सर्वंसहेति प्रतिपदमखिलास्ताडयन्ते पदैर्मां
यस्स्याल्लोके क्षमावांस्तमखिलमनुजाः क्लेशयन्ति ह्यजस्रम् ।
स्तुत्येषां किम्ममेति क्षितिरतिकुपिता सर्वलोकोपरिष्टा-
दारूढे वा बभासे बलचलितमहा धूलिकापालिकाग्रे ॥३५॥

तुरगखुरदारितायां क्षितौ प्रदेशस्समुद्रजः प्रचुरः ।
तत्क्षणमेव समन्तादसमुद्भूत्वा रजः प्रचुर आसीत् ॥३६॥

In Public domain. Digitization Muthulakshmi Research Academy

इयं नृपवरूथिनी द्रुतमुपागता मुञ्चत
क्षणादिह नृणां गणास्सरणिमित्यदस्सूचनम् ।
पुरःकिल वितन्वती ध्वजपटी करीन्द्रोपरि
स्थिता प्रतिपदोल्लसत्पवनकम्पिता व्यद्युतत् ॥३७॥

बहुचत्वराभिरामास्समुदञ्चितमत्तवारणोन्नासाः ।
रथ्या विविशुः पुरतो विलसितसुखलीनगान्धर्वाः ॥३८॥

पटुतरकोणताण्डवविजृम्भितकुम्भिवर
स्थितघनदुन्दुभिप्रचुरभाङ्कृति संश्रवणात् ।
मम शिशवश्शिशुर्मम शिशुर्मम कुत्र गता
इति जननीजनैर्ममृगिरे धुरि माणवकाः ॥३९॥

प्रचण्डैर्वेदण्डैरथ समुदयैर्वाहनिवहै
स्समग्रासाव्यग्रा धरणिपतिसेना बहुघना ।
तदारूक्षा विक्षत्सपदि विशिखां सम्भृतसुखां
महोत्तुङ्गा गङ्गालहरिरिव कुल्यामतितराम् ॥४०॥

दीव्यद्गोमय गोमुखेन हरितापट्टांशुकेनावृता
रङ्गन्मङ्गलरङ्गवल्लिभिरियं मुक्तासरैर्भूषिता ।
अत्युन्निद्रमनश्शिलाद्रवकृतैरेखाव्रजैरञ्चिता
रम्यैश्शोणमणीसरैरिव बभौ कान्तेव रथ्या तदा ॥४१॥

भुजनालाञ्चलविलसत्करपङ्कजगलितबिसलताः किन्नु ।
व्यभ्राजिषत वधूभिर्विन्यस्ता रङ्गवल्लिकास्तत्र ॥४२॥

पुरकान्तानां राजदर्शनम्

बाले पश्य नृपं सखि द्रुततरं याहि प्रिये स्थीयता-
मागच्छाम्यहमप्यये किमिति मां नाभाषसे सुन्दरि ।
इत्युच्छृङ्खलजल्पनास्सुललना द्रष्टुं नृपालं तदा
सौधाग्रेष्वमिलन् प्रवृद्धकुतुका रथ्यान्तरे सङ्घशः॥४३॥

In Public domain. Digitization Muthulakshmi Research Academy

सख्याः काचन गृह्णती करतलं काचिन्मनागंसभु
व्यन्यस्या वदनं निधाय ललना काचिद्गवाक्षान्तरे ।
स्थित्वा काचन किं किमित्यनुपदं पृष्ट्वा वधूः काचन
श्रीमान् भूमिपतिः क्व राजति वदेत्युद्यन्महाकौतुका ॥४४॥

एनं पश्य विलोकयैनमबले पश्चात्किमुर्द्वीक्षसे
सख्यागच्छ पुरो न चात्र पुरुषा मुग्धे कुतो लज्जसे ।
कालेऽस्मिन्नपि किन्नु वल्लभभयं श्वश्रूर्गृहे जल्पतु
स्यात्किं तेऽत्र विलोकयेत्यथ वधूमाश्वासयन्ती परा ॥४५॥

द्रष्टुं यद्यपि कौतुकं मम गृहे श्वश्रूरुपालम्भते
वृद्धा मां तदिदं मदीयहृदयं द्राग्वेपते सुन्दरि ।
किन्त्वेषापि च शैशवे सकुतुका नेदृग्विलोके भवे
च्छ्वश्रूणां बहुमत्सरो बत किमित्यास्ते स्नुषा सुक्षितौ ॥४६॥

आस्तां नित्यमिदं विलोकय किमित्येवं मनो बालिके
सङ्कोचं नयने मुखन्तव परिम्लानं कुतो वेत्यहम् ।
हन्ताचिन्तयमद्य भीरु विदितं सर्वं ममेत्यादरा-
त्तत्फालोल्लुलितांस्तदा भ्रमरकान्काचित्समीकुर्वती ॥४७॥

मत्ते देहि ममावकाशमबले तिष्ठात्र मुग्धे मना
गुन्नम्याननमत्र पश्य ललिते त्वं तिष्ठ दृष्टं मया ।
मन्दे तत्र नृपोऽत्र पश्यसि किमु स्निग्धे तवापि स्थिते
रत्रास्तेऽन्तरमम्ब किञ्चिदपि मे द्रष्टुं न धत्सेऽन्तरम् ॥४८॥

भामे कोपभरः कियांस्तव मुखं वक्रीकरोषिक्षणा
त्किन्तावत्त्वदुपान्त एव सुचिरं स्थातुं समेता वयम् ।
त्वञ्चालोकय भूमिपालकचमून्त्यक्त्वात्र कोपं क्षणं
द्रक्ष्यामो वयमप्यये कृतमिहात्यर्थं नचोभिश्शठैः ॥४९॥

In Public domain. Digitization Muthulakshmi Research Academy

उन्मत्ते नवयौवनेन नितरां वेगात्पिधेह्यम्बर-
प्रान्तेन स्तनकुट्मलं तव परं जातौ धरायामिमौ ।
नैताः किं ललनाः पिशाचिकटिभुव्याच्छूर्यतामम्बर-
प्रान्तो वामभुजालतोन्नमनतो दृश्येत वामः कुचः ॥५०॥

मास्प्राक्षीरिति जल्पसि प्रतिपदं कस्मादिहास्यागता
सङ्गे त्वं नियमस्थिता यदि पुनः कस्माद्दिदृक्षा तव ।
इत्थं सौधतलेषु पौरललना भूपालदत्तेक्षणा
लज्जाहास विलासमञ्जुलतमा अद्राक्षुराराच्चमूम् ॥५१ ॥

काचित्सौवर्ण सूत्र ग्रथनपरिलसन्मौक्तिक श्रेणिरम्यां
नासाभूषां मृगाक्षी विरचितकुतुकं न्यस्य कर्णेऽथ वामे ।
काञ्चीं कण्ठे नितान्तं युवजनहृदयान्याहरल्लोकमाना
संसिद्ध्या मञ्जुलानां विनिमयनिहिता वापि भूषा मनोज्ञा ॥५२ ॥

ईदृक्षं सुषुवे सुतं यदिह तत्साम्बैव धन्या ध्रुवम्
बालोऽप्येष मनो ममाद्य हरते स्याद्यौवनेऽसौ कथम्
लभ्यः पुण्यवशादमू दृशसखः क्रीडार्थमित्यादरा-
द्वृद्धाभिर्युवतीभिरेष नृपतिर्बालाभिरप्युज्जगे ॥५३ ॥

यद्रूपसाम्यमाप्तुं रमाकुमारोऽप्यधश्शिरास्तपतु ।
स भवति स एव सोऽयं भूपतिरिति कापि सादराद्राक्षीत् ॥ ५४ ॥

सौधाग्रस्थित ललना बाहुलताग्रान्नृपालशिरसि तदा ।
दरदलितकुड्मला इव लाजा जगलुर्मुहुर्मुहुर्विमलाः ॥ ५५ ॥

क्षितिपतिममुं पश्यन्त्यां मे न चान्यमुदीक्षितुं
प्रभवति मतिर्बाले सत्यं समीक्ष्य नृपोत्तमम् ।
सपदि दयिते दृष्टे शीर्षेऽस्य कुट्टनमीहते
जगति ललनेत्याह स्निग्धा वधूरथ कापि तम् ॥५६॥

In Public domain. Digitization made by Sri Muthulakshmi Research Academy

कामस्सुन्दर इत्ययं विजयते लोके प्रवादो महान्
किं तेनास्ति यदि क्षितौ प्रकटितं तत्सुन्दरत्वं भवेत् ।
तेनानङ्गतया जितं सुललितं लोकस्य सम्मोहनं
रूपं बिभ्रति भूपताविति वधूरन्या स्मरार्ता जगौ ॥५७॥

राजन्यकं पश्यसि सोमबालफालोल्लसद्रत्नललाटिकेऽस्मिन् ।
जने दृशं न्यस्य मुदेति काचिद्रूपं जगादाथ सखीमिषेण ॥५८॥

शुभरूपविशेषकः पुरस्तात्क्षितिपालस्य चकास्ति फालभागे ।
इति कश्चन कान्तयानुयुक्तश्चतुरोदत्त तदोत्तरं तदेव ॥५९॥

कविमित्रसोमबालक कन्यां स्वक्षेत्रमाश्रयन् सुगुणोच्चम् ।
त्वल्लग्नानां विरचय सम्पदमिति काचिदाशिषमदात्तस्मै ॥६०॥

एतत्सदृशं ललनाकुचयुगलं भूषितं कनकचोलैः ।
इति कुतुकात्कनकपटीभूषितकुम्भा ववल्गुरिभडिम्भाः ॥६१॥

वयमिव सैन्धव एष क्षमामहे नेन्दुमेनमूर्ध्वस्थम् ।
इति तं पातयितुं ध्रुवमुदग्र चरणा हयास्तदारिङ्बन् ॥६२॥

इत्थं सीतारामभूनायकोऽसौ मन्दं मन्दं सुन्दरीशालिनीं ताम् ।
दर्शं दर्शं रम्यरम्यां प्रतोलीमत्यक्रामत्तां पुरीं हृष्टचित्तः ॥६३॥

यस्यां सदा पुरि महाच्छविदेहलीला-
लाल्या रघूत्तमसती तुलनां नितान्तम् ।
गेहावलिश्च दधते ललनाश्च साध्व्यो
वैतानभूषिततयापि मनोहराभाः ॥ ६४ ॥

विलसति यत्र नितान्तं सौधालीप्रोल्लसद्वलीकान्ता ।
ललनाततिश्च तस्यां युक्ता चानर्घपटलाल्या ॥६५॥

विलसन्ति सदा कर्कशफलालितान्ता महोपवनलतिकाः ।
मारुतकम्पितकेसर काम्भोजामन्दुराश्च पुरि यत्र ॥६६॥

In Public domain. Digitization Muthulakshmi Research Academy

यत्र ममोजवसत्त्वं दधते राजन्यसमुदयाः पुर्याम् ।
आजानेया रुचिरा ललना अपि यौवनारूढाः ॥६७॥

अग्रोपकार्याश्रयतो नितान्तं राज्ञस्समीपे मनुजा यदीयाः ।
साकं सुदृग्भिर्दधते प्रमोदं सकण्टका अप्यति विस्मयः कः ॥६८॥

सारश्रीघनमधिकं प्रथिमहितं यत्र कुचयुगं स्त्रीणाम् ।
पुरुषोत्तमकरलालितमभिदधते चक्रसदृशमिति मनुजाः ॥६९॥

यत्र स्त्रीणां मध्यमं मध्यमत्वं त्यक्तुं तप्त्वाधश्शिरस्स्वेष्टलाभम् ।
अप्राप्यालं खेदतः कार्श्यमाप प्रायो न स्याद्गौरवं मध्यमानाम् ॥७०॥

यद्राजावसथाग्रभूमिषु नरैर्निद्रालसैर्यामिकै
रात्र्यां मार्गवशाद्गवाक्षविवरे गच्छन्कदाचिद्विधुः ।
घण्टासांशयिकैर्दृढप्रतिहतो दण्डेन नूनं न चे
त्कस्मान्मण्डलमध्यभुव्यतितरां धत्ते किणं श्यामलम् ॥७१॥

यत्र च तन्वङ्गीनां मध्यो नितरां सनाभिरणिमहितः ।
निवहोऽपि च योधानां रथचक्राणां समूहोऽपि ॥७२॥

कथयन्त्यात्मपुरीं यां यत्र वसन्तो नरा इदं युक्तम् ।
निवसन्तोऽपि विदेशे निगदन्ति विचित्रमात्मनगरीति ॥७३॥

यदुपवनसाम्यमाप्तुं नवनन्दनवनमधश्शिरस्तपतु ।
तदपि यथाजातं स्यात्सुराश्रितानां भवेत् क्व वा सिद्धिः ॥७४॥

यक्तान्ताकान्तिचौर्योदितकुतुकतया जाल रन्ध्रप्रविष्टा
रात्रौ सौधे प्रबुद्धैस्सपदि निगलितास्सौविदल्लैस्सुधांशुः ।
आदातुं या अशक्तो निजरिपुललनावक्त्रवीक्षात्तभीति-
स्तत्रात्याक्षीन्नु मुक्ता इति हि दधति ता नाम तारास्तदेव ॥७५॥

गद्यम् ॥

तदनु भगवन्तमभिवन्द्य लोकेशं श्रीकेशवं श्रीनिवाससेवार्थविनिर्गताया मम वारुणीसम्मुखीनतया गमनमनुचितमिति मत्वेव विनिवृत्य पश्चिमदिशा-मुखात्प्रदक्षिणी-

In Public domain. Digitization Muthulakshmi Research Academy

भूय दक्षिणेन हस्तं विमुच्य प्रतोलीमिदमुचितमितीव हरिदिशाभिमुखं किञ्चिदन्तरमवतीर्णया सर्वोत्तरश्रीनिवाससेवनायोत्तरैवाश्रयितव्यादिशेति जानन्त्येव सरभसमुत्तराभिमुखविशृङ्खलविसृत्वर्यामहोत्सवसेवाकुतुकेन सामीप्यात्समुज्जृम्भितयेव कृष्णाभिधानया वाहिन्या वाहिन्या निबिडितपार्श्वदेशस्य द्विरदेशस्याग्रभागे कनकरत्नमण्डपे निविशमानो मानवपतिः हस्तं दक्षिणेन निरन्तरमपि जलधौ निपीतानां तोयानां तत्रैव दशभागान् धरण्यां पुनर्यत्किञ्चिदंशं निर्दोषयोगे सति वर्षति पर्जन्य इत्यार्जितमूर्जितं दौर्जन्यं मार्जयितुकामतया गगनतलादवतीर्यायमपि जलधिरिति यथेष्टमापूर्योदर-मुदकैर्मधुरैस्तत्र जले किञ्चित्प्रवृष्य सर्वमपि जलं सस्याभिवृद्धये भूम्यै केवलं ददानाभ्यामिव घनाभ्यां मुहुर्मुहुः कर्षकजनैरूर्ध्वस्थितपीनाहाग्रभासमानत्रिकाचक्राद-वतारिताभ्यां गृहीतजलाभ्यां वृषभद्वितयस्कन्धावसक्तयुगमध्यबद्धरज्जूत्कर्षिताभ्यां विवरान्तरविनिर्गलत्सूक्ष्मतरजलधारासाराभ्यां यन्त्राधोमध्यभागरचित कुल्यामुख-जलनिष्ठीवनावसरसरभसमुखभागाग्रक्षुभितैर्जलशीकरनिकरैस्साधुवापिके त्वयाजीवन-प्रदानेनोज्जीव्यते किलारामभूमिरिति लाजपुष्पाञ्जलिमिव निक्षिपद्भ्यां सशुण्डादण्डवेदण्ड-वदनदायादरूपाभ्यां घटीजलयन्त्र चर्मभस्त्रिकाविशेषाभ्यां राजमानां राजवापिकां राजसम्बन्धवत्सलतयेवोदीक्षमाणः नागरिकयुवति-कुचैर्विजितानि वयं नगाग्रमाश्रयाम इति मत्वेव नारङ्गनगशाखाग्ररूढैस्तावदेव नगोऽपि विजितस्तैरिति स्मृत्वा साध्वसादिवा-निलात्कम्पमानेभ्यस्तेभ्यो विरतं परिपतद्भिः परिपक्वैरारामलक्ष्मीक्रीडाकनकतन्तु-सन्ततिदन्तुरितकन्तुकैरिव मदनमहाराजसमर्हणार्थोपवनलक्ष्मीकल्पितरसभरतरङ्गित-मङ्गलतुङ्ग भृङ्गारनिचयैरिव बहुलतरहरिद्रालिप्तकर्णाटवधूटीवक्षोजसच्छात्रैरुद्यद्दिनकर-बिम्बदास्य दानशौण्डवर्णः पूर्णैस्तदीयफलैरतुलैर्दन्तुरिततलां स नामा मम काचन खेलत्यूर्ध्वमदस्सम्मुखीना निर्लज्जं किमिति भवामीत्यसूययेव उताहो सत्यामपि मय्यंशुमत्फलाभिख्यायां शुभच्छायायामनुदिनमप्युदयन्नेव सभ्रमरकमलिन्या-स्सद्यस्तनकुड्मलं करेण लालयत्यंशुमान्नैष दर्शनार्ह इतीव व्यावर्तितवदनाभिः आहोस्वित् रम्भावारवनिता जातेति जनप्रवादनिशमनजातेनावमानेनेव नम्रमुखिभिरुताहो मुञ्चाम्बास्मान्किमिति निर्बध्नासि जेष्याम उपरिष्टाद्विहरमाणां गर्वदुर्विदग्धामपहृतास्मदभिख्यां स्वर्गणिकामित्यधस्थितां स्वजननीम्भुवं याचितुमवनमि-ताञ्जलिपुटाभिरिव आनम्रफलभरितशाखाग्र कुड्मलाभिर्नैकटिकनगरविलसल्ललनाजन-

In Public domain. Digitization Muthulakshmi Research Academy

निजजैत्रोरुयुगलस्मरणजनितेन भयेनेव मन्दानिलेन कम्पमानदलकदम्बाभीरम्भाभि-
र्मनोहरं आश्रितानामस्मद्भूपालमुदग्रफलसिद्धि-र्भविष्यतीति सूचयितुमिवात्युच्छशाखासु
फलानि बहूनि दर्शयद्भिर्मौक्तिकहारगुच्छपरिवृतपद्मरागकलशघटितमूलमरकत-
तुलापीठमनोहरैर्वज्रमयस्तम्भैरिवारामलक्ष्मीदिव्यभवनस्य लम्बमानप्रसूनगुच्छपरिकीर्ण-
परिपाकारुणफलोर्ध्वभागा मूलाग्रहरिततरपत्रप्रचुरितशाखारमणीयशीर्षै-
र्मारुतान्दोलनावसरपरस्पराभिघट्टनविशीर्णपूर्णफलनिवहनिरर्गलविनिर्गलत्पृथुलरसधारा-
सारसंशयावहैर्विमलैर्नारिकेलप्रकाण्डैर्निबिडितम् अगरङ्गस्थानमपि नागरङ्गस्थानम्
अमुक्तकुसुमाभिराममप्यतिमुक्तकुसुमाभिराममारामं विलोकमानोऽतिक्रम्य किञ्चिद्दूरं
प्रणम्य भगवन्तमुमाकान्तं कृतनीराजनं निवृत्य तस्मात्परमेश्वरदिव्यभवनादाश्यानतया
पद्यकर्दमेन तटाककच्छप्रान्तमार्गेण स्वच्छन्दं गच्छन्त्या दृढगृहीतखलीनरज्जुभिः
किञ्चिदवनमित पूर्वकायैस्सादिभिस्सावधानं प्रेर्यमाणैस्सघुर्घुरशद्वं तटाकसेतु-मारोहद्भिरर्वद्भिरयं
सेतुरस्मदतिभारसहनपटुर्वा न वेत्यालोचनयेव मन्दं मन्दमेकैकं पदं न्यस्य न्यस्य
चिरादारचितारोहणैर्वारणैश्च निबिडितया सेनयानुगम्यमानः पार्श्वतः कथमियं मम
सहधर्मिणी सुरतरङ्गिणी शिवशिरस्समारूढा भवेदास्ता-मिदमयमपि सर्वज्ञः कथं वा
परकीयामिमां जटाजूटे गोपयामास पृच्छाम्येनं स्थाणुमिति रुषा समागत्य
परमेश्वरभवनमभितो निरुन्धन्तमिवोदन्वन्तं सेतुकैतवमहाव्याल परिरम्भणकृते-
ऽतिचपलतयाहमहमिकया समापतन्तीनां सशिरोरत्नानां नागकन्यकानामिव
प्रतिबिम्बिताम्बुजबन्धुबिम्बानां वीचीनामन्योन्य-घट्टनेनोत्कीर्यमाणशीकरनिकरतया
मावमंस्था भूपाल मामहमपि रत्नाकरसदृश एवेति मुक्ताफलाञ्जलिमिवोत्क्षिप्योत्क्षिप्य
समर्पयन्तं सेनादर्शनकुतूहलादिवोत् प्लुत्यावलोक्य सर्वमप्यधश्शीर्षोऽप्यस्मत्केतनो
मदनोऽस्य भूपालस्य रूपशततमकलां वा न वहेतेति व्यञ्जयितुमिवाधश्शीर्षं निपत्य
जलान्तरे दूरदूरं निमग्नैरप्यतिस्वच्छतया जलानां स्पष्टन्दरीदृश्यमानैस्सञ्चलनचापलरभस-
व्यावर्तिताधः कायतयानुक्षणं क्षणदीप्तिमण्डलैरिव प्रदर्शितथालथल्यैः जलरामणीयकं
विलोकमानानां गगनस्थितानाममराङ्गनानां प्रतिबिम्बैरिव लोचनानामेकगृहीतं वस्तु
गृह्णद्भिरन्यैस्तद्गृहीतं तुदद्भिरन्यैः पुनस्तरान्तदेवमुखाग्रेण व्याकुट्याचातिचपलं
निवर्तमानैरन्यैस्तत्पुच्छमाच्छोटयद्भिर्निजपुच्छेनान्यैर्जठरान्तरनवकाशान्मुक्ता फलमिवैकैकं
बहिर्मुखनिश्वासेन तत्र तत्र बुद्बुदं निष्ठीवद्भिरन्यैर्भगवानप्याश्रितास्मदवतार इति स्मारं

In Public domain. Digitization Muthulakshmi Research Academy
स्मारं हर्षादिवोद्वल्गद्भिर्वल्गुतरैरितरैस्तत्र तत्र डिण्डीर मण्डलविलोकनेन बकवधूटी-भ्रमादतिभिया बहुदूरं सरभसं निजशिशुभिस्सह निमज्जद्भिरन्यैर्दुर्जनैरिव स्वजातिमेव कबलयद्भिरनुकामीनैर्मीनैश्शबरनेतारमिव परिपूरितकुक्षिं तथाप्यनुस्वारस्य वैलक्षण्यवत्त्वादिव तानुज्जीवयन्तं शम्बरनेतारमात्मप्रतिकूलदन्तावलविलोकन-साध्वसादिव वेपमानैस्तरङ्गभङ्गसङ्घसङ्घर्षण प्रेङ्खितैर्निस्सीमरसैस्तामरसैः कामपि श्रियमुन्मेषयन्तं बृहस्पतिमिव श्रीमद्गुरुताञ्चितं श्रोत्रियकुटुम्बिनमिव कविव्रजाग्रजं बालपोषणनिरतं महागिरिमिव स्वच्छस्वभावं शकुललालितं भानुमन्तमिव विमलमहाशङ्खविद्योतमानं समररङ्गमिव समुच्चलत्पृषत्कं सुग्रीवसेनाव्यूहमिव दुर्गाहवारम्भे कीशनिर्घोषपरिपूरितं घनाघनमिव शतह्रदाञ्चितम् उषस्समयमिवारक्तसन्ध्यकं मृगयुमिवोत्पलासक्तं सिंहमिवाक्रान्तकुम्भिकान्तं सकोकनदमपि तटाकं समुद्वीक्षमाणोऽतिक्रम्य किञ्चिद्विश्लथीकृतमुखरज्जुभिरुत्तम्भित वक्षोभिस्तुरङ्गिभिरवतार्य-माणेषु तटाकवरणान्मन्दं मन्दं तुरङ्गेषु निम्नस्थलावतरणाय सांशयिकेषु निषादिकरातिर-भसोत्क्षिप्ताङ्कुश घट्टनवेदनमप्यविगणय्य शिरः केवलं धून्वत्सु कथञ्चन स्तुत्या लाघवशिथिलीकृतमेकैकं चरणं द्विस्त्रिर्निक्षिप्यापनीयावतरत्सु श्रीनिवाससेवा-कुतूहलेनागतानां निरुद्धमार्गाणां जनानां चिराय बहुतर प्रकोपपात्रीभूतेषु गम्भीरवेदिषु मनोरमेषु स्तम्बेरमेषु महोत्सवदिदृक्षाचलितभुपालबलधरभुग्रफण-भुजङ्गपुङ्गवसाहायक-कृते भूधरत्वाभिमानेन निर्भिद्य भुवं रसातलं विविक्षुष्विव शैलजालेषु न्युब्जीभूतपूर्वभागमवतरत्सु शतशः पुष्यरथेषु यावत्स भूपालोऽपि भवत्सन्निधिगमनाय कुतूहलमुन्मस्तकयति तावदुद्वल्गयन्तस्तुरङ्गमान् प्रेङ्खयन्तः क्रमेलकान्नादयन्तो वारणान्वादयन्तो वादित्राणि विजृम्भयन्तो दुन्दुभिभाङ्कारान् उद्घोषयन्तो बिरुदपद्यानिविष्टम्भयन्तश्शरीराणि बध्नन्तस्सारसैः कटितटानिवारयन्तः पुरतस्थित-ग्रामीणानाज्ञपयन्तस्सरभसगमनं दूरीकुर्वन्तः पश्चाद्दृष्टमात्रान् गिरीनूरीकुर्वन्तो हर्षाति-शयमुत्कम्पितकेतनमुच्चलितचामर-मुन्नर्तितजालकातपत्रम् उत्क्षिप्तोत्कम्पवसनमुन्मस्तक-घण्टारवमुन्नीत-धूलिपालिकमुद्दामह्रेषा घोषमुद्धूतालस्यमज्ञातबहुदूरमार्गाति-क्रममुदञ्चितान्दोलिकावहनधुरीण जनविविधनादमनन्यमानसास्सैन्याः क्षणेन निदधिरे पदान्यम्बापुरमध्यभागविलसितराजमन्दिराङ्गणप्रान्ते निकामकान्ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

पद्यम् ॥

मोदमवालम्बिषता क्षोदीयांसं पुरेत्र सैन्यास्ते ।
न रचयति कस्य मोदं धरणितलेऽम्बापुरप्रान्तः ॥७६॥

सरभसमवतीर्णा वाहपल्याणभागात्करि-
वरपृथुकुम्भद्वन्द्वतो द्वन्द्वशौर्याः ।
सपदि विनयनम्रा रक्षिवर्गेण सार्धं
नृपतिगज स देशं भेजिरे सर्वयोधाः ॥७७॥

निषादिना सामि निकुञ्चिताङ्घ्रिकं निषादितादुत्तम हस्तिसत्तमात् ।
अवातरद्दत्तकरावलम्बनो जवान्नृपालोऽपि स मन्त्रिणा सह ॥७८॥

उदीक्षमाणोऽञ्जलि कञ्जकोशानुदञ्चितान्योधशिरस्सु मन्दम् ।
विवेश रम्यम्भवनं महीशो व्यत्यस्त तद्वाच्यमनर्घरत्नैः ॥७९॥

कियद्दूरं यातुं स कुतुकहृदो वास्मदधिपा
इति भ्रान्तास्स्मामी अवरुरुहुरत्रैव निकटे ।
इति प्रौढह्रेषाजनितबहुफेनाननतया
तुरङ्गास्सेनायां जहसुरिव सोत्त्रासमधिकम् ॥८०॥

विनीतपल्ल्याणचया नियोज्यैर्विलम्बितप्रग्रहमग्रनीताः ।
मुहुर्लुठन्तो जहृषुः किशोरा अम्बापुराङ्के ननु युक्तमेतत् ॥८१॥

भजति हि दारुणाकृतिमसाविति रोषभरा
त्सपदि वरूथिनीकटकभूमिषु शङ्कुततिम् ।
दृढलगुडेन मूर्धनि पटुध्वनिभृत्यजनाः
प्रचुरमघट्टयंस्तुरगवारणबन्धकृते ॥८२॥

केचिद्बद्धास्तुरङ्गाः कतिचन लुठिताः केचिदाघ्रातभूमि-
प्रोत्क्षिप्याग्राङ्घ्रिमुच्चैः क्षितितलमलिखन्मन्दमन्दं खुरेण ।
केचिद्भूमौ लुठित्वा स्फुरितमृदुतरप्रोथमुच्चैश्श्वसन्तः
स्थित्वा प्रोद्धूतगात्रा बभुरथकटके तत्र तत्रात्तघासाः ॥८३॥

In Public domain. Digitization Muthulakshmi Research Academy

शठमषणकुलतिलकः कृष्णः कविसार्वभौमाबिरुदाढ्यः ।
श्रीनिवासविलासेऽस्मिंस्तार्तीयीकं व्यधादिहोल्लासम् ॥

इति श्रीनवीनदुर्गनिलयस्य कृष्णकविसार्वभौमस्य कृतिषु
श्रीनिवासविलासाख्ये चम्पूप्रबन्धे
॥ तृतीयोल्लासः ॥

In Public domain. Digitization Muthulakshmi Research Academy

श्री श्रीनिवासपरब्रह्मणे नमः

श्रीनिवासविलासे - चतुर्थः उल्लासः

.....

गद्यम् ॥

अथ तत्र निखिलजननेत्रानन्दविचित्रचित्राप्रतिमप्रतिमाशतबन्धुरसुन्दरपुरन्दर-मणिभित्तितलपरितो निबद्धशुद्धमुकुरनिकर थालथल्यविशेषनिरीक्षणजनित घनाघनान्त-रतडिल्लतास्फुरणमति विरचितनृत्तमत्तलीलाबर्हिणकेकारवागर्हितबर्हप्रेङ्खणनिर्वर्त्यमान-सुखागमनानु योगव्यजनवीजनोपचारदूरीकृतनितान्तपरिश्रान्तिसङ्ख्यावत्सन्ततिरक्षि विचक्षणाध्यक्षदक्षौ पायिकस्थायि-काभिरूपगोपभौरिकनैष्किकान्तर्वशिक सौविदल्लमल्ल-निबिडितान्तरे राजमाननिर्व्यूहव्यूहे राजगेहे निषण्णः किञ्चिच्चिरं परिजनकरार-विन्दान्दोलितचन्दनो दबिन्दुकृत मज्ञनसञ्जितलामञ्जकतालवृन्तसन्ततिनिरन्तर-विसृमरमारुतमाणवकसंसेवनजनितामन्दानन्दबन्धुरान्तःकरणो वसुन्धरारमणो याममात्रा-वशिष्टेऽह्निमात्रा दत्तानुज्ञोऽभिवन्द्यतां साकं सर्वैरध्यक्षैरुथाय परिजनदीय-मानकरावलम्बस्समारुह्य मन्दिराङ्गणे तुङ्गतरङ्गजवरं पश्चादारूढे च मन्त्रिपरिवृढे तदात्वविजृम्भितनिजजैत्रसेनातुरगहेषाविशेषश्रवणबद्धसाध्वसतया तूर्णमदर्शनं गन्तुं धावमानैरिव रथतुरगैर्गगनमध्यादवतीर्णे पश्चिमदिगग्रमुग्रभानौ यथापुरमनुगच्छन्त्यां सेनायामनूनायां क्षणेन सम्प्राप्य कुरुमतिगिरिपरिसरं तत्र पुष्करिणी प्रतीरभुवि निजाज्ञा प्रवर्तिते सत्रमुखे दत्तसुखे निबद्धकटि-तटैर्दीयमानपत्रपुटैरास्तीर्णपर्णैर्बहुप्रमोदैस्सूदैः कृतेषु करिष्यमाणेषु क्रियमाणेषु समस्तवस्तुपरिवेषणेषु गवेषमाणेषु स्वान् केषुचिदागतेष्वागच्छस्त्वागमिष्यत्सु च यथायथमितोऽपि किञ्चिदधिकं दीयतां घृतं किं त्वयोपार्जितं गच्छति वा त्वत्पित्रार्जितं गच्छति वा आनीयतां यथेष्टं सूपो वयमौत्तराहा न दाक्षिणात्या इति जल्पत्सु केषुचिन्न्यस्तं सर्वं सर्पिस्सङ्गृह्य स्वस्वपात्रीमापूर्य पुनरपि रिक्तान्येव पत्रभाजनानि रचयत्सु केषुचित्पुनः परिपूर्यमाणेषु कैश्चित्तेषु सादरं कृतयुगपदापोशनेषु सर्वेषु विप्रेषु सुगुणोऽसि त्वं मह्यं यथामनोरथं विश्राणय-भक्ष्याणीति कुशले कस्मिंश्चन पृच्छत्याजन्ममनवलोकितैकाक्षरशिरस्कतया सूदपर्यायनामेति गुणशब्दमजानता तावतैव प्रमोदोच्छूनभुजेनौदनिकेन सादरं यथेष्टं तस्मै दीयमानेषु मोदकशष्कुलिकादिभक्ष्येषु नवनीतं देहीति पृच्छत्यज्ञे कस्मिंश्चिदिदं

In Public domain. Digitization Muthulakshmi Research Academy
नवनीतमेवोष्णतरं वर्तते खाद्यतामित्युष्णान्नदानेनान्यथयति तद्याच्ञां कस्मिंश्चनधूर्ते दयालुनान्येनानीय दत्तं नवनीतं भुञ्जाने तस्मिन्नत्रान्तरे निष्ठानत्वविख्यातमिदं वस्त्विति केनचिद्दत्तं तेमनं वीक्ष्य कस्मिंश्चित्केवलवैयाकरणे कथमस्मिन्निष्ठानत्वमस्तीति चिरतरमन्तरिक्ष निक्षिप्तदृष्टिविवृतास्यं विमुक्तभोजनमुद्धृतदक्षिणहस्तं चिन्तयमाने कृतसोत्प्रा- सहासैर्बहुतररचितसाहितीपरिश्रमैः कविभिः किमये केवलशाब्दिक न खल्विदमिको यणचीति सूत्रं किं वृथा गर्वसि सर्वज्ञोऽहमित्यावालसुलभैक-पदार्थानभिज्ञोऽसि स्वपिहीदानीमानीयतां वा कम्बलः न खलु शैशवे त्वञ्जनकेन नामलिङ्गानुशासनेऽपि स्यात्तेमनन्तु निष्ठानमिति पाठितोऽसीत्यपहसद्भिरधिक्षिप्ते तस्मिन् इमे दाधिका एते चूर्णिनोऽपूपा एते लवणा इमे मौद्गा इति न्यस्यत्सु सूदेपु पत्रान्तरे भक्ष्याणि प्राज्यदध्याज्यदुग्धनदीमातृकायमाणेषु कुरुमतिगिरि-परिसरेषु सुरसाला दीयन्तामिति याचमाने कस्मिंश्चिद्विप्रे न वयं सुरसालदर्शनेऽपि शक्नुमो मनुजा इति वदत्सु केषुचिन्न हि तथा मार्जिका वितीर्यतामिति पृच्छत्सु तेषु जग्धार्धकबलानजग्धकबलान् चर्वितमनोहराननाघ्रातमोदकानुत्सृष्ट-चिञ्चान्नानपेक्ष्यमाणाज्यान् परिमृश्यमानजठर-भाण्डान् क्रियमाणसुरभिजलपानानाद्रियमाणसुगन्धितक्रान् स्तूयमानभक्ष्यरुचीन् पठ्यमानभोजनगद्यान् श्लाघ्यमानौदनवितरणसुकृतान् स्वस्त्यस्तु राज्ञे सीतारामभूपालाय न वयं निजपुरं गच्छामः क्रियतामेवमेव तेन नित्यान्नदानमिति श्लाघमानेषु केषुचित्किं युष्माकं भवेन्न्यूनं भक्षयामो यथाकाङ्क्षमिति वदथेत्यपहसतः कोटिशस्सङ्घीभूतान् उत्थातुमशक्तानपेक्ष्यमाणकरावलम्बान् द्विजान् दर्शं दर्शं हृष्टहृष्टान्तरङ्गो मन्दं मन्दमवतार्यौपवाह्याद्रिरिवरोपत्यकाप्रदेशकल्पितकुट्टिमभुविकनकमण्डपान्तरे समास्तीर्णरत्नकम्बलप्रान्तकल्पितभद्रासने निषण्णस्तत्कालप्रक्रान्तवारकान्ता-कलितकान्ततरनर्तनविलोकनेन कञ्चित्कालं निनाय सनाथो रसिकसदसातया ॥

पद्यम् ॥

समुदयतेम्बरीष परिताप इतःप्रभृति
प्रतिविपणीति तत्र जनजल्पितसंश्रवणात्
अतिरभसाद्ध्रुवं सपदि चक्रपतिर्निरगा
द्भुवि शरणागतेषु करुणा कियती महताम् ॥१॥

In Public domain. Digitization Muthulakshmi Research Academy

आयाताः क्षितिपालदन्तिनिवहास्ते पुष्करिण्याद्विषो
ह्यस्मत्पुष्करिणी कथं वसति वा वेगात्त्वया दृश्यताम् ।
इत्थं पुष्करलोचनेन रचितानुज्ञं किलावातर
च्चक्रं पुष्करिणीतटं प्रति तदा भूभृत्पतेर्मस्तकात् ॥२॥

प्रतिदिनमिदं चक्रं कुत्र प्रयाति विचार्यमि
त्युदित कुतुकं सन्द्रष्टुं तच्छिरस्यनु गच्छता ।
कुरुमतिपतेश्शङ्केनेव व्यरोचि तदा पुन
र्विमलमहसाच्छत्रेणेन्दुद्युति प्रतिपक्षिणा ॥३॥

तदानीम् ॥

निसर्ग भुजगा सुहृत्खगपतिः पुरा जृम्भते
महोत्सवकृतेऽत्र मद्रथतुरङ्गरञ्जूरगः ।
विलोक्य तमिमं भिया भजति कामवस्था
मिति ध्रुवं चरमसागरे रविरमज्जदुद्यद्भयः ॥४॥

अभिदधति शुभश्रीकन्दरं समानाश्रयं मम बुधेन्द्राः ।
नात्रोचिता स्थितिरिति प्राविक्षत्तन्तदा ध्रुवं चक्रम् ॥५॥

भजते दुर्मतिसङ्गं युगविगमेऽप्येष इति रुषेव तदा ।
हरिपरिजनेन दुन्दुभिरभिचुक्रोश प्रताड्यमानोऽलम् ॥६॥

गद्यम् ॥

तदनन्तरं समन्तात्सन्ताड्यमानेषु शकुन्ताधिपोत्सवोदन्तसूचकेषु निखिल-वाद्यबृन्देषु भगवान् कुरुमूर्तिशिखरीन्द्रश्श्रीनिवासोऽप्यङ्गीकृततात्कालिकसपर्याचर्यः निर्गत्य गुहामुखात्प्रतिहारभुवि सज्जितं श्रीनिवासनिवासेन कुरुमूर्तिशिखरिपतिरखिलकुल-गिरिशेखरतामवाप तदनुग्रहेण भवानपि समाश्रयतु तादृशीं ख्यातिमिति वत्सलेन हेमाचलेन प्रेषितं सरत्नशृङ्गं सपक्षमिव स्वकिशोरं काञ्चनाञ्चित वर्णं शिरस्समाटीकमानरत्न-कोटीखचितकोटीरमुत्फुल्लपतत्रं निखिलदिति सुतमण्डलखण्डनोद्दण्डकुतूहल-पुण्डरीकनयनस्थापितविजय प्रस्थानार्थ वंशस्तम्भाग्रोभयपार्श्वोन्नम्रनिजतनूसच्छात्रच्छ-विराजमान वैजयन्तीपटमध्य समुदञ्चितपद्मरागकलशभ्रान्तिदन्तुरीकरणचणनासा-

In Public domain. Digitization Muthulakshmi Research Academy
मूलाभितस्समुन्नम्र भ्रूयुगान्तरोज्जृम्भितनिरङ्कुशकुङ्कुमसङ्कलिततिलकं निखिललोकभीकर दुर्दान्तिनीरन्ध्रनागेन्द्रशिरोविदलनाय तदुचितेनायुधेन भवितव्यमित्यङ्कुशमिव थलथलत्कोटिं शतकोटिकोटिसमधिककाटवोद्भटं त्रोटिपुटं दधानं द्विजराजोऽसावहमिवा-मुष्यवदनान्तरेऽपि जाता द्विजराजा इति वदन्ति जनाः किमेते मत्तोऽप्यतिशयितश्रियो वा न्यूनश्रियो वा पश्येयमिति बाल्यचापल्यादुपागतस्य सदेशमाजन्मकठिनस्वभावतया निजनामधारणमात्रमप्यसहमानैस्तैः खण्डितस्य बालचन्द्रस्य शकलाभ्यामिव विकलाङ्गतयोद्गन्तुमशक्ताभ्यां सृक्कलग्नाभ्यां दंष्ट्राभ्यां श्वेतातसीकोरकयुगलभासुराग्रं बन्धूककुसुमगुच्छराशिं सच्छात्रयन्तं द्विजराजोऽयमिति सानुरागमालिङ्गन्तीभिरिव तारावलीभिः तारावलीभिः कोरकितवक्षस्स्थलं त्रिदशाधीशादपि दशांशाधिक पराक्रमोऽयमिति भुजयुगलाञ्चलयोर्दशधाङ्कुरितेनेव कुलिशेनाहि गोत्रपक्ष विदलनचणेन नखरनिकरेण जनितया दीप्त्या द्विगुणयद्भ्यां सुधाकरकान्तिं प्रसारिताभ्यां करतलाभ्याममुमखण्डं ब्रह्माण्डमण्डलमेवमेवोद्धृत्य कन्दुक क्रीडापदवीमारोपयितु-मीशोस्मीतीव सूचयन्तं निकुञ्चित प्रसारितचरणयुगलतया निजसदृशेन वलीमुख-शिशुना यदशक्यं चण्डभानुमण्डलनिगिलनन्तन्मयैकपदे क्रियते पश्यत जना इत्युत्पतन इव कृतसन्नाहं महाभाग मम सुराश्रयं मोचयामासिथ पुरा यत्किञ्चित्कालमेव सर्वदापि तदाश्रयं विमोच्य स्ववशे कुरु मामिति प्रार्थयितुमागतया सुधयेव विशदांशुकवल्ल्या परिरब्धं रुद्रैकासक्तमपि नारायणैकभक्तं श्रुतिद्वयमनोहराङ्गमप्यनन्तश्रुतिमनोहराङ्ग-पन्नगोच्चाटनपक्षवातमपि विपन्नगोच्चाटनपक्षवातम् आयतनमनन्तविजयस्याधारमखिल-तेजसामागारमखंडविनयस्य उभयथापि सुकीर्तिसमालिङ्गितं विनतानन्दकरं चाद्भुतं कञ्चन यानोत्तममधिरुह्य कियती वा तेजस्समृद्धिर्मत्सनाम्नस्त्रयीतनोर्भगवदाश्रितस्य पतङ्गस्य द्रष्टव्येत्यवलम्बमानेनाम्बरतलात्किञ्चिदुपरि निजरुचिधिक्करणचणतत्तादृश-तदीयतेजोविलोकनसमुद्भूतसाध्वसविगलत्तेजोधारासारेण भानुमण्डलेनेव हिरण्मयदण्डा-ग्रभासमानेन कनकातपत्रेण मैत्रीमिवातन्वता मणिमुकुटेन युगपन्निशायां भानुमन्मण्डल युगलोदयदर्शनेन नैजविचित्रशक्तिमिव प्रकटयन् सुधाहरणप्रस्थानसमयमहाकुम्भीन्द्र-कुम्भस्थलात्खगपतिना समाहृतैर्निजावासभेदकस्य तस्य विलोकनेनोद्विग्नतया मुहुर्मुहुः कम्पमानैरिव मौक्तिकपुञ्जैः पार्श्वद्वयेऽपि किङ्करान्दोलितैर्हंसवर्णकैः प्रकीर्णकैर्वीज्यमान-स्तत्क्षणं पक्षिराजमुखनिष्ठ्यूतानां चर्वितानेकदर्वीकरधूर्वहमहत्तरशिरोरत्नानामिव

In Public domain. Digitized by Muthulakshmi Research Academy

जाज्वल्यमानानां कोटिशः प्रदीपबृन्दानाममन्दानां प्रभया पल्लवितेष्विव गिरिवरप्रान्तेषु निर्गत्य शनैश्शनैरवरुह्य गिरेर्भक्तवत्सलतां साधु प्रकटयन्निव सीतारामभूपालास्थान-मण्डपकुट्टिमं स्वयमेवोपेत्य सरभसकृतप्रणामेन साञ्जलिबन्धेन सगद्गदेन सानन्दभाष्पेण सपुलकेन बालेनापि भगवद्दिव्यमुखारविन्दामरन्दास्वादनस्तिमितमधुकरायमाणलोचनतया दूरीकृतचाञ्चल्येन तेन साभ्यर्थनं कमपि कमप्यन्तर्मनोरथपूरमुज्जृम्भयता संसेव्यमानः किञ्चित्समयं निषण्णश्च दशमीवेदिकायां स्वीकृत्य तत्रत्या अभ्यर्हणास्समुत्थाय यावत्प्रविशति निजगुहां विहाराय स्पृहाभरान्महाशान्तो महीकान्तोऽपि तावद्यथापुरं सरभसमुच्चलच्चतुरतुरगकरिवररथकुलनिबिडितपार्श्वस्समारुह्य मञ्जुलं कुञ्जरेन्द्रमति-जवेन समेत्य निखिलजनकदम्बाकरमम्बापुरं बहुविधदर्पणव्रजस्फारे निजागारे सुखेनानीनयद्विनीतमतिस्तां कुमुदिनी विटकामिनीं यामिनीम् ॥

पद्यम् ॥

अन्येद्युः ॥

नागोऽयं च नगोऽस्म्यहं भुवि भिदास्त्याकारकोह्यावयो-
श्श्रीनाथाय सदार्घ्य कुम्भमिभराड् भक्त्याहरन् श्लाघ्यते ।
कस्माज्जोषमहं वसेयमिति किं सौवर्णकुम्भं शिर
स्युन्नीयोदयभूधरो विरुरुचे स्फारं रवेर्मण्डलम् ॥७॥

करैर्यस्माद्भानुर्भुवि भजति निश्श्रीकमलिनी-
परीरम्भं ब्रूमस्तदमुमिह दोषाकर इति ।
वदन्त्येनन्दोषाकर इति वृथाज्ञास्सितकरं
शुचीभूतं सर्वं जगदपि च यत्पादपतनात् ॥८॥

तेजस्वी दुष्टोऽपि प्रायेण श्लाघनीय एव भवेत् ।
यद्ध्वंसितकुवलयमप्यपूजयन् लोकबन्धुरिति तपनम् ॥९॥

उदीतभानु भासुरप्रभाविभासिता गिरि-
व्रजा निजाधिनाथकुर्मतीशितुर्महोत्सवम् ।
विलोकितं सकुङ्कुमाङ्गरागरञ्जिताङ्गकाः
कुतूहलादिवाबभुर्दिगङ्गनालिसङ्गताः ॥१०॥

In Public domain. Digitization Muthulakshmi Research Academy

कञ्जरिपुरहमिवायं मञ्जुतरं मम सखित्वममुनेति ।
विधुमिव राजतकुम्भं दधदिभराट्छिरसि बत हरिमुपागात् ॥११॥

श्रीवक्षोरुहसखमेतदित्यतीव प्रेम्णेव द्विपसमुपाहृतस्य देवः ।
कुम्भस्यात्यमलतरेण दत्तपाद्यस्तीर्थेन प्रमुदितहृत्स माधवोऽभूत् ॥१२

बृन्दं बन्दं मनुजा मन्दं मन्दं द्रुतं द्रुतं भक्त्या ।
सन्दर्शनाय कुरुमतिकन्दरवसतेर्ययुस्सफलहस्ताः ॥१३॥

भानुर्यावच्चरमशिखरिप्रान्तसन्दत्त दृष्टि
र्मन्दंमन्दं भवति नृपतिस्तावदेव प्रमोदात् ।
हेषाघोषप्रचुरितमहादुन्दुभिध्वानरम्यै-
स्सैन्यैस्साकं कुरुमतिगिरिं कुञ्जरस्थः प्रतस्थे ॥१४॥

तावदेवगिरौ ॥

मन्नामभृत्या प्रकटात्मदास्यस्सच्चक्रराजस्समुपागतो वा ।
नवेत्यमुं भूपमुदीक्षितुं किं सच्चक्रराजो बहिरुज्जगाम ॥१५॥

उपयाते नृपसैन्ये राजति चक्रे तदापि हितभानौ ।
कटकभुवि भूभृतोऽभूदर्जुनसैन्धवसमागमो युक्तम् ॥१६॥

कदा हरिर्धन्यतमान् स्वदर्शनप्रदानतोऽस्मान् कलयेदितीच्छया ।
तदान्यषीदन्मणिमण्डपे नृपो मुदा समन्त्रिप्रवरस्सुधीवृतः ॥१७॥

तत्र च ॥

चलितकुचा लुलितकचावलितसुचारुस्वरा वरा गणिकाः ।
ललितरुचा चलितमुचा कलिकसुचातुर्यमीक्षिता राज्ञा ॥१८॥

अनुजाय महोत्सवे प्रदातुं घनरत्नानि विचिन्वतेव सिन्धौ ।
चरमे गरुडाग्रजेन दीप्त्यै रविबिम्बेन समं न्यमज्जि नूनम् ॥१९॥

मग्ने सिन्धुजलान्तरे दिनकरे मीनाः कनच्चापला-
द्राङ्नारङ्गफलभ्रमात्प्रमिलितास्सञ्चुम्ब्य तन्मण्डलम् ।

In Public domain. Digitization Muthulakshmi Research Academy

सन्तप्तोष्ठपुटाः करैश्शिततरैर्नूनं द्रुतास्स्युस्ततो
निश्शङ्कं किमपीह वस्तु गिलितुं ते साध्वसं बिभ्रति ॥२०॥

नवार्हणां पुष्करिणीतटे शुभामवाप्य सञ्जृम्भित भेरिकारवम् ।
अवार्यशौर्योऽथ सुदर्शनो हरेरवाप शैलेन्द्रगुहागृहान्तरम् ॥२१॥

तदानीम् ॥

अभिदधति पतङ्गं मां खगं चेति कस्मा
दतदनुगुणरूपं मानवा इत्यवेत्य ।
धृततदनुगुणाङ्गः पद्मबन्धुः किलाभा
द्दितिसुतरिपुगेहद्वारभागे गरुत्मान् ॥२२॥

तदनु ॥

कुण्डलिनौ द्वावेतौ तन्नभिदास्ते पतङ्गपन्नगयोः ।
इति किल पन्नगशयनोऽप्यारुक्षत्सममतिः पतङ्गं तम् ॥२३॥

कालिन्दीसूर्यपुत्रीत्यतिशयसहनेनीशचित्ता मुरारिं
सन्द्रष्टुं नैजसूतानुजभुजलसितं व्योममध्यावतीर्णात् ।
भानोर्जाता सरस्वत्युदितबहुरुचिर्नूनमित्यग्रधीभि-
स्सौवर्णच्छत्रयष्टिर्घनकनकमयीतर्कितासीन्मुरारेः ॥२४॥

गद्यम् ॥

तत्र किल पत्ररथकुलतिलकमधिरूढः कुरुपतिगिरिपरिवृढः पतत्रिनाथमहोत्सवो विजृम्भित इति सोत्साहं नर्तनलोलाभ्यामिव मरालाभ्याञ्च मरीवालाभ्यामभिवीज्यमानो निर्गत्यामूलाग्रसोपानमार्गपार्श्वद्वयपङ्क्तीभूत-सेवासक्तभक्तजनहस्तोदस्तगन्धक-बन्दुरप्रदीपबिम्बान्तरान्तराप्रफुल्लप्रदीपतल्लजरेखाभिरामतया निजाधिनाथश्रीनिवास-महोत्सवसेवाकृतेन्तरान्तरानिजखनिजनितवज्रपरिष्यूतपृथुलपद्मरागगुम्भित लम्बमानै-कावलीविभूषिताङ्ग इव तत्क्षणोन्मीलितमहादुन्दुभिबृन्दतौर्यत्रिकनिर्यद्रविनिर्यद्ध्वनि दत्तहस्तसेवाहेवाक-महाजनजालकोलाहलपरिपूरितकन्दरामुखबन्धुरोदञ्चित-प्रतिध्वानमिषेण वर्णयतीव महोत्सववैखरीं कुरुपतिगिरिपतौ स्तूयमानो भुजानुद्यम्योद्यम्य पठद्भिर्विजयस्तवान् भक्तजनबृन्दैः किमयमिदानीं मदावलवरदानावसरकलित-

In Public domain. Digitization Muthulakshmi Research Academy
धाटीविशेषं निरूपयन् शरणागतेभ्यः करुणाविशेषाद्विनतानन्दनो विनतानन्दनमधिरुह्य दिव्यनगरादवतरतीति गिरिवरोपत्यकाप्रदेशशिरो-विधृताञ्जलिभिस्सानन्दभाष्पैर्जनैः प्रतर्क्यमाणः क्षणमवरुह्याधित्यकाप्रदेशात्सरभसमुत्थाय विरचितसाष्टाङ्गप्रणामेन पणायता घृणाकरगुणाकरफणाधरफणावलिगणाशनचणाननपतत्रिगोत्रसुत्राम-बन्धुरस्कन्धपीठविरचितारोहणकलितागमललितागमान्तसन्ततिसीमन्तिनीसीमन्त-प्रान्तकान्तशचीकान्तमणिललन्तिकायमानदिव्यमूर्ते भव्यकीर्ते महामुनिजनमानसवनरुह-कलितनियतनिवासश्रीनिवासरक्षणीया वयं त्वदधीनसर्वस्वा इत्यनुपदमेवानन्दबाष्पमपि भगवद्दर्शनेऽन्तरायपक्षे सङ्कलयद्भिर्वेङ्कटरेड्डिप्रमुखैश्च तथा स्तुवद्भिस्साकं बद्धाञ्जलि-पुटेनाग्रतो निर्निमेषं भगवद्दिव्यवदनारविन्दसुन्दरप्रभालहरिनिराबाधविहरमाणमीन-दम्पतीयमानलोचनयुगलेनात्मवाहनदिनोत्सवविलोकनकुतूहलावतीर्णकुमारमयूर-हर्षविकसितपिञ्छसंशयाशंसिपिञ्चातपत्रमञ्जुलशीर्षेण शुभरूपेण भूपेन दत्तानुज्ञैर्भटपटलैः कटकस्य स्वानुगुणाकारेणैव स्थितिरुचितेति जानद्भिरिव विमुच्यान्तरेऽवकाशं वलयीकृत्य स्थापिते समुन्मीलत्प्रदीपरेखे कटकपर्यायनामधेये सैन्यै निजवल्लभाय श्रीनिवासाय महोत्सवसमयोऽसावित्युपायनमर्पयितुं हर्षबन्धुरया वसुन्धरया समुत्क्षिप्ते निजोदरोद्भूत नूत्नमहारत्नघटिते कटक इवैकके उताहो वर्तुलाकृतिसौवर्णतन्तुघटित-पाटलच्छायरत्नरेखे गिरिवनलक्ष्मीनासिकाभरण इव देदीप्यमाने आहोस्विन्महोत्सवाव-लोकनत्वरापरापतत्सुराङ्गनाकराञ्चलधृतसम्मर्दगलितैकतर पद्मरागमणिखचितकाञ्ची-कलाप इव काञ्चनदीप्तिं दधाने निखिलभुवनमोहनाय मदनेन सज्जीकृताभिरिवानर्घराग-मालिका पेटिकाभिस्सचेटिकाभिर्वारवधूटिकाभिरभिनयच्छलेन सकरधूननं सशिरःकम्पं तिरस्कुर्वन्तीभिरिव शुकपिकाङ्गनास्वररामणीयकं नृत्यन्तीभिरभिष्टूयमानः क्षणं समुज्जृम्भिते हृद्यवाद्यघोषेऽग्रत एव तेन राज्ञा समासेव्यमानसौदर्यः स्वनामधेयानुरूप-रूपया भवितव्यं मयेति चिन्तयन्त्येव पार्श्वद्वयेऽपि पङ्क्तीभूय प्रवहन्त्या सप्रदीपरेखया भूपालवाहिन्या साकं सम्प्राप्य दशमीवेदिकां तत्र सरभसमर्पितामर्चकैरभ्यर्हणां कटाक्षप्रसरेण मानयन् भवन्मुखकान्ति-नीराजनायापि नार्होऽस्मद्वल्लभश्चन्द्रमा इत्यभिनयता स्वातीनक्षत्रेणेव कर्पूरप्रदीपेन कृतनीराजनस्समुत्थाय किञ्चिदन्तरमुपसृत्य तत्र मम सखी द्यौस्तत्र तत्र विरलविरलैस्तारकारत्नैरसमग्राभरणेव लक्ष्यते हन्त रत्नगर्भाया मम किमिदमुचितं सख्या असमृद्धिविलोकनमिति वत्सलतयानन्तया तस्यै

In Public domain. Digitization Muthulakshmi Research Academy

वितरीतुमानाकमण्डल समुदञ्चितसङ्कणरवानेकबाहुलताग्रकरतलनिहितनानाविध-निजोदर जनितरत्नोत्करैरिव सरभसोदञ्चनसमयविकीर्यमाणकतिपयरत्नैरधो निस्सरत्पृथुल-धूमरेखाग्रसशब्दबहुदूरसमुत्पन्ननिष्ठ्यूतकतिपयाग्निकण समज्वलदाकाशबाणाख्य-गन्धकाग्नियन्त्रैः अवतीर्य नभस्थलादवलोक्य महोत्सवं पुनरपि निजावासं प्रत्युत्पतद्भि-स्सरभसमन्तरा बहुतरोत्सव दर्शनानन्दानुभवात्युच्छूनजठरतया उत्पतनासामर्थ्यात्पुन-र्लम्बमानैरिव स्थूलतरतारकैर्धरणीतलस्थापितयान्त्रिकप्रदीपितताराममण्डलाख्यगन्धक वह्नियन्त्रकोटिमुखात्समुत्पत्यान्तरिक्षात्पुनरधोगलद्भिर्धवलाग्निस्फुलिङ्गैर्दिवामन्यायां यामिन्यामारुह्य गिरिं प्राविक्षन्निजकन्दरामिन्दिरापतिर्भूपतिश्च यथापुरं भगवन्महोत्सव-दर्शनानन्दबन्धुरां निजजननीं पुरस्कृत्य सञ्जीकृतया पृतनया भृतनयस्तनयस्सोमभूपालस्य लीलया विशत्कृतजगदम्बादरमम्बापुरम् ॥

पद्यम् ॥

मम दिवसेऽस्मिन् कुरुपतिगिरिपतिरत्यद्भुतोत्सवम्भजते ।
इति कुतुकात्सेवितुमिव सप्तम्यां द्युमणिरभ्युदायिष्ट ॥२५॥

भगवत्सेवावशतस्सर्वे रागा नृणां प्रणश्यन्ति ।
इति बोधयन्निव रविः प्रणष्टरागः क्षणाद्बबूव तथा ॥२६॥

उदयदरुणभानुभानुपानादुदितमहारुणिमेव तत्र तत्र ।
सरसि सरसिजव्रजः प्रफुल्लः प्रविरुरुचे नवपद्मरागहृद्यः ॥२७॥

एतौ द्वौ सहितौ निरन्तरमहं त्वेको रमायाः कुचा
वेताभ्यामिव नो मया तुलयितुं शक्यौ तदत्रैतयोः ।
भिन्द्यां चेदहमेकमद्य समता स्यादित्यसूयावशादा-
रूढः किल कुम्भिकुम्भयुगले देवार्घ्यकुम्भोऽद्युतत् ॥२८॥

मलिनावेतौ कुम्भाविति शुचिमन्यं दधान इव दन्ती ।
राजतकुम्भं शिरसा बिभ्रद्देवाय तीर्थमुपजह्रे ॥२९॥

कुरुमतिधराधराग्रे मुररिपुरर्चां स यावदौषसिकीम् ॥
भजति स तावद्राजा सजवं तत्सेवनामचीकमत ॥३०॥

In Public domain. Digitization Muthulakshmi Research Academy

अताडयन्त दुन्दुभीनमर्दयन्त मर्दला
ननादयन्त काहलानसञ्जयन्त वारणान् ।
अवल्गयन्त घोटकानधारयन्त खेटका
नरिङ्खयन्त चामराण्यचालयन्त सैनिकान् ॥३१॥

अफुल्लयन्त केतनान्यवेल्लयन्त भल्लका
नसेचयन्त वीथीका अवर्षयन्त मल्लिकाः ।
अहेषयन्त सैन्धवानबृंहयन्त कुञ्जरान-
नन्दयन्त नागरांस्तदा मुदा घना जनाः ॥३२॥

इति नृपतिप्रतीक्षणपरेषु नरेषु पुर
श्चलति रटद्यशः पटहयुग्मधरे तुरगे ।
स्फुरति यथाक्रमं तुरगहस्तिपदातिचये
करिवरमारुरोह कमनीयमसौ प्रमदात् ॥३३॥

वत्सकङ्कञ्चन मामकान्वयभवं बध्नासि चित्ते गुणै-
रामाख्यं न हि मुञ्चसि क्षणमपि त्वं कस्य हेतोरिति ।
प्रष्टुं किं समुपागतेन रविणा च्छत्रेण शोणात्मना
पश्चाद्वेङ्कटरेड्डिरेत्य नृपतेरध्यारुरोह द्विपम् ॥३४॥

भेरीनादश्रवणरभसत्यक्तसर्वस्वकृत्या
मन्दाक्रान्तानवधिकुतुका संहतिस्सुन्दरीणाम् ।
द्रष्टुं यावन्मिलति नृपतिस्तावदेवेन्दुमित्र-
च्छत्रो यात्रामभजत मुहुश्चामरैर्वीज्यमानः ॥३५॥

साकं सर्वैस्तदानीं समुदितकुतुको धाव्यमानैस्तुरङ्गै
र्वेगादन्वीयमानः कुरुमतिशिखरि प्रान्तकान्तारभागे ।
अभ्याशे पुष्करिण्यास्सपदि करिवरात्सोऽवतीर्णस्समन्तात्
स्नातैस्स्वच्छोर्ध्वपुण्ड्रैः परिजननिवहैस्तं गिरिं चाध्यरुक्षत् ॥३६॥

प्रपितामहेन वेङ्कटनृपेण नैजेन कल्पितं मध्ये ।
संसेव्य मरुत्सूनुं पुंसां प्रवरो हरेर्भवनमाप ॥३७॥

In Public domain. Digitization Muthulakshmi Research Academy

गोविन्देत्युच्चरद्भिस्सरसिजनयनेत्यालपद्भिर्मुरारे
देवेत्युच्चैर्ब्रुवद्भिः फणिशिखरिपते मामवेत्युन्नदद्भिः ।
श्रीवासेत्युद्गदद्भिः कुरुमतियतितेत्यावदद्भिर्महद्भि-
र्हर्षानुद्वेलयद्भिर्गिरिरतिनिबिडो भासता दृष्टिपातम् ॥३८॥

केचित्प्रत्यग्रफुल्लद्बहुविधकुसुमस्रग्धरास्तत्र केचि
द्धस्तन्यस्तप्रशस्तप्रचुरमणिगणश्रेणिभूषाविशेषाः ।
बिभ्राणा नारिकेलानति पृथुलतमान् श्रीनिवासाग्रसेवा
हेवाकास्तस्य दिव्यालयभुवि निबिडीभूय तस्थुश्च दुस्थाः ॥३९॥

गद्यम् ॥

तदानीमुदारमतिस्सीतारामभूपतिर्भगवद्दिव्यमन्दिरालिन्द भुवि सानन्दं सपरिजनः प्रणम्य शतशः प्रतिहारं दक्षिणेन निषण्णं कुरुकानगराराजितो ऽहमयं च भगवान् कुरुमूर्तिनगराराजितः का मूर्तिभिदास्त्यावयोरत एवैतदङ्घ्रिपरिचरण एव दत्तचित्तेन भवितव्यं मयेतीवोपागतं धरणितलेऽपि सत्पथप्रकाशायावतीर्णमिव द्युमणिमत एव तरणिर्भवाम्बुधेरिति गीयमानं निजदिव्यशीर्षविनिहितभगवत्पादाङ्गुष्ठ निष्ठ्यूतया सन्निधावेवोन्नततरश्रीचूर्णतिलकसुवर्ण-धरणीधरशिखर निरोधादुभयथाधो निपत्य तन्मूलभागभ्रूकालिन्दीमध्यमिलितया तदधस्तादेव वदनारविन्दलावण्याम्बुधाव-दर्शनमुपगतया गङ्गयेव प्रकाशितशिखरया नासामूलमिलितया स्वच्छोर्ध्वपुण्ड्रवल्लीयुगल्या मनोहरं दिव्यवकुलमाला सौरभास्वादकृते पङ्क्तीभूयागतया मधुकरमालिकयेव तामरसाक्षमालिकया मनोहरवक्षस्थलं अतिजडक्षारसागरपरिरम्भगृहीतवैरस्यतया अज्ञानामपि विज्ञानसुज्ञानवितरणनिपुणमिन्दिराकरारविन्दस्यन्दमानमकरन्दमाधुरी-धुरन्धरमनेन विरचितं द्राविडवेदसागरमालिङ्गितुं सकौतुकं समागत्य परिचरन्त्या गङ्गयेव धवलांशुकवल्ल्या परिवीतदिव्यमङ्गलविग्रहं भगवद्दिव्यगुणाख्यकनकगुणं निगमच्छलयन्त्रविवरात्साधुसमाकृष्य प्रदर्शयितुं द्रुतया दिव्यसन्दंशिकायन्त्रिकयेव व्याख्यानमुद्रया नखाग्रस्थधूलीमात्रोऽपि संशयो नास्ति श्रीमन्नारायणपारम्य इतीव सूचयन्तं ज्ञानगरुत्मत्प्रदर्शनसमुत्तारितानेकभवपन्नगविपन्नजनं प्रपन्नजनकूटस्थं शठारिं शठारिं निखिलवैष्णव कुलाभरणं वकुलाभरणं वकुलाभरणं भगवन्तं गुरुवरं तं

In Public domain. Digitization Muthulakshmi Research Academy
तदन्तिक एव आश्रितभ्य उभयविभूतिप्रदानेन जनिताभ्यां यशोरेखाभ्यामिव समुन्नताभ्यां सितोर्ध्वपुण्ड्ररेखाभ्यां सकलवृजिनव्रजपिशाचदूरोच्छाटनकनकवेत्रलतायमानया श्रीचूर्णरेखया च समुल्लसन्निटलतटं नैजशुचितां प्रकाशयितुमिव शिरसि शिखान्दधानं निधानं सत्वसमृद्धेः मनुजावतारसमाच्छन्नेऽपि फणिपतिभावे स्वभावतारल्यादन्तरमान्त्या बहिः प्रकाशमानया फणामणिघृणिसरण्येव काषायशाटिकया सन्ध्ययेव लोकबन्धुमालिङ्गितं निरन्तरमत्र पद्माक्षस्सन्निदधातीति सूचनायेव पद्माक्षमालिकया कमनीयहृदयं पदे पदे प्रपन्नानां जनानां प्रदर्शयितुं स्ववशे स्थापिताया मोक्षलक्ष्म्या निवासकमलकुड्मलमिव जगदभयरत्नसम्पुटायमानमञ्जलिं मञ्जुलं बिभ्राणं श्रीमद्विशिष्टाद्वैतसिद्धान्तस्थापनसमुत्क्षिप्तेन सपताकजयस्तम्भेनेव सजलपवित्रेण दण्डत्रितयेन प्रकाशितबाहुमूलं मृणालसूत्रसच्छात्रस्वच्छोपवीतमुज्जीवितश्रीवैष्णवचर्यं श्रीमद्रामानुजाचार्यवर्यं च शतशः प्रणम्य वेङ्कटरेङ्गि-प्रभृतिभिः प्रचुरसत्वैस्सह ध्यायं ध्यायमवलोक्याचरणमुकुटाग्रं क्षन्तव्यो निखिलोऽप्यपचार आबाल्याद्विरचितस्तत्र भवद्भ्यां भवद्भ्यामाचार्यवर्याविति प्रार्थ्य सानन्दभाष्पैरपक्रम्य मन्दं मन्दं पश्चात्पश्चादेकैकम्पदं न्यस्य न्यस्य भगवत्प्रतीहार सम्मुखीनोऽभूत् ॥

पद्यम् ॥

तावदेव ॥

उच्छण्डोच्चलितहिरण्यवेत्र हस्तैर्भूपालो निखिलजनान्निवारयद्भिः ।
दासेरैर्निगदितसावधानशब्दैर्द्वारं तामभजत वेद्यमानमार्गः ॥४०॥

एते तिष्ठत सङ्घशोऽत्र मनुजा अन्तः प्रवेशाय वो
नैवास्त्यन्तरमेष भूपतिमणिर्देवस्य सेवाकृते ।
श्रीमत्कन्दरमन्दिरं निविशते कोलाहलः को महा
नित्थं भृत्यजनैर्जने नियमिते सोऽभ्यन्तरं प्राविशत् ॥४१॥

गद्यम् ॥

स च प्रविश्य मितेन परिवारेण कृताञ्जलिर्मञ्जुलतमं पुञ्जीभूतमिवाखण्डब्रह्माण्डभागधेयं निरन्तरबहुतरभक्तजनविन्यस्ताखण्डप्रदीपप्रभा प्रभावपरिभाविततमसि कृतविहारं महागुहागृहान्तरे अजस्रमपि सोमबाल पालनचतुरा-

In Public domain. Digitization Muthulakshmi Research Academy

विमौ मामपि पालयेतामिति समाश्रयन्त्या सोमबालरेखयेव नखरेखया मनोहरेण सम्पुटीकृतेन पादपद्मयुगलेन मनोहरं श्रीनिवासचरणनलिनजनिताह-मित्यतिदुर्वारगर्व-धूर्वहायास्सुपर्वतटिन्या अन्यादृशं वैशिष्ट्यं द्रष्टुमसहमानतया पादजातायास्तस्या अपि विचित्रोत्कृष्टता मयाश्रयणीयेति कटितटे द्विजन्मतामव-लम्ब्य जातया कलिन्दनन्दिनीझर्येव अत एव निरन्तरमालिङ्गती सखीवत्सलासरस्वतीतिशङ्कामङ्कूरयता पीताम्बरेण संवीतया खगाधिपोरस्थल-महानीलैकावलीहारायितया दिव्योरुयुगल्या कामपि कान्तिलहरीमुद्वहन्तं मामकीनधराधरभूषणमयमिति हर्षादालिङ्गता शेषेणेव प्रत्युप्तवज्रविशेषेण कटिसूत्रेण वर्णवैपरीत्येऽपि स्वोचितां स्थितिं न जहात्येष तादृशेनैव भूषणेन योजनीय इतीव मध्यमे काञ्चिकां मनसिजमहाराजमणिमयप्राकारसंशयावहां वहन्तं वामोऽपि मम सहजोऽयं करो भगवता विजयशङ्खेनालङ्कृत्य समुद्धृतो न मामजीगणदयमित्यवमानेनैवाधोमुखमितरं वामकरं कटितटे दधानं इह गिराविदं मम चरणयुगलम्भजतकजनाः किमिति वृथैवासारसंसार वंशारण्यचङ्क्रमकलङ्कितमतयो भवथेतीव सूचयन्तमभयहस्तमधः कृताग्रं प्रदर्शयन्तं चिरकालनिजबिम्बकृतवसति-रयमित्यपरिमुषितस्नेहतया परिरम्भमाणेन भानुकरनिकरेणेव वक्षोदेशकलितमन्दिरेन्दिरा करारविन्द परागरेखेति जनितसंशयाडम्बरेण पीताम्बरेण रचितोत्तरीयं निजजनन्या भगवतो नाभ्याः कुशलानुयोगाय नभसा प्रेषिताभिः स्वस्मिन् कृतनित्यवासाभिर्निकटदेशेव तरन्तीभिर्नक्षत्रमालाभिरिव धृततन्नामधेयाभिरानाभिलम्बमानाभिर्हारावलीभिः कमनीयमूर्तिम् अहमिव भगवन्नयनं जातोऽयमिन्दुरपि नैतस्य कलङ्किनस्साम्यमुचितं मम निसर्ग तेजस्विनस्त्रयीतनोस्तच्छ्रीनिवासोरस्य त्वमवाप्त्यैतस्मादपि श्लाघ्यो भवामीति निश्चित्योरसि भवमिव द्युमणिं कौस्तुभमणिं बिभ्राणं प्रतिदिनं सुधाकर-बाधामात्मनस्तद्भगिन्यै जगज्जनन्यै वक्षस्थलधामायै रमायै निवेदयामीत्युपेत्य कौस्तुभमणि-प्रदीप विलोकनभिया नाभीगुहां प्रवेष्टुमवतीर्यान्तरे तत्र भासमानप्रालम्बनायकमणिदिन-मणिदर्शनजातसाध्वसस्तब्धाङ्गया पार्श्वतो प्रयातुं पृथुलतारावलीनिरुद्धया चिन्ताप्राप्त-क्रशिमया तिमिररेखयेवरोमरेखया बाल्यचापल्यादुत्प्लुत्य वनमालां निजयूथादर्शन-जनितचिन्तेन तत्रैव निलीनेन तिमिरशिशुनेव दिव्यविग्रहलावण्यकालिन्दीझरीमध्य-समुद्बुद्धैकतरावर्तेनेव श्रीवत्सेन च दर्शनीयं कोऽसौ भवतोऽभिमानोऽहमेवाब्जरूपमिति का पुनर्भवतोऽहङ्कृतिरहमेव मित्ररूपमित्यन्योन्यसङ्घर्षादिव द्वाभ्यामप्यब्जमित्ररूपमव-

In Public domain. Digitization Muthulakshmi Research Academy
लम्बमानाभ्यां शङ्खचक्राभ्यां विराजितदोर्दण्डाञ्चल कदाचन पार्श्वद्वयस्थितयो-र्लक्ष्मीभूम्योस्सापत्न्य क्रोधात्परस्परमसहमानयोर्विवादशमनेच्छया वदनसौन्दर्याव-लोकनाय प्रत्येकम्पार्श्वयुगले कल्पिताभ्यामिव द्वाभ्यां मुकुराभ्यां कपोलाभ्या-मुन्मीलितकामनीयकं भगवन्करिवरद दयस्व बालयोरावयोरिति कर्णयोः कथयद्भ्यां वदनलावण्याम्बुधिमध्यजनितमकरशिशुभ्यामिव इन्द्रनीलखचितमकरकुण्डलाभ्यां विभूषितगण्डमण्डलयुगलम् उभयधापि सदामरहितेन स्मितेन कमनीयौष्ठपुटं वदनलावण्यलहरिविहरमाणाभ्यां मध्ये मदनमहाराजगतागतार्थकल्पितसमुन्नतनासा सेतुकृतव्यवधानतयान्योन्यवीक्षणाभावसम्फुल्लचापलाभ्यां चुञ्चूर्यमाणाभ्यामिव मीनदम्पतिभ्यां विलोचनाभ्यां सर्वतोभद्रनामनि सत्यप्यति तिक्ततया निन्द्या अस्मदीया जनानामिमां लोकनाथमधुरतरवदनकमलमरन्दसेवनेन निश्शेषयाम इति परीचिक्षिषया प्रथममुपागताभ्यामिव द्वाभ्यां निम्बपत्राभ्यां उताहो मुखरुचिह्रदे खेलत्कस्तूरीतिलकमीन-शिशुग्रसनाय युगपदुद्गत्य एक वस्तुकृताभिलाषजनित-क्रोधतया कलहविजृम्भणारम्भाय प्रथममवनम्रितमुखाभ्यामिव जलव्यालशिशुभ्यामाहोस्वित्सद्वंशप्रभवा वयं गोत्रभिदुपला यूयमिति मौक्तिकैरधिक्षिप्ततया नासा सद्वंशे जनिमवलम्ब्य हर्षादुत्प्लुत्य कर्णयुगलाभरणमौक्तिकैस्सह स्पर्धितुं श्रेणीभूय कृतप्रस्थानाभ्यामिव इन्द्रनीलमणिरेखाभ्यां भ्रूलताभ्यां प्रकाशितसौन्दर्यसर्वस्वं मदनमहावीर स्थापितत्रिभुवनविजयसूचकाग्रभागो-भयतो व्यालम्बिभ्रूपत्ररेखाभिराम नासिकेक्षुस्तम्भाग्रशुम्भत्तद्ध्वजचिह्नमीनशाबकेनेव उताहो त्रैलोक्यविजिगीषु कन्दर्पवीरभ्रूलताचापसमारोपितनासावंशाङ्कुरबाणा-ग्रफलकेनेव कस्तूरीतिलकेन कलङ्कितफालबालचन्द्रं सुतेन मम कर्णेनाप्यनन्तोत्तमाङ्गदेश-वसतिः कृता किमित्यहममुष्यपदे निवसामीति सावमानदर्पावष्टम्भमुत्तमाङ्गदेशदेदीप्य-मानेन सहस्रकिरणेनेव नवपद्मरागकिरीटेन सद्यस्समुदितरविमण्डलचुम्बिताग्रं घनाघनं विडम्बयन्तं भगवन्तं श्रीवेङ्कटाद्रिनिलयं श्रीनिवासमापादपद्मकोटीरं दर्शं दर्शमतृप्तान्त-रङ्गस्सगद्गदस्सानन्द भाष्पस्सरोमाञ्चस्सकुतूहलस्सप्रणामस्सस्तुतिवचनस्सस्वस्तिकः क्षणं पुनस्साञ्जलिबन्धः पुनस्सप्रणामः निभृतावयवो निर्निमेषदृष्टिर्निर्धूतान्यविचारो निश्चञ्चलमना ध्यायं ध्यायं भगवत्पादारविन्दं तत्क्षणं स्वप्रार्थनानुगुणं दिव्याभयहस्त-सरभसविगलत्प्रशस्तप्रसादकुसुमसमुदयतया भक्ताग्रगण्यात्मकूरुपुरभूपतिराज्य-लक्ष्मीशिरसि पुष्पाभिषेकमिव समर्पयन्तमाहोस्वित्तदीयशुभफलबीजावापमिव वितन्वन्तं

In Public domain. Digitization Muthulakshmi Research Academy

पुनः पुनस्तमेव भगवन्तमुद्वीक्ष्य सहर्षबाष्पगद्गदतया किमपि वक्तुमशक्तैर्वेङ्कटरेड्डि प्रभृतिभिः किमपि किमपि ध्यायद्भिस्सह तिष्ठन्नित्थमस्तौषीत् ॥

पद्यम् ॥

कुरुपतिशिखरीन्द्रमौलिरत्नं निरुपमदिव्यदयाकरं चिरत्नं ।
परमपुरुषमाश्रयामि भव्यं करिवरदं कमलासनादि सेव्यम् ॥४२॥

करितुरगरथं समग्रमेतत्कुरुमतिशैलपते यदस्ति राज्यम् ।
वरदतदखिलन्तव प्रसादात् स्फुरति दयाजलधे निरन्तरं मे ॥४३॥

शरणमिह भजामि देवनान्यं सरसिजनेत्र हरे विना भवन्तम् ।
सुरपतिनुत पालने मदीये वरदकृपां कुरु शीतलां दयालो ॥४४॥

कृतमिह दुरितं निवर्तयत्वं मितमतिनाद्य मया हरे मुरारे ।
इत उपरि पुनर्नजायतां मे मतिरिहपापवशादयाभरात्ते ॥४५॥

अपि तव पदयोर्नुतावशक्तं विपुलदयाकर बालमप्यमु मां ।
चपलमपि च रक्षसीति धैर्यं विपुलयति ध्रुवरक्षणं त्वदीयम् ॥४६॥

सभक्तिहर्षपुलकं निमीलिताक्षो हृदयमुद्दिश्य
कलिन्दनन्दिनीकनन्मिलिन्द बृन्दबन्दुरप्रभानुभाव भासुरं ।
सुरासुराभिराधितं दरारिणीधरं तमग्रकन्दरञ्च
मन्दरं पुरा दधार यो गिरिन्तमिन्दुसुन्दराननम् ॥ ४७ ॥

पृदाकुराडुदारमौलिदामधामसन्मणी
घृणिव्रजक्षणद्युति क्षणारुणं गुणाकरम् ।
न वारुण प्रभाधरं सुवारणाधिवारणं
पणाय हृत्फणाधरारिणानिशं पणायितम् ॥४८॥

सप्रश्रयावनमितोत्तमाङ्गम् ॥

रमाक्षमादि मानिनीकराब्जराजिराजितं
सुखावहं नखावलीनिखाततारकाप्रभम् ।
पदद्वयं ददच्छ्रियं सदा हृदन्तरे हरे
निरन्तरं विचिन्तये नितान्तशान्तिदन्तुरे ॥ ४९ ॥

In Public domain. Digitization Muthulakshmi Research Academy

पुनस्सानन्दम् ॥

विराजमानराजशेखराजराजराजस
त्सुराधिराजमुख्यनिर्जराग्र राजिपूजितम् ।
दुरासदैः पराक्रमैर्निराकृतामरा हि तं
स्थिरानुरागराधितं परात्परं हरिम्भजे ॥५०॥

साभ्यर्थनम् ॥

चिरन्तनोक्तिसन्ततप्रचिन्तनाति कान्तहृ
न्नितान्त शान्त सन्तति प्रतान्ति शान्तिदान्तरः ।
निरन्तरं निशान्तयन् हृदन्तरं श्रियस्स्वयं
सुशर्मधर्मनिर्मितिं दधातु कुर्मतीश्वरः ॥५१॥

एवं स्तुत्वा कुरुमतिपतिं तस्य हस्तारविन्दा
त्स्रस्तं रम्यं सुमसमुदयं सप्रसादं प्रमोदात् ।
ध्यायं ध्यायं हृदयकमले तत्पदाम्भोजयुग्मं
जग्राहायं विनमितशिरा भक्तिसान्द्रः कराभ्याम् ॥५२॥

तदनु ॥

यदाज्ञप्तं सोमक्षितिपतिवरेणात्मपतिना
प्रवृद्धं तत्सर्वं बहुसुकृतकर्त्री चरति या ।
गुणज्ञात्री दात्री विबुधनुतिपात्रीकृतयशा
मुरारिं लक्ष्म्यम्बाकृतविनतिरप्रार्थयत सा ॥५३॥

लक्ष्मीपुत्र इति प्रथामुपगतं बालन्तव श्रीपते
सीतारामनृपं सदापि नियतं तत्प्रीतये रक्षसि ।
त्वय्येव प्रतिघाति भारकलुषा स्यादन्यथा सारमा
स्त्रीणां सूनुषु वल्लभादपि कृपा बह्वीति कैर्न श्रुतम् ॥५४॥

लक्ष्मीकटाक्षलेशं प्राप्यैवाहं यवो भवन्ति सुराः ।
वशगोऽसि मादृशान्त्वं रमानिवासोऽपि सर्वदा चित्रम् ॥५५॥

In Public domain. Digitization Muthulakshmi Research Academy

अपि च॥

प्रह्लादचन्द्रहासध्रुवमुखशिशुरक्षणाति निपुणस्त्वम् ।
ध्रुवममुमप्यवसि शिशुं स्त्रीचापल्यात्कृतार्थना तदपि ॥५६॥

वक्षस्थलस्थितां लक्ष्मीमुद्दिश्य साञ्जलिबन्धम् ।
सोमस्वसेति विदितासि जगत्सवित्रि
सोमेन्द्रवल्लभतमास्मि च मामकीनम् ।
बालं महार्घविभवं कुरु सत्कटाक्षै
स्सर्वेऽपि पूर्णकरुणाः किल बन्धुतायाम् ॥५७॥

सकलनृपमौलिलालितसाम्राज्यस्य त्वदीयतनुजस्य ।
लक्ष्मीपुत्र समाख्यां विरचय मातर्जगद्विदिताम् ॥५८॥

इति ॥ तदनु ॥

मामेवायमुदीक्षतेति ललितं मामेव मामेव मे
भाग्यं योग्यमनन्यभोग्यमिह यन्मामेव पश्यत्ययम् ।
इत्थं जातविचिन्तनं नृपजनं दिव्यैः कटाक्षोत्करैः
प्रत्येकं प्रविलोकयन्निव बभावाद्यः पुमान् सर्वदृक् ॥५९॥

नीराजने सिताभ्रस्मेरानघ दीपकलिकया जनिते ।
नारायणसेवाया नारात्सुहितोऽभवत्स सुहितोऽपि ॥६०॥

शनैश्शनैर्न्यस्य पदानि पश्चात्तदा विनिष्क्रम्य गुहागृहान्तात् ।
दृष्टिं नृपो न्यस्यति यत्र यत्र देवं ददर्शेव स तत्र तत्र ॥६१॥

भृत्यावेदितसावधानगमनस्सत्यात्मनामग्रणी
स्तद्दिव्यालयशीर्षकूटसदनामुद्दण्डभक्ती रमाम् ।
नत्वा साधुसहस्रशो नरपतिस्तुत्वा च तां सादरं
सत्रामन्त्रिजनैर्महीध्रशिखरान्मात्रायुतो वातरत् ॥६२॥

तदनु ॥

पटुघोटक करटिघटापटलविपाटितधरान्तरादुदिता ।
हेलिहयालिं विदधे धूलीपालीविवर्णतररूपाम् ॥६३॥

In Public domain. Digitization Muthulakshmi Research Academy

यावद्देवेश सवाप्रमुदितमनसा धन्यजन्या जनन्या
साकं लोकं समन्तात्प्रमिलितमधिक श्रीकमालोकमानः ।
राजद्राजाधिराजः प्रविशति भवनं भासुरेऽम्बापुरे
तावत्प्राविक्षदम्भोजनि निचयसुहृद्विभ्रमादभ्रमध्यम् ॥ ६४ ॥

द्रुतकृताभ्यवहार उदारधीर्द्रुतविलम्बित तानवचो मुदा ।
निशमयन्विजहार सुहृद्वृतो भृशमयं शमयन्त्रितधीर्नृपः ॥६५॥

शठमर्षणकुलतिलकः कृष्णः कविसार्वभौमबिरुदाढ्यः ।
श्रीनिवासविलासेऽस्मिंस्तुरीयमुल्लासमभ्यधान्मोदात् ॥

इति श्रीमत्प्रत्यग्रदुर्गकृष्णकविसार्वभौमस्य कृतिषु
श्रीनिवासविलासाख्ये चम्पूप्रबन्धे
॥ चतुर्थोल्लासः ॥

In Public domain. Digitization Muthulakshmi Research Academy

श्री श्रीनिवासपरब्रह्मणे नमः

श्रीनिवासविलासे - पञ्चमः उल्लासः

.....

तावदेव ॥

वातातिवेगललिताकृती हयौ स्फीताङ्गकौ समधिरुह्य सादिनौ ।
नेतारमेत्य धरणेः कृताञ्जली प्रीतान्तरं न्यगदतामिदं वचः ॥१॥

गद्यम् ॥

निशामयविशारदमते भूपते तुरगारोहावावां यद्यथा खल्वनुशासितौ महाराजेन विमृश्यतां कियानुपागतो जनसङ्घ इति तत्तथा यावन्निजमतिवैभवं साधु विचारितं विज्ञाप्यते चित्तावधानदानस्वतन्त्रेण निशम्यतां पार्थिवेन्द्रेणोपागताश्श्रीनिवासचरणारविन्दसन्दर्शनाय बृन्दं बृन्दं विविधदेशभवत्वादज्ञातमुखाः परस्परं यौष्माकीणरीतिरसाध्वीत्यधिक्षिप्य स्व स्व देशभाषारूपाचारालङ्कारादीन् केचन प्रशंसन्ति केचन समागच्छन्त्यतित्वरया धवलोत्तरीय-प्रावृतमस्तकाः वसनग्रन्थिघटितवामकक्षाब्रह्मवर्चसदीप्रा विप्राः आगताः केचन प्रथममाक्रम्य स्वावासोचितं प्रदेशं केनचित्पदे न्यस्तमात्रेऽपि तेन सहोच्छृङ्खलं कलहायन्ते वैतण्डिकाः एकत्र विपणौ पद्मिनीवल्लभकरा इव पुण्डरीकाणि प्रफुल्लयन्तः पाण्डरतरपटमण्डपान्यसङ्ख्यात धान्यपरिपूरितान् गोणीनिवहानुद्योगिन इवोद्वृत्तान्विपक्षान्वृषभमहिषपृष्ठेभ्यः पातयन्ति केचन राशीकृत्य राशीकृत्य तण्डुलानत्रागम्यतामहो तस्मादपि दीयतेऽधिकं प्रस्थद्वयं मयैकरूप्यस्येत्युद्धृत्य बाहूमाहूय तावत्तस्मादप्यतिशयितं किञ्चिद्वितीर्यते मया समागच्छेत्याक्रोशति कस्मिंश्चिन्निवृत्य गच्छतोऽपि क्रायिकान् पुनः प्रस्थत्रयं दीयते यदीष्टमागम्यतां किं वृथा गच्छथेत्याक्रोशन्ति नैगमाः । एकत्र पृथुका भवामो वयं भवतीनामित्याक्रोशन्त इव सद्यो भर्जिततयोलूखलान्तरयोऽग्रप्रथमघट्टनेन चुङ्कुर्वतश्चिपिटीकरणाय व्रीहयो ललनाभिर्वयमिव पृथुका महिता इमे जाता इति हर्षादिवोद्वल्गद्भिस्तनकुट्मलैर्मनोहरन्तीभिश्शृङ्गारिणीभिराघट्यन्ते । कुत्रचिदापणिक सुट्टग्भिरिमे हरिमन्थकाः कठिनस्वभावा इति क्रुधेव सम्भर्ज्य विदल्यन्ते चणकाः । कुत्रचित्तत्तद्वस्तूपाहरणाय समागत्य दीयतामिक्षुपाक इति याचमानान् कांश्चनाबाल्याशिक्षितचाटुवचनतयानुदितकौशलान् उद्धियतां वा पृथुलगुड इति वदन्तः केचन वाणिजास्तद्वचनश्रवणमात्रात्पलायमानांस्तान्वीक्ष्य

In Public domain. Digitization Muthulakshmi Research Academy
सहस्ततालमपहसन्ति। इतरत्र शर्करा दीयतामिति पृच्छत्सु केषुचिदसन्निहितशर्करः कुशलः कश्चन वाणिजः किमहो सिकतामभ्यर्थयध्वे भ्रान्ता इत्यपहसन् पुनस्तेषु सितावितीर्यतामित्यनुयुञ्जानेषु इयं सितैवेति गोधूमपिष्टततिमुद्धृत्य प्रदर्श्य तेषु पुनः किमियं सिता वा प्रतारयसि वास्माभ्राज्ञे निवेदयाम इति किञ्चिदुच्चैर्जल्पत्सु किमहो सुदृशो यूयं साधु विलोकयध्वं किमित्युक्तं मया न चेद्दृष्टिर्भवतामन्येषां दर्शयत सिता वा नवेति तैस्सह चिरं विवदते। इतरत्राज्ञातविपणिमुखः कश्चित्समेत्य हिंगु त्वदापणेऽस्ति वेति कृतानुयोगश्छान्दसो विप्र एहीत्याहूय सुरामठेऽत्र यदिच्छसि तन्मामनुयुङ्क्ष्व ददानीति वदति विक्रेतरि तदुदीरित निशमनानुपदमेव पिधाय कर्णावुद्धृत्य भुजामुन्नीयोपवीतं निवीतीकृत्य निष्ठीवन्मुहुर्मुहुरपसरन् दूरं हन्ता जन्मनोऽप्यप्रविष्ट-पण्यवीथीकः किमिति प्रविष्टोऽस्मीदानीं जाल्मस्सुरामठे मामनुयुङ्क्ष्वेत्यवादीत्प्रायेण तच्छुण्डापानस्थानं भवेत्कीदृशी निष्कृतिः कार्या तदनुगुणेत्युच्चैर्जल्पन् जनैर्हास्यपदवीमा-निन्ये। अपि च महाजनसङ्घपारावारसङ्गतितुङ्गतरकौतुकसमागत रङ्गदुत्तरङ्ग गङ्गायमुना-सरस्वतभ्रान्तिवल्लिकामतल्लिकोपघ्नायितक्रयविक्रयिकानीतसमुद्वेल्लन्मांसलतर-धवलनील-शोणवर्णमहोक्षाध्यक्षलक्षनिबिडीभूतः क्वचिद्वध्यमानविप्रस्य मानबन्धुरवसनग्रन्थिशत-सङ्कुलितपटमन्दिर बृन्दान्तरसार्थवाहसार्थ प्रसारित मञ्जुलमाञ्जिष्ठलाक्षिकरौचनिक-माहारजन व्रजसौवर्णतन्तुसन्ततिदन्तुरितराङ्कवादि विविधपटपटलप्राज्यवणिज्या समागतमानुषशतसहस्रयूथ सम्बाधकलित कन्दरान्तरप्रवेशप्रबुद्धप्रति ध्वानाम्रेडित-कोलाहलबधिरीकृतकर्णबहिर्निर्गताजन्ममौनिनिवह सभ्रूभङ्गोत्तमाङ्गधूननदृश्यमानवैभवः क्वचिदारोहद्भिरवतरद्भिः प्रणमद्भिस्स्तुवद्भिः पश्यद्भिर्धावद्भिस्स्खलद्भिरुत्तिष्ठ-द्भिर्हृष्यद्भिर्घष्यद्भिरेहीति क्रोशद्भिस्तिष्ठेति प्रतिब्रुवद्भिः सिञ्चद्भिर्वीथी रचयद्भी रङ्गवल्लिकाः किरद्भिः कुसुमानि गृह्णद्भिश्शर्करामाददद्भिः फलानि प्रचुरयद्भिर्भगवन्नामकीर्तनानि तजद्भिर्रन्यान् गर्जद्भिर्मोदादावर्जयद्भिस्तांस्तान्वर्जयद्भिश्श्रीनिवाससेनाविशेषादितर-दार्जयद्भिस्तत्तद्दानेन सुकृतमार्जयद्भिरानन्दभाष्पैर्नयनानि जनैर्निरतिशयनिबिडित-निजशिखरशतप्रान्तकान्तार परिसरो गिरिवरः कामपि कान्तिलहरीं बरीभरीति। किम्बहुना पटमण्डप सहस्रैर्वृषभायुतैस्तुरङ्गलक्षैश्चैलजालकोटिभीरूप्यराशिभिर्भक्ष्य पुञ्जलक्षैः रसद्रव्यनियुतैर्वाणिजशतसहस्रैस्तण्डुलोत्करशतैर्गहना विपणिप्रदेशाः। अधिश्रयणी मया ओदनप्रचुराभाण्डमसृणिताः पर्णशाला निबिडिताश्च शैलप्रान्ताः।

In Public domain. Digitization Muthulakshmi Research Academy

मृदङ्गनिनदमृष्टास्तालारावताण्डविताः विपञ्चिका क्वणन विस्रम्भणीयाः तानतारकिताः गानगम्भीराश्च शतशो वेशवाटाः । किञ्चि त्वं कोऽसीति पृच्छतां को वा तव किं विचारणेनेति प्रतिवदतां मुञ्चत मार्गमित्याक्रोशतां गच्छत गच्छतात्रैव वा भवतां मार्गः परिणाही खलु कुरुमूर्तिधरणीधर इति तान्प्रतिब्रुवतां तिष्ठन्ति किमत्रैव भवन्त इत्यापृच्छ्य हुं तथेति तैर्दत्तोत्तरतया प्रतीक्षध्वं क्षणमस्मद्वि-भूषणोत्करमिति विन्यस्य तद्वशेकृत्यान्तराय गच्छतां तत्क्षणमेव तमपहरत्सु तेषु समागत्य हन्त जाल्मा वयं किमित्यज्ञातमुखानां तेषां वशे न्यस्तमस्माभिः प्रचुरपरिष्कारबृन्दं कुत्र गता वा पश्यतोहारास्ते दुरात्मान इति वलीमुखानामिव प्रदर्शितानेकदशनानामुन्मील्योन्मील्य लोचनानि दिक्षु दिक्षु विलोकमानानां दृष्टं दृष्टं जनं पृच्छतां हन्त कियान्प्रमाद इति प्रणिगदतामत्रान्तरे महाराजाज्ञायत्तैरस्माभिर्विचार्य दापित सर्वस्वानां माहाजनिकीं महीक्षितो धार्मिकतां श्लाघमानानां अन्यच्च भक्षयतां भर्जितचणकान् चर्वतां चिपिटान् खादतां भ्रष्टयवान् दशतामपूपान् आस्वादयतामासवविशेषान् मत्तानां प्रमत्तानामुन्मत्तानामिव चरतां दृप्तानां तृप्तानां सुप्तानां च क्वचिन्मालिकावेष्टित-निबिरीसशिखाभराणां ताम्बूलरञ्जिताधराणां चन्दनचर्चितकलेबराणां वधूटीमुखारविन्द-विलोकनमात्रदूरीकृतान्यव्यापाराणां परस्परकराञ्चलग्रथित कराञ्चलानां चञ्चलानां यौवत शतान्तरप्रवेशावसर युगपदुरोजगिरिकोटि कोटीघट्टनदौर्ललित्य सहनातिधीरतर वक्षस्स्थलानां यौवनसार्वभौमपरतन्त्र चित्तराज्यानां प्राज्यानाञ्च जनानां कमपि महोत्सवं प्रपञ्चयितुं कियन्तावावाम् । अपि च क्वचिदुन्मस्तकांस्तमोङ्कुरान् गिरिवरदर्शनमात्रेणैव खण्डयन्त इव विरचित चूडाकर्माणः कृतमज्जनाः पुष्करिणी तीर्थे प्रणिगदन्त उच्चैर्गोविन्दमुकुन्द मुचुकुन्दवरदनन्दनन्दनपावितदासश्रीनिवासेत्यारोहन्ति गिरीद्रन्दर्शनाय भगवतः । किमिति निगदामो वयं महिमानं रमानिवासस्य यन्निजपुष्करिण्या मनवस्थयाखिलचेतनस्पृष्टायामपि ये केचन मज्जनाय जलपानाय च किञ्चिदपि जुगुप्सन्ते तेषान्तत्क्षणमेव जायते खल्वभागधेयानामिवालक्ष्मीः कापि दुर्दशा । तदपराधभीतानां कृतभगवदभ्यर्थनानां तेषां जनस्य पश्यत एव सा प्रणश्यति लक्ष्मीकटाक्षवीक्षितानामिव दीनता । नासत्यं ब्रुमस्सकल लोकविख्यातं खल्वेतदहो सुकृतम्बहुचिरार्जितं किल भूपालमणेरिति कैर्नविज्ञायते विज्ञानिभिर्यदेष भगवानीदृशमहिमा दुर्निग्रहमनुग्रहं शीतलं यस्मै धारयति । किं बहुनाम्बरमणिबिम्बं लम्बते किञ्चिदद्यादिपुरुषस्य

In Public domain. Digitization Muthulakshmi Research Academy
दिव्योपानद्युगलानयनोत्सवावसरश्च प्रत्यासन्न इव लक्ष्यते महाराजः प्रमाणमित्युदस्य दक्षिणभुजं योधयूधोचितं करतलनिटलघटनरूपं प्रणामं विरचय्य दत्तानुज्ञौ राज्ञा गिरिकटकतटीमटीके तां गन्धवहबान्धवाभ्यां सैन्धवाभ्याम् ॥

पद्यम् ॥

तावत् ॥

यच्छायां सनकसनन्दनादयोऽपि
स्वच्छान्तःकरणघनास्समाश्रयन्ते ।
इच्छायै तदनघपादुकेक्षणेऽतिस्वच्छन्दं
धरणिपतिर्ददौ विलासम् ॥२॥

तदनु ॥

सान्द्राभिः प्रचुरतरं प्रहर्षिणीभि स्साटोपं करटिघटाभिरुद्धटाभिः ।
सन्नद्धा चलितसटाभिरुत्कटाभि स्सा रेजे नृपपृतनाहयच्छटाभिः ॥३॥

तरसा वरसादिरसानुगुणोच्चलितैर्ललितैरुरसा शिरसा ।
नमितेन समुन्नमितेन मुहुर्निरवल्गिसुवल्गुहयैर्विभयैः ॥४॥

आजानेयावयमिहखुरान्नः खरान् सङ्गिरन्ते
हन्तेत्यग्रे नमित वदनाश्चिन्तयेवोत्सृजन्तः ।
सूत्कारौघांस्तदिदमयशो मार्ष्टुमेतान् धरायां
केचिद्वाहाः पिदधत इव वालिखंस्तां खुराग्रैः ॥५॥

अञ्जनाभं द्विषद्वाहिनीभञ्जनं मञ्जुलं कुञ्जरं सोऽधिरुह्य क्षणात् ।
रञ्जयन्नञ्जसा तञ्जनं भूपतिः कञ्जनाभेक्षणे कौतुकान्निर्ययौ ॥६॥

ययुरग्रे भूमिपतेः कुरुमतिशिखरीन्द्रदत्तचित्तस्य ।
द्विरदास्तुरगाः पदगा अपि शुभकरवालहस्तकलितास्ते ॥७॥

अगः पुरस्ताच्चलतीह कोऽसाविति ब्रुवन्तं करिणं समीक्ष्य ।
ग्रामेयकस्त्रीमयने निषादीनागोऽयमित्याह हसन् प्रगल्भः ॥८॥

In Public domain. Digitization Muthulakshmi Research Academy

तदानीम् ॥

ययुर्भूपस्याग्रे किमु तुरगमेधेन यजते
तिङन्तोऽयं बाले नहि नहि सुबन्तस्तव परम् ।
कटाक्षे तारल्यं प्रविशति मनश्चापि तुरगा
इतीदं नाश्रौषीर्यदिति सुसखीं काचिदगदीत् ॥९॥

सरसिजनयनोत्सवागतांस्तान्
धुरि नृपतिः प्रविलोकयन् जनौघान् ।
गिरिनिकटमवाप पुष्पिताग्रा
विटपिगता ललिता लता दधानम् ॥१०॥

बहुतरलसत्तेजा राजाग्रकुट्टिममण्डपे
कृतनिवसतिर्मन्दं मन्दं ददर्श तदा मुदा ।
चकितहरिणीलोलैर्नीलैर्विलोचनविभ्रमै
रतिसुललिता रूपाजीवाः कृताद्भुतनर्तनाः ॥११॥

गद्यम् ॥

एवमानन्दनिर्भरहृदयेषु भूपालप्रमुखेषु जनेषु भगवन्महिमातिशयेन शिवङ्करेण केनापि सत्वेनावेशितास्सङ्घे सङ्घे समुत्प्लुत्य सकोलाहलक्ष्वेलितमुत्क्षिप्य भुजान्नृत्यन्तो गण्डशैलाग्रेषु शिखरनिकरेषु कन्दरासु महीरुहेषु विपणिसमूहेषु राजपरिसरे भगवद्दिव्यगेहाङ्गणे च यत्र यत्र निषण्णास्तत्र तत्र वृद्धा अपि बाला अपि तरुणा अपि मुग्धा अपि जानाना अपि केचनानादृत्य बन्धुवर्गमनुद्वीक्ष्य राजानप्यविचिन्त्य गौरवमनभिभाष्य कमपि विस्मृतनिज-शरीरव्यापारास्समुत्पतन्तः पुनः पुनः कुत्रचित्कुटुम्बिन्योऽपि काश्चनाग्रध्नन्त्यो विश्लथानपि केशपाशानना ददानास्तनाञ्चला-द्विगलितमपि सिचयाञ्चल मनुद्वीक्षमाणाविच्युतानपि हारानपरामृशन्त्यस्स्वेदविलुलितमपि तिलकं स्वयमपि नर्तनानीवाभ्यस्यन्त्य उत्प्लवमाना स्वैरिणीसख्यमिव लज्जानुषङ्गं विजहत्यः कुत्रचित्किमेतदतिचित्रमीदृशी दृष्टा क्व वा भगवच्छक्तिर्धूर्ता एते दाम्भिका वृथा जनविडम्बनायैवमाचरन्तीति ये केचन मनसि किञ्चिच्चिन्तयन्ति यदा तदैव स्वयमेव रोमाञ्चिताङ्गास्सानन्दभाष्पाः परमहिमसम्बन्धादिव कम्पमानाङ्गाः चिरार्जितं

In Public domain. Digitization Muthulakshmi Research Academy
वृजिनमिव विधून्वन्त उन्मत्ता इवास्वायत्तीकृतचित्ताः क्ष्वेलन्त- स्सहस्ततालमुत्लुत्योत्लुत्य गिरेरग्रान्मूलं मूलादग्रं धावन्तः अनालोचयन्तो विगलितमपि शीर्षवेष्टनमपश्यन्त- स्त्रस्तमप्युत्तरीयं विलोकयन्तो भगवन्मयमिव जगत्सर्वं किमिदं वयमप्येवमेव जाता इति साश्चर्यचित्ता विरचिताञ्जलयो भगवते को वेद भगवन्महिमानं तव मुग्धैरस्माभिर्यदन्यथा चिन्तितं तत्क्षम्यतां भवता शरणागतवत्सलकरुणावरुणालय श्रीवेङ्कटाचलपते श्रीनिवासेति चपेटेन गण्डद्वयफलकं स्वयमेव ताडयमानाः केचन भक्तिभारझरीसमाकर्षण विवशित- हृदया इव स्वग्रामनिर्गमनात्प्रभृति साटोपं विरचितवल्गना आपुष्करिणीतीरं प्रपलायमानाः पुनर्निवृत्ताः किमपि विस्मृतं विचिन्वन्त इव निरवधिकनिधिलाभहर्षादिव पुनः पुनरुत्पतन्तः किमपि विचिन्तयन्त इव क्षणं तूष्णीं भवन्तः केचन यातयातदूरं समग्रपातकानि नास्त्यवकाशोऽत्र युष्माकमिति सूचयन्त इव बाहूनुद्धृत्य प्रेङ्खयन्तः केचन नहि नहि कुरुमूर्तिनाथ महिमसदृशो महिमात्यस्येन्यभिनयन्त इवाकस्मिककम्पितशिरसः केचनोच्चतरां गतिं वितरति जनेभ्यो भगवत्पादुकासेवनमिति सूचयितुमिव शश्वत्कृतोल्लङ्घनाः पुनरपीदृशे श्रीनिवासमहिमा- तिशये ये केचन दत्तदूषणास्ते पुनरधः पतन्त्येवमिति बोधयितुमिव गगनाद्भूमितले निपतन्तः पुनरेकत्र महोत्सवसेवामिलित- महाजनभरासहनतया शरीरं धून्वन्त्या वसुन्धरयोट्टङ्किता इव केचिदुद्वल्गन्तः दण्डपाणेरपि दण्डपाणयो वयं श्रीनिवासपादा- रविन्दप्रपन्ना इति सूचयितुमिव करतलकलिताखण्डदण्डाः केचन निश्वासश्वसननिगलन- कृते श्रवणवल्मीकेभ्यो बहिरुद्गताभिर्गरुडध्वज महिमावेशजनितसाध्वसतया वेपमानाभिरिव कृष्णाहिकन्यकाभिः प्रतिक्षणं कम्पिताभिर्भ्रूलताभिरङ्कूरयन्तो जनानां हृदये किमपि ससाध्वसं हर्षबीजं भगवद्भक्ता यावदितस्ततश्चरन्ति तावत्परितस्सरभसं बृन्दं बृन्दमादृष्टिपातं भगवन्महिमातिशयेनोत्पतद्भिर्जनैर्निबिडिततयानुक्षणं विचिन्त्य विचिन्त्य महिमानं रमाकान्तस्य रोमाञ्चवत्यामिव क्षित्यामीदृशोत्सवनिर्वर्णनात्स्वयमप्या- वेशितेषु सिंहनादानिव विमुञ्चत्सु भेरीपटहपणव-हूणवाद्यकाहलाद्येषु समग्रवाद्येषूद्घुष्य- माणेषु स्वयमप्यावेशसमुपक्रान्तनर्तनेष्विव चामरोत्कम्पवसनपताकापटलेषु गन्धवाहा- न्दोलितेषु बहुतरं दर्शं दर्शं महोत्सवं सर्वंसहा स्थिरेति ख्यातायामपि जगदीशस्य दिव्यावेशं सोढुमक्षमतया तत्क्षणमुत्थाय स्वच्छन्दं रिङ्खन्त्यामिव वसुमत्यामुज्जृम्भितायां धूलिकापालि- कायामग्रतो द्रुततरमाकुरुमतिगिरिसमाधाव्य पुनः श्रीनिवासपादुकासमाश्रयेण विना

In Public domain. Digitization Muthulakshmi Research Academy

धरणीभृदाश्रयोऽनुचित इति मत्वेव निवृत्य पलायमानैरापादुकादर्शनमितरैरावेशितैर्नरैः कोटिशो मिलितैः परिवृतं श्रीनिवासदिव्यपादारविन्दयुगलीसमर्पणकृते तदनु ग्रहवर्धमाने वर्धमानाख्यग्रामे तद्दासेन केनचित्सनियमं निर्मितं धार्यमाणं शिरसि तेनैव समग्रजनभवपाशजडिमविदलनचणा मदावलवरदस्य पदारविन्दयुगली निरन्तरभवपाशि-समाख्यञ्जनाधिनाथं मामपि पालयेदेवेति निरङ्कुशविश्वासा त्रथमन्तदभ्यर्थनोपायनकृते वरुणेन प्रेषितमिव निष्कराशियुगलं तद्दिशा भागादानीयमानं जलधिसुतातनुलता-नितान्तकान्तिसन्ततिमपहृत्य समाश्रित्य घनं दुर्गं तेनापि वलरिपुमणिसच्छायरमानिवास-दिव्यविग्रह रुचिप्राप्तनिग्रहखेदबहुधवलेन साकं तत्पदारविन्दयुगलान्नान्यच्छरणमिति द्वेधाभूय समागच्छदिव विद्युल्लतामण्डलम् आहोस्विन्महीभृतामनन्तपादमैत्र्यमवश्य-मुचितमिति तत्परिशीलनाय बालाविमाविति वत्सलेन कनकाचलेन सहायीकृत्य सुरदीर्घीकाम्प्रेषितमिव समुल्लसच्छिखरं सकन्दरं निजशाबक युगलम् उताहो अजस्रविष्णु-पदाभरणं वदन्ति मामनाश्रिततच्चरणं नेदमुचितमिति निरन्तरतत्पदयुगलोदग्राभरण-द्वन्द्वरूपं दधानं किमेतत्पश्यामीति सशङ्कमूर्ध्वभागेऽनुव्रजता सुधाकरेणेव रमणीयं सहस्रकिरणमण्डलं धवलतरवितानरमणीयोर्ध्वभागं काञ्चनसूत्रकलितं पादुकायुगलं श्रुतियुगली मकुटीद्वितयायितं विलोकमानानां निवृत्तसुरकार्यमार्यं समुपागतं सह समग्रसुहृद्भिर्जानकीहृदयानन्दनं दशरथनन्दनं प्रत्युद्गच्छतां दिव्यपादुकायुग्मं पुरस्कृत्य साकेतनगरजनानामिव तद्विलोकनेन विभीषणादीनामिव च साञ्जलिबन्धानां सभक्तिहर्ष-पुलकसगन्धानां सानन्दभाष्पानु बन्धानां तदनुगतानां वसुन्धरादुरन्धरप्रमुखाणाञ्च नराणां हृदयानि किमप्यानन्द-बन्धुराण्यभूवन्नभूमिरदोवर्णनं महाकवीनां निरर्गलवचसामपि मनसाम् ॥

पद्यम् ॥

व्यासोद्दालकशौनकप्रभृतयो ये द्वे समुद्वीक्षितुं
प्राप्तानेकतपश्श्रमाश्चिरतरं काङ्क्षन्ति सक्षान्तिकाः ।
ते श्रीवासपदारविन्दयुगलीरक्षे दुरीक्षे परं
देवैरप्यति पामरा अपि तदा दृष्ट्वा प्रहृष्टा बभुः॥१२॥

तदपारकृपाजलधेरुपानहोर्युगमपास्तनिखिलभयम् ।
समुदीक्ष्य जनास्सर्वे प्रमदादेवं प्रतुष्टुवुस्तत्र ॥१३॥

In Public domain. Digitization Muthulakshmi Research Academy

तत्र शाब्दिकः कश्चित्साञ्जलिबन्धम् ॥

दीर्घसमृद्धिं धत्ते लुप्तप्रत्ययपदे परे ह्युपसर्गः ।
अत्रेति कस्य मनसे हरेरुपानन्न वेदयत्यर्थमिमम् ॥१४॥

अपि च ॥

श्रीवासपादुमूर्धनि सुमेन सेव्या सुवर्णगुणकलितेन ।
न कथं मूर्धनि कलिता सोमेन स्यास्त्वमम्ब भुवनेऽमुष्मिन् ॥१५॥

इति ॥

पतिव्रताशिरोमणिर्मतिक्षमामणीखनिः
क्षितिप्रियाग्रयसोमभूपति प्रियादयानिधिः ।
सुतो ममैष पाल्यतां दयावहे जयावहे
त्वया जगत्त्रयाम्बयेत्ययाचतेशपादुकाम् ॥१६॥

श्रीसीतारामभूपालोऽपि साञ्जलिबन्धम् ॥

हरेः पादरक्षेत्यपि त्वं प्रसिद्धा सुराणां नराणां च सम्पूर्णरक्षा ।
अजस्रं भवस्यम्ब किं ब्रूमहे दश्चरित्रं विचित्रं भवत्या जगत्याम् ॥१७॥

मन्त्रिमुख्यो वेङ्कटरेड्डिवर इत्थमप्रार्थयत साञ्जलिबन्धम् ॥

भगवत्पदैकचित्तं भरतं राज्ये यथा पुरावीस्त्वम् ।
भूपालममुमपि तथा गोपाय श्रीनिवासपदरक्षे ॥१८॥

अन्यत्र कश्चित् ॥

कुरुमतिपतिपदपुष्करमित्रं त्वां धामनिधिमुदीक्ष्यजनाः ।
हृदयगुहान्धतमसमपि धून्वन्ति सुवर्णपादुके चित्रम् ॥१९॥

इतरत्र कश्चित् ॥

मुररिपुपादुके तव कियानभिमानभरो
बत महदाश्रयात्त्वमिह दिव्य मणीमुकुटम् ।
सरसिजजन्मवृत्रारिपुयक्षपतिप्रमुख
त्रिदशततेरशङ्कमधिरोहसि नित्यमपि ॥२०॥

In Public domain. Digitization Muthulakshmi Research Academy

तिरुमलरायोऽपि सानन्दं साञ्जलिबन्धं च ॥

तिष्ठतु देवः कुरुमतिपतिपदरक्षे त्वमेव मम सेव्या ।
यदखिलजगदवनौ तच्चरणावपि रक्षितौ त्वया नित्यम् ॥२१॥

अग्रतः कश्चित्सानन्दम् ॥

नित्यं कण्टकबाधनानि हरसे श्रीशस्य पादाब्जयो-
स्सक्तायुक्तमिदं प्रणम्य हृदयो ध्याता महाकण्टकान् ।
भक्तानामखिलान् धुनोष्यतितरां चित्रं पुतस्तानमूं-
स्त्वद्ध्यानप्रमदात्सकण्टकतनून् धत्से हरेः पादुके ॥२२॥

अन्यत्र कश्चित् ॥

त्वया सपदरक्षेत्रवरदे जगदीश्वरे ।
दैत्याविपदरक्षास्स्युरम्ब कस्मादिदं भवेत् ॥२३॥

एवं तैस्तैस्त्सूयमाना मुरारेः पादूरेषा जृम्भिते तूर्यशब्दे ।
अद्रेरग्रं नीयते स्म प्रमोदाद्भक्तैऽर्भक्त्याप्रार्थनाकेलिसक्तैः ॥२४॥

कुरुमतिगिरिपतिवरपतिचरणद्वन्द्वारविन्ददत्तमनाः ।
शिरसि दधत्तत्पादूयुगलं भक्तोऽभजत्तदास्थानम् ॥२५॥

घनकान्ति तत्र सनकादिवन्दितं कनकाञ्चितं सुजनकामदं गिरौ ।
नरपालसिद्धिसुरपादपं न्यधात्सुरपालकस्य वरपादुकाद्वयम् ॥२६॥

आवेशादुन्नटद्भिर्बहुतरनिनदैस्तत्र तत्रापतद्भि
र्देवेशाङ्घ्रिद्वयाब्जस्मरणकृतरसैर्मानुषैर्दन्तुरात्मा ।
रेजे कुरुमुर्तिभूभृत्स्वयमपि बहुलावेशविक्षिप्तचित्तो
मत्तः प्रक्रान्तनृत्तः किल करचरणं प्रोत्क्षिपन्मन्दमन्दम् ॥२७॥

शक्रादिमनुतशीलश्चक्राधीशस्ततो गिरेः प्रमदात् ।
निष्क्रम्य पुष्करिण्यां पूजां भेजे रविस्तु चरमाद्रिम् ॥२८॥

सुदर्शनं तं प्रसमीक्ष्य लोकः प्रमोदसिन्धौ प्रथमं ममज्ज ।
विभावसुस्सोऽपि विधूततापो ममज्ज पश्चाच्चरमाब्धिमध्ये ॥२९॥

In Public domain. Digitization Muthulakshmi Research Academy
तदानीम् ॥

स नाम्नो मे पूर्वं बत वधकृते सैन्धवविभोः
करस्थो दैत्यारेः पिहिततरणिस्साह्यमकृत ।
इदानीमेकोऽसावरिवर इतीवाग्रचरणा
वुदस्त्यैनं जेतुं हरिगृहभुवीन्धे स्म तुरगः ॥३०॥

अरिसंज्ञां दधदप्यरिकर्शणनिपुणस्सुदर्शनो वेगात् ।
प्राविक्षज्जलजेक्षणमन्दिरमतिसुन्दरं धरवराग्रे ॥३१॥

कुरुमतिनाथवक्त्रतिलकाय कलङ्कमिषं
मृगमदमर्धचन्द्रमयराजतपात्रतले ।
परिदधती तदोडुमणिहारयुता रुरुचे
प्रविमलकौमुदीच्छलदुकूलवृता क्षणदा ॥३२॥

दुन्दुभिरथ निजशब्दैर्दिशि दिशि परिधाविभिर्जनानखिलान् ।
सानन्दानतनुत बत ताद्दग्राक्षसरिपूत्सवारम्भे ॥३३॥

ते मध्यस्वरवृद्ध्या मनुजाः कोणैर्घनैरभिघ्नन्तः ।
आनकमानाकमथ ख्यातं चक्रुर्महोत्सवारम्भे ॥३४॥

भेरीभाङ्कारशब्दैस्सरभसमिलिते तत्र नानाजनानां
सङ्घे सङ्घर्षभाराज्जनितकलकले चन्दिकासान्द्रदीप्तौ ।
श्रीमल्लुर्मूर्तिनेतुस्तुरगपरिवृढो मन्दरक्षुब्धदुग्धा-
कूपारापारवीचिप्रचयसमुदितोच्चैश्श्रवश्श्रीश्चकाशे ॥३५॥

डोलालीलाविवशितहृदौ श्रीधरण्यौ प्रतार्य
क्ष्वेलाजालाकलितमनुजभ्राजिते द्वारि देवः ।
सोदर्योऽसाविति मखवता वत्सलेनोत्सवार्धे
हर्षादुच्चैश्श्रवसमिव तं नुन्नमारुक्षदश्वम् ॥३६॥

अंहस्संहारधीराच्युतमहकलनाकौतुकेनावतीर्णं
स्वातीतारानुयातं सितकिरणमथ श्रीपतेश्छत्रमच्छम् ।

In Public domain. Digitization Muthulakshmi Research Academy

प्रत्युद्यत्पद्मरागोत्तमकलशमधोनिर्गलन्तं कलङ्कं
देवोद्वीक्षामहिम्नामनुत जनततिश्शाक्रनीलश्चदण्डम् ॥३७ ॥

प्रविमलतरहयपुच्छच्छविविजिते तस्य सेवनानि तदा ।
प्रविदधती इव नितरां प्रविभासेते स्म चामरे चलिते ॥३८॥

शृङ्गारि शेखरोऽप्येष धूतशृङ्गारिंशेखरः ।
कुरुमूर्ति गिरिस्थोऽपि स तुरङ्गस्थितो बभौ ॥३९॥

अपि हरिहय इति विदितो धवलरुचिर्दीपदीप्तिशोणात्मा ।
क्षणमथ हरिरुचिनीलोगन्धकदीपश्रियासितश्चासीत् ॥४०॥

स्वसतामानन्ताक्ष्यं समारुरोहायमितिविमनसं तम् ॥
वाजिपतिं तोषयितुं देवोप्यारुह्य निर्ययौ दूर्णम् ॥४१॥

अहं रत्नसानुः किलेत्युच्चगर्वं सुमेरोर्विधून्वन् स्वयं चापि तादृक् ।
समन्ताद्प्रदीपैरमन्दप्रकाशस्सकुर्मूर्तिभूभृच्चकाशे निकामम् ॥४२॥

अदसीयखनीजनितैर्मणिभिर्विजिता वयमत्र भवेम यदि ।
प्रभवेम समा इति किं पतिता उडवो व्यरुचन् घनदीपचयाः ॥४३॥

अस्मन्नाथस्वसारं श्रियमीह शयने वञ्चयन्कुत्र याति
श्रीमानुद्वीक्षणीयो नियतमिति कृतश्रेणिका अद्रिकूटात् ।
यावद्देवप्रयाणस्थलमुडुनिकराः किन्नु सन्नाहवन्त
स्सोपानश्रेणिपार्श्वद्वयजनविधृता रेजिरे दीपरेखाः ॥४४॥

स्थूलोपलः कश्चन तत्र मूर्ध्ना कयाचिदभ्यर्थनयेव बिभ्रत् ।
दीपं महान्तं विललास तस्मात्तं दीपमाहुः किल गण्डदीपम् ॥४५॥

यद्वा ॥ कृताहल्या त्राणाम्बुजनयनपादाब्जरजसा
दृषत्त्वं स्वं हर्तुं चिरकृततपा नैजशिरसि ।
समुद्यज्ज्वालोऽसौ ध्रुवमिति महादीपशिखरं
जनास्सर्वे स्थूलोपलमभिदधुस्तं गिरिवरे ॥४६॥

In Public domain. Digitization Muthulakshmi Research Academy

आहोस्वित् ॥

लोके ख्याता वरुणगरुडौ तौ सगर्भ्यौ जनानां
श्लाघ्यो गारुत्मतमणिरभूदश्मगर्भत्वभूम्ना ।
इत्यौत्सुक्यादरुणमणिरप्यश्मगर्भादुदीर्णो
नूनं दीपश्शिरसि पृथुलो गण्डशैलस्य रेजे ॥४७॥

बृन्दे बृन्दे स्तुवद्भिस्सरसिजनयनेत्युन्मिषन्मोदभाष्पै
रुन्नृत्यद्भिस्समन्तान्मनुजसमुदयैः पर्वतान्मन्दमन्दम् ।
भेजे राजेन्द्रवासस्थलमतिरभसं साधुक्लृप्त प्रणामं
सानन्दं सन्निबद्धाञ्जलिमतिकरुणासिन्धुरेनं ददर्श ॥४८॥

राज्ञा दत्ताभ्यनुज्ञैस्सपदि वलयिते तत्र सैन्यैर्भटानां
बभ्राजे दीपरेखाधुरि निजजननीं वञ्चयन्नत्र गर्भाम् ।
आयातश्श्रीनिवासोऽयमिति तमभितो मण्डलीभूय मार्गं
रुन्धन्ती रत्नमाला किल सपदि भुवो निर्गतां बद्धरोषम् ॥४९ ॥

तत्र हि ॥

देवं वीजयितुं भुवा सकुतुकं प्रोद्दस्तकालायस-
स्थूणाकैतवबाहुयुग्मशिखयोराकुञ्चिताभिर्ध्रुवम् ।
नाराचाङ्गुलिभिर्धृते अतितरामापाटले चामरे
भ्राजेते स्म मरुद्विलोलित जगज्ज्योतिः प्रदीपार्चिषी ॥५०॥

यद्वा ॥

अयस्कान्तः कालायसघनशलाकाग्रहणतो
जगत्यां विख्यातोऽभवदिति तदुत्कर्षमधिकम् ।
असोढ्वायस्तम्भग्रहणरुचिरौ लोहितमणी
जगज्ज्योतिर्दीपावकलयत सर्वा जनततिः ॥५१॥

उत्तरतस्तस्यास्सेनायाः ॥

नैकविधगन्धककृतप्राकारविचित्रवृक्षचक्राढ्या ।
लङ्केति गीयमाना सङ्कलिता यन्त्रसंहती रुरुचे ॥५२॥

In Public domain. Digitization Muthulakshmi Research Academy

इतश्च ॥

ईषत्स्विन्नकपोलमूलमचिरादाकम्पितभ्रूलतं-
सुस्मेराननवल्गुवल्गितकुचं व्यालोलमालं मुहुः ।
चञ्चत्काञ्चिझणं झणात्कृतिमिलन्मञ्जीरमञ्जुध्वनि
प्रोद्वेल्लद्भुजवल्लिवारवनिताश्चक्रुः पुरो नर्तनम् ॥५३॥

त्रिजगम्मोहनरूपतत्कुचपरीरम्भप्रमोदादिवो
न्ननृतुर्वारवधूततेर्हृदि मुहुर्हारास्तदा नर्तने ।
सुगुणानामपि सन्मणिव्रजजुषां हृद्यस्थितीनामपि
प्रचलत्वप्रदयोस्तयोस्तु कुचयोर्माहात्म्यमन्यादृशम् ॥५४॥

प्रज्ञावतामग्रसरेण तत्र राज्ञा क्षणं सेवितवैभवस्सन् ।
स्फुटीभवत्सून्नततूर्यघोषेष्वटीकताग्रे हरिरेष मन्दम् ॥५५॥

पुष्करिवरदोऽहमियं पुष्करिणी मामिह श्रयति नित्यम् ।
इति तस्या अपि कृपया वरमिव दातुं स तन्निकटमागात् ॥५६॥

गद्यम् ॥

प्रतिगृह्य तत्र कल्पितामनल्पां सपर्यां भगवानप्यनेकमुखाढ्या लङ्का दृश्यते किमिदमुत्तरस्यां दिशीति जनकोलाहलश्रवणाज्जनितरोष इव द्रुततरमुपागत्य पार्श्वद्वय-श्रेणीभूतायां सेनायूथरेखायां तावत्तत्र कस्मादुपागतात्राप्येषेति रोषाद्गिरिशिखरात्साक्षादुत्-प्लुतेनेव अधिभूवा रहितैर्वानरैः प्रेरितेन महाकृत्रिम मारुतिना वालाग्निना दीप्यमानायां प्रदीपरूपमणिनिबिडितमहाकोलाहल-कलितजनकदम्बाम्बुधिमध्यभूस्थितायां तदा कृत्रिमलङ्कायाम् अस्मदधिनाथो भगवाननन्तावतारो मयापि तत्करालङ्कारायानेकरूपता-श्रयणीयेति तत्क्षणं तथावतीर्ण इव सुदर्शने अतिरभसादभ्रपरिभ्रमणनिरवकाश निष्ठीव्यमानस्फुलिङ्गसङ्घनिबिडितप्रान्ते कोटिशः परिभ्रमति चक्ररूप यन्त्रबृन्दे समुज्ज्वलत्येकत्र समुन्नतस्तम्भामूलाग्रपार्श्वद्वयगुम्भात गन्धकभरितेङ्गुदीफलरेखासमुदयेषु क्रमादाभूमेः प्रज्वलितेषु स्वस्वोर्ध्वस्थितं फलमुपागतोऽग्निस्तूर्णं फलफलफलफलेति विशरणार्थकधातुलोण्मध्यमपुरुषैकवचनप्रयोगेनातिरभसं पटुतरं ज्ञापयत्स्विव तापसशाखिजाता अपि गन्धपूर्णाश्चेद्विशीर्यन्त एवेति बोधयितुमिव सशब्दं

In Public domain. Digitization Muthulakshmi Research Academy
शीर्यमाणेष्वाशिखरं क्षणादेव तत्र तिर्यग्गुम्भितदारूभय-पार्श्वलम्बमानगन्धक्यन्त्रपिटक-युग्मेषु प्रज्वलितेषु सहस्रशो गगनाग्रमिलितानामन्योन्याभरणविलोकननैसर्गिक-महौत्सुक्यानां सुरसुन्दरीणां परस्परहारपरिवर्तनसमये महोत्सववैचित्र्यावलोकनपरवश-हृदयतया करतलात्प्रमादाद् द्वन्द्वं द्वन्द्वं च्युतेष्विव स्थूलवज्रघटितैकावलीहारेषु पिटकयुगलेभ्योऽधो गलत्सु प्रज्वलनधवलेषु गन्धकघुटिकामालिकाश्चित शणरश्मिषु तत्क्षणात्सरभसपतितान् दिव्यमणिहारान् का वा समुत्सृजेदिति ताभिरवतीर्य स्वीकृतेष्विवादर्शनमुपगतेषु तेषु अन्यत्र चक्राकारयन्त्र शतान्तरालेष्वेकत्र समुद्दीपितेषु पार्श्वद्वये प्रत्येकमेकमार्गे कृतप्रस्थानेषु मध्ये परस्परसम्मुखीनतया पुनरन्योन्यं निवृत्तेषु पुनरेकत्राभिमुख्यादपसरत्सु पुनरप्येवमेव चिरतरं परिभ्रमत्सु गन्धकयन्त्रविशेषद्वयेषु समानबलमल्लयुग्म मण्डलं चङ्क्रमरीतिमिव दर्शयत्सु विलोक्य महोत्सवं नभस्थितान् स्वकीयन् कांश्चिदेतदुत्सववैचित्रीविलोकनायानेतुं सश्लाघावचनं सरभसं समुत्पतत्सु प्रथमावतीर्णनक्षत्रेष्विव स श्रीङ्कारं गगनाग्रमारोहत्सु यान्त्रिकजनदीपितेष्वाकाश-बाणाख्यवह्नियन्त्रेषु श्रीनिवाससेवा समागतानां जनतानां पातकसमूहान् पटपटपटपटेति गत्यर्थ धातु प्रयोगेण निस्सारयितुमिव रटत्सु यन्त्रेष्वन्येषु नूनममूनि यन्त्राणि मनुजानाममीषां कुरुमतिपतौ दृढां कलयत मनोरीतिमिति सूचयन्ति महाजनकोला-हलदत्तहस्तभेरीपटहाद्यवाद्यरवमुखरित दिङ्मुखतयाल्पप्राणा अत्र सर्वे वर्णा न श्रूयन्ते महाप्राणतया ढामित्येष उन्मस्तकतया श्रवणगोचरीभवति स्फुटं जनानामिति प्रतर्क्यमाणं ढाङ्कारं प्रपञ्चयत्सु केषु चिन्महायन्त्रेषु पतत्सु केषुचिल्लाजनिकरेष्विव गलत्सु केषुचिन्मौक्तिकराशिष्विव कीर्यमाणेषु केषुचित्पद्मरागशकलेष्विव उन्मीलत्सु केषुचिदिन्द्रनीलमणिष्विव प्रसरत्सु केषुचित्सुवर्णकुसुमेष्विव यन्त्रबृन्दादग्निकणेषु परिपूर्णचन्द्रमण्डल सच्छात्रेषु केषुचित्प्रज्वलत्सु गन्धकप्रदीपबिम्बेषु बहुविधमेवं विलोक्य साक्षात्प्रज्वलितां तां संहृष्टतरैर्नरैस्स्तूयमानो निवृत्य श्रीनिवासो यावदद्रि शृङ्गारोहणाय प्रसारयति कटाक्षं तावत्तदुत्सवसेवनहृष्टमानसां शुभगुणकदम्बां निजाम्बां लक्ष्म्यम्बां पुरस्कृत्य साकं वेङ्कटरेड्डिवरेण बहुसत्यपरेणामात्यवरेणारुह्य नरेश्वरः करीश्वरं ध्यायन्ध्यायं पुण्डरीकदलायतेक्षणं करुणावरुणालयं शरणागतभरणादरणमखिलनिगमाभरणं निखिलविपत्तिहरणं शुभकरस्मरणं घनाघनरुचिसुभगङ्करणं करिवरप्रियङ्करणं समग्रदेवता-प्रमोदस्थूलङ्करणं सकलकलिकण्टकोद्धरणमखण्ड जगदाढ्यङ्करणं प्रफुल्लजलजतल्लज-

In Public domain. Digitization Muthulakshmi Research Academy

सदृशचरणं नित्यतरुणं भवाम्बुधितरणकरणं शरणं त्वां प्रपन्नास्स्मो रक्षास्मानिति समुज्जृम्भमाणे काहालपटहपणवाद्यवाद्यनिनदे प्राविक्षदनेकभूदेवकुटुम्बाकरमम्बापुरम्।। इतश्च ॥

पद्यम् ॥

निश्शङ्कं कमलां विनैव सुमहानीदृङ्न्याद्योत्सवः
प्राप्तस्सा कलयेन्नु मां किमिति निर्लक्ष्यं हरिर्वैभवात् ।
आरुह्यागृहदर्शनं गिरिवरं तत्र क्वचित्प्रोल्लसद्गीतं
नर्तनमेष वारवनिताक्लृप्तं ददर्श क्षणम् ॥५७॥

तावज्ञातरुषा मुरारिरचिता तत्तादृशाद्वञ्चनाद्देव्या-
तस्य विमाननाय नितरां सम्प्रेषितश्चोरराट् ।
अभ्येत्य द्रुतमुद्भटैर्निजभटैस्सार्धं महर्धिन्तदा
तिष्ठा त्रेति ससिंहनादमचिराल्क्रोधाद्रुरोधाच्युतम् ॥५८॥

स्वकेशैरिवात्यन्तवक्रैश्च पुण्ड्रैर्विराजन्निटाला भृशं लीयमानाः ।
धरण्यां भुजङ्गप्रयातैररुन्धन् भुजङ्गद्रिनाथं भटास्तस्य गाढम् ॥५९॥

आकृष्टध्वजमपनीत तूर्यभेरिप्रोद्धूतामितविमल प्रकीर्णकञ्च ।
उन्नीताद्भुतवनमालमेवमेतत्सर्वस्वञ्जलधिसुतापतेस्सजह्रे ॥६०॥

कोणाघातोत्थभेरीपटलपटु महाधीरभाङ्कारभारै
र्भिन्दन् दिक्सन्धिबन्धानिव गगनतलप्रोल्लसत्सिंहनादः ।
छत्रैश्शीतांशुमित्रैस्सह विमलतरैश्चामरैर्वीज्यमान
स्साक्षात्कुर्मूर्ति शैलाधिप इव निकटं चोरराट् प्राप लक्ष्याः ॥६१॥

नवनीतचौर्य दोषाद्भुतसर्वस्वो बभूव देवोऽपि
चौर्यकृतो गतिरीदृङ् न भवतु पामरजनस्य कस्माद्वा ॥६२॥

न्यस्यति यावत्पदमधिरोढुं गृहमतिखिन्नः कुरुमतिनाथः ।
तावदमुष्याग्रभुवि विवल्गन्मौक्तिकमाला सह च भुवा श्रीः॥६३॥

यच्छत्रं चामरे ये कनकमणिसरा ये च पीताम्बरं य
द्येवादीप्राः प्रदीपाः करितुरगततिर्या च या वारकान्ताः ।

In Public domain. Digitization Muthulakshmi Research Academy

सर्वस्वं चापि लक्ष्मीधरणिपरिसरे वैभवं वीक्ष्य नैजं
शश्वन्निश्वस्य किं स्यादिदमिति बहुशश्चिन्तया दन्तुरोऽभूत् ॥६४॥

पश्यन्त्योश्श्रीभूम्योर्लज्जा ललना हरिं निजग्राह ।
पुरुषेषु सुन्दरेषु स्त्रीणाम्बत साहसं कियल्लोके ॥६५॥

यदि दृष्टे श्रीभूम्योर्वदने विजहाति मामयं नूनम् ।
इति निगृहीतस्त्रपया किल वदनं मोन्ननाम चिरमेषः ॥६६॥

अनित्यैषा व्रीडा मम किमनयेऽतीव सचिरा-
द्विहायैनां लक्ष्मीं सहधरणिमुद्वीक्ष्य दयिताम् ।
जगादैवं बद्धाञ्जलिरतिभिया कुर्मतिपति
र्यथा स्वस्यां पुंसामतिसरसतान्यत्र न तथा ॥६७॥

कान्ते निशाकान्तमुखे किमेतत्कान्ते मयि स्यात्करुणा तवेषत् ।
हन्तेदृशो मद्विभवापहारस्स्वान्ते प्रपुष्णाति मुदं नु किन्ते ॥६८॥

लक्ष्मीः ॥

कान्ताभुजङ्गाग्रगका तवात्र मां तादृशैर्मा वद चाटुवाक्यैः ।
किं तावकोऽयं विभवो मयाद्य हन्ताहृतः पृच्छसि कं नु मन्दम् ॥६९॥

भगवान् ॥

विभाति यद्यत्तव सन्निधौ श्रीर्विभासुरार्कद्युतिभूषणादि ।
स्वभाव वामे तदिदं मदीयं विभावयाम्भोजसगर्भ्यनेत्रे ॥७०॥

लक्ष्मीः॥

पञ्चायुधात्यद्भुतमत्कटाक्षसञ्चारभाग्याधिगता हि सम्पत् ।
किं चापलं तेऽत्र हृता मयैषा तां चारुनेत्रां परिपृच्छ लक्ष्मीम् ॥७१॥

भगवान् ॥

तामेव पृच्छामि मृगाक्षिलक्ष्मीं त्वामेष दद्याः कृपयाब्धिकन्ये ।
वामेक्षणे गच्छतु रोष एष को मेऽपराधोऽस्ति वृथापवादः ॥७२॥

In Public domain. Digitization Muthulakshmi Research Academy

लक्ष्मीः ॥

पटूत्तरासाध्यतमे स्वकृत्ये चाटूक्तिचातुर्ययुताः पुमांसः ।
कटूनकार्षीर्मयि हन्त मन्तून्पटूभवस्यद्य धुतावमानः ॥७३॥

भगवान् ॥

नैवास्ति मय्यम्बुधिपुत्रिमन्तुः का वागदीत्ते मयि दोषमेवम् ।
सेवाकरोऽहं तव हन्त भामे क्रो वा विना त्वां चलितो रुषालम् ॥७४॥

लक्ष्मीः ॥

यातो न चेदेवमिमां भुवं मां चेतो विमुच्य क्व गतोऽसि रात्रौ ।
चेतो विधां वेदवधूः क्व पुंसां स्फीतो भवत्किन्नु तयोपभोगः॥७५॥

भगवान् ॥

यतोऽसि पद्माक्षि निसर्ग भीरुरतोऽत्र हित्वा भवतीं गतोऽस्मि ।
इतो वनान्तं बहुसत्वघोरं नतोऽस्मि कान्ते विजहीहि रोषम् ॥७६॥ लक्ष्मीः ॥

विचारणैः किं मम तावकीनैरचातुरीयं मम तावदेषा ।
क्व चारुनेत्रा मनसः प्रिया ते क्व चाति मुग्धाहमये प्रयाहि ॥७७॥

भगवान् ॥

मा चारुनेत्रा मम कापि भामे वाचाभरैस्तक्षसि किन्नु रूक्षैः ॥
सा चातुरी कुत्र गताद्य वाचां मोचाफलप्रार्थ्यरसानघानाम् ॥७८॥

लक्ष्मीः ॥

कृतापराधोऽपि वचोभरैर्मां नितान्तमाधुर्ययुतैर्धिनोषि ।
नतावदब्जेक्षणनिग्रहे ते गता मतिर्मे कुतुकं नितान्तम् ॥७९॥

भगवान् ॥

रमानिवासोऽयमिति प्रिये माममानुषा अप्यखिला वदन्ति । क्व
मादृशे तेऽस्ति रुषोऽवकाशो ममाद्य देहि प्रमदं रमे त्वम् ॥८०॥

इति निशम्य वचः प्रियकीर्तितं प्रतिगताखिलकोपविजृम्भणा ।
पतिमियं समवाप कृतस्मिता पतिषु रोषभरस्सुदृशां कियान् ॥८१॥

अभजत कामपि लक्ष्मीमिभवरदस्सन्निधेश्श्रयो देव्याः ।

In Public domain. Digitization Muthulakshmi Research Academy

त्रिजगत्पतिरपि कान्तिं भजति न जायां विना जातु ॥८२॥

तत्क्षणमखिलो विभवोऽवर्धिष्ट पुरो रमानिवासस्य ।
तामन्तरेण लक्ष्मीं देवस्याप्यस्ति हन्त नैश्वर्यम् ॥८३॥

तस्यै प्रणतीस्तनुमस्त्रिजगन्मात्रे यदीषदुदितरुषा ।
निस्व इवासीद्देवः पुनरधिकश्रीरनुग्रहात्तस्याः ॥८४॥

नादयन्तो मुहुस्सुन्दरान् दुन्दुभीन्वादयन्तो घनं मन्दरं मन्दरम् ।
इन्दिरादीशितुर्मन्दिरान्तं मुदा मन्दमन्दं नरा बन्धुरं चक्रिरे ॥८५॥

मदावलगतागतातिमहिमाहिमांशुसमता मतास्य रुचिरा ।
चिरादति घनाघनाघनसमासमा बहुतरं तरङ्गितदया ॥८६॥

विवेश भवनं वनं विजहतीह तीर्णसुमहामहार्घ हि तदा । त द ा
सुजनता नता द्रुतगतिर्गतिर्भुवि सतां सतां द्युतिततिः ॥८७॥

जृम्भितेषु घनदुन्दुभिघोषाडम्बरेषु मरुतां सकलानाम् ।
स्वागताचरणकौतुकवत्सु द्रागवातरदयं हरिरश्वात् ॥८८॥

झणञ्झणक्वणन्मणीन्द्रकिङ्किणीगणाञ्चिता
त्युदञ्चिचञ्चलाबलाकराग्रपञ्चचामरैः ।
सुनिर्मलैस्स कुर्मतीश्वरो विनिर्मितश्रमा
पनोदनो घनोपमोऽथ डोलिकान्तिकं ययौ ॥८९॥

बालिकाकरमरालिकालसच्चामरद्वितयधामरञ्जितः ।
डोलिकां जलधिबालिकायुतस्सोऽधिरुह्य मुमुदेऽधिनायकः ॥९०॥

नीलाम्बुजमाला लीलाभृदपाङ्गालोलन्मणिमाला बालाश्शुचिचेलाः ।
वाराम्बुजनेत्रास्स्मेराद्भुतगात्रा लास्यं धुरि शौरेस्तस्याथ वितेनुः ॥९१॥

अब्जाभिख्यां निजकरयुगस्य सार्थं विधातुमनसोऽथ ।
अञ्जलिभिस्सुममुकुलान्मुक्तानिकरानिवाग्रतो व्यकिरन् ॥९२॥

जलधि सुतादिव्यधररसरुचिरं निजगुणावलीकलितम् ।
भक्तजनगीतमश्रृणोत्फणीन्द्र शिखदीन्द्रमौलिमणिरेषः ॥९३॥

In Public domain. Digitization Muthulakshmi Research Academy

तावदेव ॥

एते गच्छन्तु देवं सरसिजनयनं साधु संसेव्यभक्ता
अन्योद्वारीत ऊर्ध्वं स्ववहितहृदयैर्मुच्य तां माभवद्भिः ।
भो भोश्चण्डप्रचण्डौ जयविजयमहावास्तकालातिपातो
भो भद्र श्रीसुभद्रावतहरिभवनं साधुधातर्विधातः ॥९४॥

इन्द्राग्ने धर्मराजाशरवर वरुणस्पर्शनेशानमित्र
श्रीकण्ठात्रैषदेवस्स्वपितिसुममये दिव्यमश्चे मुरारिः ।
रक्षं त्वेनं भवन्तस्स्वयमखिलजगद्रक्ष कंपङ्कजाक्षं
राजानं रक्षिवर्गा इव निभृतहृदस्सार्वभौमाग्रगण्यम् ॥९५॥

मृदुलमृदुलमत्र वैणिकेन्द्राः कलयत मञ्जुविपञ्चिकानिनादम् ।
महाजनितपरिश्रमो मुरारिर्न विषहते मुरजादिधीरनादम् ॥९६॥

इति वेत्रात्तहस्ताग्रः प्रतिशास्याखिलान् जनान् ।
पतिं श्रियस्सूत्रवती पतिरेवं व्यजिज्ञिपत् ॥९७॥

शुचिरुचिसुरुचिरविचि किल निचयप्रचुरीकृतः कृतस्सज्ञः ।
चञ्चन्मञ्चश्शयने यद्यस्ति रुचिः प्रसार्यतां दृष्टिः ॥९८॥

इति तदर्थनया भगवान् हरिस्सह भुवा जलधीन्द्रसुतायुतः।
गृहमथ प्रविशन्मणिमञ्चके न्यविशताविशताधिकरोचिषि ॥९९॥

यातेष्वञ्जलिमारचय्य शतशो मर्त्येषु मन्दं बहि
स्सद्यस्सङ्घटिते कवाटयुगले रेजे गृहं श्रीपतेः।
आरभ्योत्सवमत्र सप्तदिवसान्निर्निद्रचक्षुस्सदा
निद्राश्रान्ततयेव पक्ष्मयुगली सम्मील्यमाने क्षणम् ॥१००॥

विजहार सुखं देवो निजलीलाविवशितक्षमाश्रीकः ।
अजहर हरिमुख्यसुरव्रजनुतमहिमा गुहागृहे तत्र ॥१०१॥

श्रीवासस्योत्सवेऽस्मिन् सकुतुक हृदयस्सङ्गतेभ्यः कविभ्य
स्सीतारामेन्द्रभूपः कनकगुणमयं चेलजालं सलीलं

In Public domain. Digitization Muthulakshmi Research Academy

मुक्तामहारानुदारान्मणिमयवलयानुज्वलांश्चन्द्रहारा
न्प्रादान्मोदात्तुरङ्गानपि ललितगतीन्नाङ्कवाण्युज्वलानि ॥१०२॥

अन्येद्युर्धन्यचित्तैः कुरुमतिशिखरिश्रीनिवासोत्सवश्री
सेवाभूम्ना समग्रैर्निजबलनिवहैर्द्राग्यथापूर्वमेव ।
सन्नद्धैस्संवृतस्सन्नभजत कुतुकादात्मनस्तां पुरीं
श्रीसीतारामक्षमेशस्सरभसमिलितैर्वीक्षितस्सर्वपौरैः ॥१०३॥

ध्यायं ध्यायं हृदयकमले साधुकुर्मूर्तिशैला
वासं भासा विजितजलदं सन्ततं श्रीनिवासम् ।
सीतारामक्षितिपतिमणिस्सोमभूपालसूनुः
प्राज्यं राज्यं शिशिरकृपया तस्य गोपायतीह ॥१०४॥

कुरुमतिगिरिपतिदयया सीतारामेन्द्रभूमिपालस्य ।
आयुश्श्रीराज्यात्मज सुखसम्पद्विजयमेधिषीष्ट चिरात् ॥१०५॥

एवं नित्यं प्राप्तदिव्योत्सवश्रीश्शैले तस्मिन्नेष कुरुमूर्तिसंज्ञे ।
सीतारामक्षोणिपालाभिवृद्ध्यै प्रोद्यद्दीक्षश्श्रीनिवासस्समिन्धे ॥१०६॥

इति बालेन मया कुरुमतिनाथकृपानिधे कृतामेताम् ।
कृतिमतिललितां चरणद्वितये भवतोऽर्पितां गृहाण हरे ॥१०७॥

क्व मितमतिरहं क्वचाद्भुतस्ते गुणमहिमा महिमाननीयमूर्ते ।
इह मम कवनेन तेऽस्तु हर्षस्तदपि यथामति कल्पितेन शौरे ॥१०८॥

नायतिषि मृदुपदानां घटने सरसार्ध निचयरचने वा ।
स्वयमेव स्वनुतिं मामचीकरश्श्रीनिवासकरुणाब्धे ॥१०९॥

रचयामि मस्तकेऽञ्जलिमचमत्कृतिरपि मम मुखोत्था ।
त्रिचतुरगुणशून्यापि च सुचतुरमतिभिर्विलोक्यतां कृतिभिः ॥११०॥

प्राचीनमेव कवनं मधुरं न नवीनमिति कृतिप्रवराः ।
भवतां हृदि मा भवतु प्रत्यग्रं मधु कथं न मधुरं स्यात् ॥१११॥

In Public domain. Digitization Muthulakshmi Research Academy

प्रत्यग्रां स्वकृतिं मनोहरत मामग्रे पुरोभागिनां
प्राचीनेयमिति ब्रुवन्मथयतु प्राज्ञो यदि स्यात्कविः ।
क्व प्राञ्चः क्व च नूतनाः क्व नु कृतिर्दृष्टे दृगुव्यामिति-
श्लाघन्ते त इमे तदा स्वकवने विज्ञायते चातुरी ॥११२॥

श्लाघन्तां कतिचित्पुरातनकृतिं तत्रास्त्यसूयाननः
कस्मात्तादृशमप्यमी नवकृतिं तूष्णीन्तिरस्कुर्वते ।
प्राचां वाच्यसतोऽपि हन्त सुगुणानारोपयन्ते पुन
स्तानन्यत्र सतोऽपि नाददति हा नैतत्कथं दुस्सहम् ॥११३॥

प्रतनं वास्तु नवं वा कवनं किमु तेन गृह्यतां सुगुणः ।
इह वान्यद्वीपे वा जातस्स्यात्तेन किं मणिर्ग्राह्यः ॥११४॥

नहि भवतामपराधश्शृणुतासूया पिशाचिका काचित् ।
इन्धे हृदि तच्चेष्टा गुणवैमुख्यं हि भोः कुटिलधिषणाः ॥११५॥

अनधिगतकाव्यपरिमललेशाः कतिचन गभिरभावाढ्ये ।
कविवचने मा जात्वपि गुणदोषविवेकचापलं यान्तु ॥११६॥

अलन्तावदति प्रसङ्गेन ॥

न प्राचीनत्वं वा नव्यत्वं वापि रम्यताहेतुः ।
गुण एवैको ग्रन्थं गुणिनो निष्पक्षपातमीक्षध्वम् ॥११७॥

शठमर्षणकुलतिलकः कृष्णः कविसार्वभौमबिरुदाढ्यः ।
श्रीनिवासविलासेऽस्मिन् पञ्चममुल्लासमभ्यधान्मोदात् ॥

श्रीवासब्रह्मतन्त्रादिमपदपरकालार्यवर्यानमांघ्रि-
द्वन्द्वाब्जानु ग्रहात्प्रतिपदविविधग्रन्थनिर्माणशक्तिः ।
संख्यावान् कृष्णनामा सरसकविघटासार्वभौमोव्यतानी
च्छ्रीमत्प्रत्यग्रदुर्गस्थितिरतिललितं सर्वभव्यं सुकाव्यम् ॥११८॥

श्रीमत्सव्वायिराजाबहदुरुबहिरीत्यादिचिह्नाङ्कितस्य
श्रीसीतारामभूमीपतिमकुटमणेर्मुक्कराख्यान्वयेन्दोः ।

In Public domain. Digitization Muthulakshmi Research Academy

सभ्यास्सर्वे समेतास्समदगजमिहारोप्य सञ्चार्य वीथ्यां
हर्षाद्यं तूर्यघोषैस्समदकविघटा गण्डभेरुण्डमाख्यन् ॥११९॥

श्रीमन्नैजकतातपादकरुणासारैस्समङ्कूरिता
श्रीरङ्गार्यनृसिंहतातगुरुसत्कारुण्यपूरैधिता ।
पश्चात्सञ्जयदेशिकेन्द्रसुकृपापीयूषधाराभरै
रत्यर्थं सफलीकृता मतिलता यस्यैधते सत्कवेः ॥१२०॥

कृष्णाम्बादिव्यगर्भाभिधकनककनत्सम्पुटान्तर्विराज
ज्जन्म श्रीवङ्कटार्यारुणमणिसहजं यं वदन्तीन्द्रनीलम् ।
श्रीमच्छ्रीवत्सदिव्यान्वयजलधिविधोर्यञ्च रामार्यसूरे
र्दौहित्रं रङ्गनाथाभिधवरकृतिनो भागिनेयं च लोकाः ॥१२१॥

निर्निद्राजस्रदीव्यत्फणिपतिशिखरिप्रेष्ठकारुण्यलब्ध-
प्राज्यैश्वर्यैरवार्यैर्विरचितभगवद्भक्तसम्प्रीतिभारः ।
इन्धे श्रीश्रीनिवासाभिधकृतितिलकः प्यापलिग्रामदीव्य
द्रङ्गाम्बाबोज्झिकृष्णोत्तमकृतितनुजो यस्य मातृष्वसेयः ॥१२२॥

श्रीशैलारात्रिककुलतिलकश्रीकोण्डमार्यकरुणाभिः ।
अधिगतशब्दनयो यः पौत्रश्श्रीवेङ्कटार्यवर्यस्य ॥१२३॥

गिरीश्वरदरीमुखोद्भटकरीन्द्रकुम्भस्थली
विपाटनसपाटवोग्रहरिगर्जनोत्तर्जनैः ।
वितीर्णकविधूर्वहप्रततिमौलिडोलायितैः
क्वचित्कुकवयो धृतास्सुकविसार्वभौमोदितैः ॥१२४॥

आस्तामिदम् ॥

त्रात श्रीलक्ष्मणार्यानघमतविभवैस्तत्वमार्ताण्डमुख्य-
ग्रन्थैरुन्धन् कुदृष्टि प्रतति घनतमस्सन्ततिं सन्ततं यः ।
वेदान्तचार्य एवेत्यखिलबुधजनैश्श्लाघ्यते स्मावतीर्णो
भूम्यामुत्तुङ्गगङ्गालहरिमदहर प्रौढ़वाचा विचारः ॥१२५॥

In Public domain. Digitized by Muthulakshmi Research Academy

तस्य श्रीबुक्कपुर्यन्वयजलधिविधोश्श्रीनिवासार्यसूरे
र्नप्तुश्श्रीरङ्गनाथाभिधकृतितिलकाच्छुद्धसत्वादुदीतः ।
आचार्यश्शान्तचित्तस्सुरपुरबहिरीवेङ्कटेन्द्रस्य धीमान्
बुद्धि श्रीवेङ्कटार्यो जगति विजयतां काव्यविच्छाब्दिकेन्द्रः ॥१२६॥

आचार्य दीक्षितकुलाम्बुधि कल्पवृक्षो
मोचारसोपमितरम्यवचः प्रचारः ।
आचान्तदुष्कविकुलोद्यतखर्वगर्वो वाचा
विचारनिपुणो महतां कवीनाम् ॥१२७॥

कवितामहत्त्वरक्षणविचक्षणानितरसदृशवात्सल्यः ।
गद्वालास्थानकविर्भुवि जयतु पुराणदीक्षिताचार्यः ॥१२८॥

मुक्करकुलकलशाम्बुधिसितभानोरात्मकूरुपुरनेतुः ।
सीतारामावनिपतितिलकस्यास्थाननित्यमान्याभ्याम् ॥१२९॥

एताभ्यां कवितारसविज्ञाननिरङ्कुशप्रभावाभ्याम् ।
अभिनन्दितो विजयतां श्रीनिवासविलास एष चिरकालम् ॥१३०॥

वर्षेषु शैलगजगोत्रधरामितेषु श्रीशालिवाहनशकेऽत्र गतेष्विदानीम् ।
रक्ताक्षिवत्सरतपस्सितपक्षधातृ घस्रे कृतः कुरुमतीन्द्रविलास एषः ॥१३१॥

जयतु जयतु भूमौ दानशौण्डोत्तमश्री
र्जयतु जयतु वाचां सौरभी सत्कवीनाम् ।
जयतु जयतु नित्यं कुर्मतीन्द्रोत्सवोऽयं
जयतु जयतु नेता वेङ्कटाद्रे स्थिरश्रीः ॥१३२॥

इति श्रीमच्छ्रीनिवासब्रह्मतन्त्रपरकालगुरुवरकरुणाकटाक्षसमासादित-निरवद्य-कविताप्रतिभाभासुरस्य श्रीमच्छ्रीशैलघनगिरिप्रत्यग्रदुर्गतातार्य वर्यद्वैतीयीकनन्दनस्य साहितीज्यौतिषपारदृश्व वेङ्कटाचार्यानुजन्मनश्श्रीमदुक्कलश्रीवत्सवंशरामार्यानन्ताम्बा-दौहित्रस्य श्रीकृष्णकविसार्वभौमस्य एतद्ग्रन्थनिशमना-वसरात्मकूरुपुराधिपसीताराम-भूपालास्थानकविव्रजप्रदत्त समदकविघटा गण्डभेरुण्ड बिरुदस्य कृतिषु श्रीनिवास-विलासाख्यो चम्पूप्रबन्धो पञ्चमः

श्री श्रीनिवासपरब्रह्मणे नमः
मङ्गलानि भवन्तु श्रीरस्तु

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकानां वृत्तसूची

क्र.सं.	वृत्तस्य नाम	उल्लासस्य सङ्ख्या	श्लोकसङ्ख्या
1.	अनुष्टुप्	1	21, 22, 28,
		2	7,
		5	23, 39, 97,
2.	आर्या	1	2 - 5, 8 -11, 13 -15, 17, 20, 23, 31 - 33, 35, 38, 40, 41, 48, 51 – 67,
		2	1-3, 5, 8, 10, 11, 12, 14, 17, 22, 23, 33, 34, 48, 52, 55, 56, 57, 58, 59, 66, 67, 76, 78, 79, 84, 86, 92, 93,94,
		3	1, 13, 14, 15, 12-14, 15, 23, 24, 36, 38, 42, 54, 55, 60-62, 65, 66, 67, 69, 72-74, 76, 84
		4	5, 6, 9, 11, 13, 16, 18, 23, 25, 26, 29, 30, 37, 55, 58, 60, 63, 66,
		5	7, 13, 14, 15, 18, 19, 21, 25, 28, 31, 33, 34, 38, 40, 41, 52, 56, 62, 65, 66, 82, 83, 84, 92, 93, 98, 101, 105, 107, 109, 110, 111, 114-118, 124, 129-131
3.	इन्द्रवज्रा	5	68-75
4.	उपेन्द्रवज्रा	4	61,
		5	8, 29, 77-80,
5.	उपजातिः	1	45, 55,
		3	58, 68, 79, 81

In Public domain. Digitization Muthulakshmi Research Academy

		4	15
		5	45, 55
6.	औपच्छन्दम्	4	27, 42-46,
		5	96,
7.	कामदत्ता	5	10, 108,
8.	जलोद्धता	5	86, 87,
9.	तोटकम्	5	4, 43,
10.	द्रुतविलम्बितम्	4	65,
		5	81, 99,
11.	नर्कुटम्	1	24, 26,
		2	20, 42,
		3	18, 22, 26, 39, 82,
		4	1, 33,
		5	20, 32,
12.	पञ्चचामरम्	4	10, 31, 32, 47-51,
		5	16, 89,
13.	पृथ्वी	1	6, 19,
		2	29, 32, 61, 63
		3	17, 31, 37,
		4	4,
		5	125,
14.	प्रभा	2	88
15.	प्रभातौपमा	3	59
		4	19,
16.	प्रहर्षिणी	4	12, 40,
		5	2, 3, 60,
17.	भुजङ्गप्रयातम्	5	17, 42, 59,
18.	मञ्जुभाषिणी	1	25
		2	60,
		5	26,

19.	मत्तेभविक्रीडितम्	2	16, 49,
		3	34,
		5	54,
20.	मदनार्ता	2	73,
21.	मणिमाला	5	91,
22.	मन्दाक्रान्ता	2	91,
		4	14, 35, 52,
		5	5, 36, 47, 104,
23.	मालिनी	2	68, 81,
		3	2, 77,
		4	22,
		5	133
24.	मौक्तिकमाला	5	63,
25.	रथोद्धता	5	90,
26.	ललिता	5	1,
27.	वसन्ततिलका	1	39,
		2	19, 26, 64, 80, 90,
		3	7, 64,
		4	57,
		5	128, 132
28.	वंशस्थम्	2	18, 53, 69,
		3	78,
		4	17, 21,
29.	वातोर्मी	3	3
		63, 70,	63, 70,
30.	शार्दूलविक्रीडितम्	1	1, 7, 18, 29, 36, 37, 45, 46,
		2	4, 6, 9, 13, 15, 21, 27, 36-39, 65, 70, 72, 74, 75, 82, 83, 87, 89, 57,

In Public domain. Digitization Muthulakshmi Research Academy

		3	3, 8, 25, 27-29, 41, 43-51, 53, 71,
		4	2, 7, 20, 28, 34, 41, 54, 59, 62,
		5	12, 22, 50, 53, 57, 58, 100, 112, 113, 121, 122, 123,
31.	शिखरिणी	1	30, 34, 47,
		2	35, 77,
		3	4, 5, 6, 9, 40, 80,
		4	8, 53,
		5	9, 30, 46, 51, 67,
32.	स्रग्धरा	1	16, 27, 43, 44
		2	40, 41, 50, 51, 62, 85,
		3	10, 12, 11, 16, 19-21, 30, 32, 33, 34, 52, 75, 83,
		4	24, 36, 38, 39, 64,
		5	27, 35, 37, 44, 48, 49, 61, 64, 94, 95, 102, 103, 119, 120, 126, 127,
33.	स्रग्विणी	5	6, 85,
34.	स्वागता	5	88,
35.	हरिणी	1	12,
		2	54,
		3	56,
		4	3,
		5	11,

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy



रघुनाथविजयचम्पूप्रबन्धस्य श्रीनिवासविलासचम्पूप्रबन्धस्य कर्ता
श्रीश्रीश्रीकृष्णब्रह्मतन्त्रपरकालयतीन्द्रमहादेशिक इति अपरनामाभिधः
नवदुर्गं (होसदुर्गं) कृष्णकविः

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2023

978-93-80171-82-1